भट्टारक ज्ञानकीर्तिने सोमदेव, हरिषेण, वादिराज, प्रभंजन, धनंजय, पुष्पदन्त और वासवसेन आदि विद्वानोंके द्वारा लिखे गए यशोधर महाराजके चरितको अनुभव कर स्वल्पबुद्धिसे संक्षिप्तरूपमें इस ग्रन्थकी रचना की है। ग्रन्थकी आद्य प्रशस्तिमें भ० ज्ञानकीर्तिने अपनेसे पूर्ववर्ती उमास्वाति, समन्तभद्र, वादीभसिंह, पूज्यपाद, भट्टाकलंक और प्रभाचंद्र इत्यादि विद्वानोंका स्मरण किया है। प्रस्तुत ग्रंथ ९ सर्गोंमें समाप्त हुआ है और उसे साह नानूके नामांकित किया गया है।

—परमानन्द जैन

प्रस्तावनाकी नाम-सूची

शुद्धि-पत्र

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
५	१६	चवक्रवालः	चक्रवालः
१२	२०	लिखते	लिखन्ति
१३	१८	स्मण	स्मरण
१५	१८	गुरुणामुप—	गुरूणामुप-
१६	२	यशोधरचरित	सुदर्शनचरित
१८	१५	सुगरु—	सुगुरु—
,,	१८	सकल गुणनिधैः	सकलगुणनिधि-
२२	२०	दोषैरवालोकित-	दोषैरनालोकित-
,,	२४	हु मान् (?)	महान्
२३	२४	(१८७४)	(१८८४)
२६	३	विजयनिवररत्नं	विजयिनि वररत्नं
३४	४	विश्वभूषण-विरचिते	विश्वभूषण-पट्टाभरण- जिनेन्द्रभूषण-विरचिते।
३८	६	कर्यो	कार्यो
३६	८	कोविदः	कोविदाः
४१	१८	भुवनत्रये	भुवनत्रयम् ॥
४३	६	वृषभाङ्कित।	वृषभाङ्कितम्।
,,	१६	संस्ते	स्तुते
४५	१४	तदा···च्छ्री	तदाज्ञया श्री
,,	२५	काव्य···जिका	काव्यपंजिका
४७	८	कवित्तमदतः	कवित्वमदतः
४६	२३	सूरिश्च···न्द्रादि-	सुरेन्द्रचन्द्रादि
५०	१४	महान ॥१७१	महान्।
,,	३	सदा ॥१७२॥	सदा ॥१७१॥✻

✻ इससे आगेके सब श्लोकनम्बर एक अङ्क कम जानने चाहिए।

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
५३	२०	बाल सवुद्धयै	बालसंबुद्धयै
५४	६	गुणगेय (?) कीर्त्ति-	गुणिगेयकीर्त्ति-
,,	१६	समाप्तेदं	समाप्तमिदं
५७	१०	यथागमः	यथागमम् ।
,,	२४	जयत्परं ।	जयत्यरं ॥
५८	१५	(सु)	(सदा सु)
६१	१०	गुरुभंवन	गुरुभुंवन-
६३	१८	संसुतां	संस्तुतां
६७	७	मवेद्	भवेद्
,,	१५	शास्त्रेऽस्मिन्नादितं	शास्त्रेऽस्मिन् गदितं
६८	१	कनकच्चार संछायं	कनत्काञ्चनसच्छायं
,,	७	श्रीयशःकीर्त्तिरेनः (?)	श्रीयशःकीर्त्तिरेषः ।
७४	१६	यश्यांशदेशेप्सित-	यस्यांसदेशे स्थित-
७६	१५	(जिनदेव)	(नागदेव)
७६	१७	यदामलपद्पद्मं	यदमलपदंपद्म
७७	२५	(जिन ?)	×
८०	८	तस्माचि(न्त्य)तिमिदं	तस्माच्चिन्त्यमिदं
८१	२३	सिद्धाक्षरै····कैः	सिद्धाक्षरैः स्वकैः
८२	५	शिवाभिरामात्र	शिवाभिरामाच्च
८३	१३	विद्याचिणो (?)	विद्याचणो
,,	२१	समस्यलं (?)	समस्त्यलम् ।
८७	१३	परदेव तत्र (?)	परदेवताऽत्र ।
,,	१७	लक्ष्मादिचन्द्रो—	लक्ष्म्यादिचन्द्रो
८७	२३	अद्धाकं	अद्धाङ्कं
८६	१५	मंडलं	मंडलं
,,	,,	वनीसेवति (?)	वनीसेविते

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
६२	७	चित्तेनाचालमेव	चित्तेनाचलमेव
,,	८	निःकाशित	निःकाषित
,,	२२	समाप्ताः	समाप्ता
६६	२	माश्रुलभ्या (?)	माशु लब्ध्वा ।
,,	१७	सर्वे	सर्वैः
१००	१०	चम्पामिती तामिधा (?) ॥६॥	चम्पावतीत्याभिधा ।
,,	१२	वादीन्दुकं ॥७॥	. वादीन्दुकम् ॥६॥*
,,	२४	दर्शज्ञान	दर्शनज्ञान
१०२	१३	वेत्ता	वेत्ता
,,	१७	चारित्र	चरित्र
१०३	११	ग्याटवाभडः	लाटवागड़ः
१०४	१०	सद्दृष्टिवन्तो (वान) त्र	सद्दृष्टिवान्सोऽत्र
,,	२३	अष्टादशतार्थेन	अष्टादशतीर्थाय
१०५	८	श्रीमते (?)	श्रीमत्
,,	,,	मे दुरांमतिः ?)	मेदुरां मतिम्
१०६	५	परमा	परया
१११	१०	गणिः	गणी
११२	८	कल्याभ्युदये	कल्याणाभ्युदये
११३	२०	स्वनादिर्ष्यति	स्वनादीर्ष्यति
१२१	६	विरहति दनिशः (?)	विहरति ह्यनिशं
,,	६	भात	भाति
,,	१७	दुर्जयदाभुयंग	दुर्जनताभुजंग–
,,	१८	कृतानागरः (?)	कृताऽऽननगरः
१२२	१६	तत्तत्वोसारोप	तत्तत्वसारोप

---

* इससे आगे एक अंक कम समझना चाहिए ।

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१२२	२४	गामितं मसंग्निलित् (?)	गामि-संतमससंग्लपित्
१२३	१५	गगणाऽपगाः	गगनाऽऽपगाः
१२४	१२	शुकुन	शकुन
१३५	२१	गृहिता	गृहीता
१३८	२१	सरसलिलवत्	सरःसलिलवत्
१४२	१५	प्रवर्तते (तु ?)	प्रवत (ताम्) ।
१४३	१७	स्वामि विनेयानां	स्वामी विनेयानां
१४५	२२	नरोचनाकातः (?)	लोचनक्रान्तः
१४६	१२	आसाद्यद्यु सदा [?]	आसाद्य द्यु सदां
१४८	१	मुरगोपेता	मुद्गरोपेता
१५६	१७	कृत्वा	कृता
१५८	८	तुच्छतमा (?) अ	(खलु) तुच्छतमेन
१६०	६	शीलनिधि शलोलं (१)	शीलनिधिः सुशीला
१६३	५	घनाथ तारकाः (?)	घनाघनोऽथ तारकाः
१६४	६	वर्णालंकाहारिणी	वर्णालंकारधारिणी
१६५	६	नेमिचचन्द्रं	नेमिचन्द्रं
,,	१६	पटिय दुप्ट (?)	पटिष्ठ-
,,	१८	गमकि	गमक
,,	२२	माधवेनः सूट्वंडात्मक	माधवेन षट्खंडात्मक
१६८	८	पर्याम,	पर्याय-
,,	१४	मलमप्रतिमबोधं	ममलप्रतिमप्रबोधं
१६६	२३	द्वाप्टे	द्वयप्टे
१७०	१६	विशस्य ? दूरीकृतलागुण ?	विज्ञस्यादूरीकृतकलागुण
१७१	२२	गुरुणामवदेशो (?) न	गुरूणामुपदेशेन

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१७२	१२	आर्यवे (?) सुरसप्रिये।	आर्यवर्षे सुरप्रिये
१७३	२४	विदुषो	विज्ञो यो
१७६	१३	शक्रे	शुक्रे
१७७	६	जयात्युच्चकैः (?)	जयत्युच्चकैः
१७६	१४	जिनभूतिराम्यं (?)	जिनभूतिरम्यं
१८०	२२	देवेन्द्रस्त्वद्यशः पेतुः करैः	देवेन्द्रास्त्वद्यशः पेतुः करे
,,	,,	धृत्वास्ववकीम् (?)	धृत्वा स्ववल्लकीम्।
,,	२३	ते	तं
१८१	५	विदो मथत् (?)	विदोऽभवन्।
१८५	२४	यत्करणौ	यत्कर्णौ
१८७	७	निर्लोडितान्यगम-	निर्लोडितान्यागमं
१८८	,,	महरिणो	महरिसिणो
१८८	११	करणाए	करणाए
१८६	१२	तावेत्थो महीफलंमि विदिट्ठ	तावत्थेय महीयलम्मि विदिढं
,,	१५	णयरणए (?)	णयरणाहे
१६२	१३	नामिऊण	नमिऊण
,,	१४	सव्वन्नं	सव्वरणुं
१६६	११	नवासीत्युत्तरे	नवाशीत्युत्तरे
१६८	८	विऽद्वेष	विद्वेष
२१८	१२	सद्ग्वाक्य—	सद्गुरुवाक्य—

२२४ १५-१६ श्लोक नं० १६ दुवारा छप गया है। अतः उसे निकाल कर आगे के श्लोक नम्बर सुधार लेवें।

जैनग्रन्थ-प्रशस्तिसंग्रह

(आद्यन्तादिभागसंचयात्मक)

—*०:*:०*—

१. न्यायविनिश्चय-विवरणम् (वादिराजसूरिः)

आदिभाग :—

श्रीमज्ज्ञानमयो दयोन्नतपदव्यक्तोऽविविक्तं जगत्
कुर्वन्सर्वतनूमदीत्त्गणसम्वैर्विश्वं वचोरश्मिभिः ।
व्यातन्वन्भुवि भव्यलोकनलिनीषंडेष्वखंडश्रियं
श्रेयः शाश्वतमातनोतु भवतां देवो जिनोऽर्हपतिः ॥१॥

विस्तीर्ण-दुर्नयमय-प्रबलान्धकार-दुर्बोध-तत्त्वमिह वस्तुहितावबद्धं ।
व्यक्तीकृतं भवतु नः सुचिरं समंतात् सामंतभद्रवचनस्फुटरत्नदीपैः ॥२॥

गूढमर्थमकलंकवाङ्मयागाधभूमिनिहितं तदर्थिनाम् ।
व्यञ्जयत्यमलमनन्तवीर्यवाक् दीपवर्तिरनिशं पदे पदे ॥३॥

यत्सूक्तसारसलिलस्नपनेन संतश्चेतो मलं सकलमाशु विशोधयन्ति ।
लंघ्यन्न यत्पदमतीवगभीरमन्यैस्ते मां पुनस्तु(न्तु)मतिसागरतीर्थमुख्याः ॥४

प्रणिपत्य स्थिरभक्त्या गुरून्परानप्युदारबुद्धिगुणान् ।
न्यायविनिश्चय-विवरणमभिरमणीयं मया क्रियते ॥५॥

विद्यासागरपारगैर्विरचितास्संत्येव मार्गाः परे
ते गंभीर-पद-प्रयोग-विषया गम्याः परं तादृशैः ।
बालानां तु मया सुखोचितपदन्यासक्रमश्चिन्त्यते
मार्गोऽयं सुकुमारवृत्तिकतया लीलाऽऽगमाऽन्वेषिणाम् ॥६॥

अभ्यस्त एव बहुशोऽपि मयैव पन्था जानामि निर्गममनेकमनन्यदृश्यं ।
तन्मार्गमिह्वादरवशेन कृतप्रचारं के नामदूषणशरैः परिपन्थयन्ति ॥७॥

अथवा येषामस्ति गुणेषु मत्सृहमतिर्ये वस्तुसारं विदुः
तेषामत्र मनः प्रविष्टमसकृत्तुष्टिं परां गच्छति ।
ये वस्तु-व्यवसाय-शून्य-मनसो दोषाभिदित्सा पराः
क्लिश्नंतोऽपि हिते न दोषकणिकामप्यत्र वक्तुं क्षमाः ॥८॥

अपि च—

यस्य हृद्यमलमस्ति लोचनं वस्तुवेदि सुजनस्स मद्यति ।
मत्सरेण परिमद्यते परो विद्यया तु परया न मद्यते ॥९॥

तदास्तां प्रस्तुतमुच्यते—

जयति सकल-विद्या-देवतारत्नपीठं हृदयमनुपलेपं यस्य दीर्घं स देवः ।
जयति तदनु शास्त्रं तस्य यत्सर्वमिथ्यासमय-तिमिरघाति-ज्योतिरेकं नराणाम् १०

अन्तभाग :—

श्रीमन्न्यायविनिश्चयस्तनुभृतां चेतोदृगुर्वीनलः
सन्मार्गं प्रतिबोधयन्नपि च तान्निःश्रेयसप्रापणं ।
येनाऽयं जगदेकवत्सलधिया लोकोत्तरं निर्मितो
देवस्तार्किक-लोकमस्तकमणिर्भूयात्स वः श्रेयसे ॥१॥

विद्यानंदमनन्तवीर्यसुखदं श्रीपूज्यपादं दया-
पालं सन्मतिसागरं कनकसेनाराध्यमभ्युद्यमी ।
शुद्ध्यन्नीतिनरेन्द्रसेनमकलंकं वादिराजं सदा
श्रीमत्स्वामिसमन्तभद्रमतुलं वंदे जिनेन्द्रं मुदा ॥२॥

भूयोभेदनयावगाहगहनं देवस्य यद्वाङ्मयं
कस्तद्विस्तरतो विविच्य वदितुं मंदः प्रभुर्मादृशः ।
स्थूलः क्वापि नयस्तदुक्तिविषयो व्यक्तीकृतोऽयं मया
स्थेयाच्चेतसि धीमतां मतिमल-प्रक्षालनैकक्षमः ॥३॥

व्याख्यानरत्नमालेयं प्रस्फुरन्नयदीधितिः ।
क्रियतां हृदि विद्वद्भिस्तुदंती मानसं तमः ॥४॥

श्रीमत्सिंहमहीपतेः परिषदि प्रख्यातवादोन्नति–
स्तर्कन्यायतमोपहोदयगिरिः सारस्वतः श्रीनिधिः ।
शिष्यः श्रीमतिसागरस्य विदुषां पत्युस्तपःश्रीभृतां
भर्तुः सिंहपुरेश्वरो विजयते स्याद्वादविद्यापतिः ॥५॥

इत्याचार्यवर्य-स्याद्वादविद्यापति-विरचितायां न्यायविनिश्चय-तात्पर्यावद्योतिन्यां व्याख्यानरत्नमालायां तृतीयः प्रस्तावः समाप्तः। समाप्तं च शास्त्रं।

२. धर्मरत्नाकर (जयसेनसूरि)

आदिभाग :—

लक्ष्मीं निरस्तनिखिलापदमाप्नुवन्तो लोकप्रकाशरवयः प्रभवन्ति भव्याः ।
यत्कीर्तिकीर्त्तनपरा जिनवर्धमानं तं नौमि कोविदनुतं सुधिया सुधर्मम् ॥१॥

अन्तभाग :—

यस्या नैवोपमानं किमपि हि सकलद्योतकेषु प्रतर्क्य–
मंत्येनैकेन नित्यं श्लथयति सकलं वस्तुतत्वं विवर्द्ध्यं ।
अन्येनान्त्येन नीतिं जिनपतिमहितां संविकर्षत्यजस्रं,
गोपी मंथानवद्या जगति विजयतां सा सखी मुक्तिलक्ष्म्याः ॥६६॥

इति श्रीसूरिश्रीजयसेन-विरचिते धर्मरत्नाकरे उक्ताऽनुक्त-शेषविशेष-सूचको विंशतितमोऽवसरः ॥

श्रीवर्धमाननाथस्य मेदार्यो दशमोऽजनि ।
गणभृद्दशधा धर्मो यो मूर्तो वा व्यवस्थितः ॥१॥

मेदार्येण महर्षिभिर्विहरता तेपे तपो दुश्चरं

श्रीखंडिल्लकपत्तनान्तिकरणाभ्यर्द्धिप्रभावात्तदा ।
शाट्येनाप्युपतमृता सुरतरुप्रख्यां जनानां श्रियं
तेनागीयत झाडवागड इति त्वेको हि संघोऽनघः ॥२॥
धर्मज्योत्स्नां विकिरति सदा यत्र लक्ष्मी-निवासाः
प्रापुश्चित्रं सकलकुमुदायत्युपेता विकाशम् ।
श्रीमान्सोभून्मुनिजननुतो धर्मसेनो गणींद्र-
स्तस्मिन् रत्नत्रितयसदनीभूतयोगीन्द्रवंशे ॥३॥
भंजन्वादीन्द्रमानं पुरि पुरि नितरां प्राप्नुवन्नुच्चमानं
तन्वन् शास्त्रार्थदानं रुचि रुचि रुचिरं सर्वथा निर्निदानं ।
विद्यादर्शोपमानं दिशि दिशि विकिरन स्वं यशो योऽसमानं
तेभ्यः श्री(तस्माच्छ्री) शांतिषेणः समजनि सुगुरुः पापधूली-समीरः ॥४॥
यत्रास्पदं विदधती परमागमश्रीरात्मन्यमन्यत्मतीत्वमिदं तु चित्रम् ।
वृद्धा च संततमनेकजनोपभोग्या श्रीगोपसेनगुरुराविरभूत्स तस्मात् ॥५॥
उत्पत्तिस्तपसां पदं च यशसामन्यो रविस्तेजसा-
मादिः सद्वचसां विधिः सुतरसामासीन्निधिः श्रेयसां ।
आवासो गुणिनां पिता च शमिनां माता च धर्मात्मनां
न ज्ञातः कलिना जगत्सुबलिना श्रीभावसेनस्ततः ॥६॥
ततो जातः शिष्यः सकलजनतानंदजननः(कः)
प्रसिद्धः साधूनां जगति जयसेनाख्य इह सः ।
इदं चक्रे शास्त्रं जिनसमय-सारार्थ-निचितं
हितार्थं जंतूनां स्वमतिविभवाद्गर्व-विकलः ॥७॥
यावद्द्योतयतः सुधाकररवी विश्वं निजांशूत्करै-
र्यावल्लोकमिमं बिभर्ति धरणी यावच्च मेरुः स्थिरः ।
रत्नांशुच्छुरितोत्तरंगपयसो यावत्पयोराशय—
स्तावच्छास्त्रमिदं महर्षिनिवहैः स्तात्पाठ्यमानं श्रिये ॥८॥
इति श्रीसूरिजयसेनविरचितं धर्मरत्नाकरनामशास्त्रं समाप्तम् ।

३. यशोधरचरित्र (पद्मनाभ कायस्थ)

आदिभाग :—

परमानन्दजननीं भवसागरतारिणीं ।
सतां हि तनुतां ज्ञानलक्ष्मीं **चन्द्रप्रभः** प्रभुः ॥१॥

अन्तभाग :—

उपदेशेन ग्रंथोऽयं **गुणकीर्ति**महामुनेः ।
कायस्थ-**पद्मनाभेन** रचितः पूर्वसूत्रतः ॥१०७॥
संतोष-जैसवालेन संतुष्टेन प्रमोदिना ।
अतिश्लाघितो ग्रंथोऽयमर्थसंग्रहकारिणा ॥१०८॥
साधोर्विजयसिंहस्य जैसवालान्वयस्य च
सुतेन **पृथ्विराजेन** ग्रंथोयमनुमोदितः ॥१०९॥

इति श्रीयशोधरचरित्रे दयासुन्दराभिधाने महाकाव्ये साधुश्रीकुशराज-कारापिते कायस्थ-श्रीपद्मनाभ-विरचिते अभयरुचिप्रभृतिसर्वेषां स्वर्गगमनं (स्वर्गगमनवर्णनो नाम) नवमः सर्गः ।

जातः श्री**वीरसिंहः** सकलरिपुकुलव्रातनिर्घातपातो
वंशे श्री**तोमराणां** निजविमलयशोव्याप्तदिक्चक्रवालः ।
दानैर्मानैर्विवेकैर्न भवति समता येन साकं नृपाणां
केषामेषा कवीनां प्रभवति धिषणा वर्णने तद्गुणानां ॥१॥
ईश्वरचूडारत्नं विनिहतकरघातवृत्तसंहातः
चन्द्र इव दुग्धसिंधोस्तस्माद्**उद्धरण**भूपतिर्जनितः ॥२॥
यस्य हि नृपतेः यशसा सहसा शुभ्रीकृतत्रिभुवनेऽस्मिन् ।
कैलाशति गिरिनिकरः क्षीरति नीरं शुचीयते तिमिरं ॥३॥
तत्पुत्रो **वीरमेन्द्रः** सकलवसुमतीपालचूडामणिर्यः
प्रख्यातः सर्वलोके सकलबुधकलानंदकारी विशेषात् ।
तस्मिन् भूपालरत्ने निखिलनिधिगृहे **गोपदुर्गे** प्रसिद्धिं
भुंजाने प्राज्यराज्यं विगतरिपुभयं सुप्रजःसेव्यमानं ॥४॥

वंशेऽभूज्जैसवाले विमलगुणनिधिर्भूलणः साधुरत्नं
साधुश्रीजैनपालोभवदुदितयास्तत्सुतो दानशीलः ।
जैनेन्द्राराधनेषु प्रमुदितहृदयः सेवकः सद्गुरूणां
लोणाख्या सत्यशीलाऽजनि विमलमतिर्जैनपालस्य भार्या ॥५॥
जाताः षट् तनयास्तयोः सुकृतिनोः श्रीहंसराजोभवत्
तेषामाद्यतमस्ततस्तदनुजः सैराजनामाऽजनि ।
रैराजो भवराजकः समजनि प्रख्यातकीर्तिर्महा-
साधुश्रीकुशराजकस्तदनु च श्रीक्षेमराजो लघुः ॥६॥
जातः श्रीकुशराज एव सकलक्ष्मापालचूडामणेः
श्रीमत्तोमर-वीरमस्य विदितो विश्वासपात्रं महान् ।
मंत्री मंत्रविचक्षणः क्षणमयः क्षीणारिपक्षः क्षणात्
क्षोणीमीक्षणरक्षणक्षम[म]तिर्जैनेन्द्रपूजारतः ॥७॥
स्वर्गस्पर्द्धिसमृद्धिकोतिविमलश्चैत्यालयः कारितो
लोकानां हृदयंगमो बहुधनैश्चन्द्रप्रभस्य प्रभोः ।
येनैतत्समकालमेवरुचिरं भव्यं च काव्यं तथा
साधुश्रीकुशराजकेन सुधिया कीर्तेश्चिरस्थापकं ॥८॥
तिस्रस्तस्यैव भार्या गुणचरितयुतस्तासु रल्होभिधाना
पत्नी धन्या चरित्रा व्रतनियमयुता शीलशौचेन युक्ता ।
दात्री देवार्चनाढ्या गृहकृतिकुशला तत्सुतः कामरूपो
दाता कल्याणसिंहो जिनगुरुचरणाराधने तत्परोऽभूत ॥६॥
लक्षणश्रीः द्वितीयाभूत्सुशीला च पतिव्रता
कौशीरा च तृतीयेयमभूद्गुणवती सती ॥१०॥
शांतिर्देशस्य भूयात्तदनु नरपतेः सुप्रजानां जनानां
वक्तॄणां वाचकानां तथैव (?) ॥११॥
यावत्कूर्मस्य पृष्ठे भुजगपतिरयं तत्र तिष्ठेद्गरिष्ठे
यावत्तत्रापि चंचद्विकटफणिफणामंडले क्षोणिरेषा ।

यावत्क्षोणौ समस्तत्रिदशपतिवृतश्चारुचामीकराद्रि-
स्तावद्भव्यं विशुद्धं जगति विजयतां काव्यमेतच्चिराय ॥१२॥
कायस्थ-पद्मनाभेन बुधपादाब्जरेणुना ।
कृतिरेषा विजयतां स्थेयादाचन्द्रतारकं ॥१३॥
[इति श्रीपद्मनाभ-कायस्थ-विरचितं यशोधरचरित्रं समाप्तम्]

यशोधरचरित्र (वासवसेन मुनि)

आदिभाग :—

जितात्मतीन् जिनान्नत्वा सिद्धान् सिद्धार्थसंपदः ।
सूरीनाचारसंपन्नानुपाध्यायांस्तथा यतीन् ॥१॥
जनन्या समवेतस्य **यशोधर**-महीभुजः ।
चरितं पावनं वक्ष्ये यथाशक्ति यथागमं ॥२॥
सर्वशास्त्रविदां मान्यैः सर्वशास्त्रविशारदैः ।
प्रभंजनादिभिः पूर्वं हरिषेण-समन्वितैः ॥३॥
यदुक्तं तत्कथं शक्यं मया बालेन भाषितुं ।
तथापि तत्क्रमांभोज-प्रणामार्जित-पुण्यतः ॥४॥
प्रोच्यमानं समासेन संसारासातशातनं ।
वदतां शृण्वतां यच्च तत्संतः शृणुतादरात् ॥५॥

अन्तभाग :—

मारिदत्तादयश्चान्ये आर्यासंघं तथैव च ।
सौधर्मादिकग्रैवेयपर्यंतं नाकमाश्रिताः ॥१८७॥
[1]"कृति**र्वासवसेनस्य वागडान्वय**जन्मनः ।

---

१ यह प्रशस्ति-पद्य जैनसिद्धान्तभवन आराकी सं० १७३२ वाली एक प्रतिमें नहीं है किन्तु दूसरी सं० १५८१ की लिखी हुई उस प्रतिमें पाया जाता है जो रामसेनान्वयी भ० श्रीरत्नकीर्तिके प्रपट्टधर और भ० लखमसेन के पट्टधर भ० धर्मसेनके समयमें लिखी गई है ।

इमां याशोधराभिख्यां संशोध्याधीयतां बुधैः ॥१००॥"

इति यशोधरचरिते मुनिवासवसेनकृते काव्ये अभयरुचिभट्टारक-अभयमत्योः स्वर्गगमनो चंडमारी-धर्मलाभो यशोमत्यादयोन्ये यथायथं नार्कनिवासिनो नाम अष्टमः सर्गः समाप्तः ।

नेमिनिर्वाणकाव्य (कविवाग्भट)

आदिभाग :—

श्रीनाभिसूनोः पदपद्मयुग्मनखाः सुखानि प्रथयंतु ते वः ।
समन्नमन्नाकि-शिरःकिरीट-संघट्ट-विस्रस्तमणीयितं यैः ॥१॥

अन्तभाग :—

[1]भिल्लो विध्यनगे वणिग्वरगुणश्चेभ्यादिकेतुः सुरः ।
चिंतायाति खगे महेन्द्रसुमना भूपोऽपराद्जितः ।
सोऽव्यादच्युतनायको नरपतिः स्वादिप्रतिष्ठोऽप्यह-
मिन्द्रो यश्च जयंतके सुरवरो नेमीश्वरः पातु वः ॥८६॥
अहिछत्रपुरोत्पन्न-प्राग्वाट-कुलशालिनः ।
छाहडस्य सुतश्चक्रे प्रबन्धं वाग्भटः कविः ॥८७॥

इति श्रीनेमिनिर्वाणे महाकाव्ये महाकविश्रीवाग्भटविरचिते नेमिनिर्वाणाभिधानो नाम पंचदशमः सर्गः समाप्तः ।

६. भूपाल-चतुर्विंशति-टीका (पं० आशाधर)

आदिभाग :—

प्रणम्य जिनमज्ञानां सज्ञानाय प्रचक्षते ।
आशाधरो जिनस्तोत्रं श्रीभूपालकवेः कृतिः ॥१॥

१ ये अन्तके दोनों पद्य निर्णयसागर बम्बई से प्रकाशित हुए ग्रन्थमें नहीं है किन्तु आरा सि० भवन तथा देहलीकी प्रतियोंमें पाये जाते हैं ।

अन्तभाग :—

उपशमइव मूर्तिः पूतकीर्तिः स तस्मा-
दजनि विज(न)यचंद्रः सच्चकोरैकचंद्रः ।
जगदमृतसगर्भाः शास्त्रसंदर्भगर्भाः
शुचिचरितसहिष्णोर्यस्य धिन्वंति वाचः ॥२६॥

विनयचन्द्रस्यार्थमित्याशाधरविरचिता भूपालचतुर्विंशतिजिनेन्द्रस्तुतेष्टीका परिसमाप्ता । [जयपुर प्रति

७. जम्बूस्वामिचरित्र (ब्र० जिनदास)

आदिभाग :—

श्रीवर्धमानतीर्थेशं वंदे मुक्तिवधूवरम् ।
कारुण्यजलधिं देवं देवाधिप-नमस्कृतम् ॥१॥

अन्तभाग :—

श्रीकुंदकुंदान्वयमौलिरत्नं श्रीपद्मनंदी विदितः पृथिव्याम् ।
सरस्वतीगच्छ विभूषणं च बभूव भव्यालिसरोजहंसः ॥२३॥
ततोभवत्तस्य जगत्प्रसिद्धे पट्टे मनोज्ञे सकलादिकीर्तिः ।
महाकविः शुद्धचरित्रधारी निर्ग्रंथराजा जगति प्रतापी ॥२४॥

जयति सकलकीर्त्तिः पट्टपंकेजभानु-
र्जगति भुवनकीर्तिर्विश्वविख्यातकीर्तिः ।
बहुयतिजनयुक्तः सर्वसावद्यमुक्तः
कुसुमशरविजेता भव्यसन्मार्गनेता ॥२५॥
विबुधजननिषेव्यः सत्कृतानेककाव्यः
परमगुणनिवासः सद्व्रतालीविलासः ।
विजितकरणमारः प्राप्तसंसारपारः
स भवतु गतदोषः शर्मणे वः सतोषः ॥२६॥

षष्ठाष्टमादेस्तपसो विधाता, क्षमाभिधः श्रीनिलयं धरित्र्याम् ।
जीयाज्जितानेकपरीषहारिः, संबोधयन् भव्यगणं चिरं सः ॥२७॥
भ्रातास्ति तस्य प्रथितः पृथिव्यां, सद्ब्रह्मचारी **जिनदास**नामा ।
तनेति तेने चरितं पवित्रं, **जंब्वादिनाम्नो** मुनिसत्तमस्य ॥२८॥
देशे विदेशे सततं विहारं, वितन्वता येन कृताः सुलोकाः ।
विशुद्धसर्वज्ञ मत-प्रवीणाः, परोपकारव्रततत्परेण ॥२९॥
स ब्रह्मचारी किल **धर्मदास**स्तस्यास्तिशिष्यः कविबद्धसख्यः ।
सौजन्यवल्लीजलदः कृतोयं, तद्योगतो व्याकरणप्रवीणः ॥३०॥
कवि**र्महादेव** इति प्रसिद्धस्तन्मित्रमास्ते द्विजवंशरत्नम् ।
महीतले नूनमसौकृत(ति)श्च साहाय्यतस्तस्य सुधर्महेतोः ॥३१॥
ग्रंथः कृतोऽयं जिननाथभक्त्या गुणानुरागाच्च महामुनीनाम् ।
पूजाभिधानाद्रहितेन नित्यं(नूनं)महाप्रशस्तः परमार्थबुद्ध्या ॥३२॥

× × × ×

एकविंशतिप्रमाणानि शतानि च चरित्रकं ।
त्रिंशद्युक्तानि श्लोकानां शुभानां संति निश्चितम् ॥३७॥

इति श्रीजम्बूस्वामिचरित्रे भ० सकलकीर्तिशिष्य-ब्रह्मजिनदास-विरचिते विद्युच्चर-महामुनि-सर्वार्थसिद्धिगमनो नामैकादशमः सर्गः ॥११॥

८. सुदर्शनचरित्र (विद्यानंदी मुमुक्षु)

आदिभाग:—

ज्ञानरत्नाब्धितारेशं सर्वविद्याधिपं प्रभुं ।
आदिदेवं नमस्यामि भव्यराजीवभास्करं ॥१॥
चंद्रप्रभोः द्युतिः पायात्सतामंतःप्रकाशिनी ।
नित्यं करोति चंद्रस्य न कृष्णे साततोधिका ॥२॥
कर्मारातिजये शूरं वंदे **शांतिं** शिवश्रिये ।
संसारवनदावाग्नौ पतज्जीवेषु तायिनं ॥३॥

स्मरादीनां विजेतारं तं **वीरं** प्रणमाम्यहं ।
ज्ञानलक्ष्म्या हि भर्त्तारं निःप्रत्यूहं च शंकरं ॥४॥
शत्रूणां ये विजेतारश्चाभ्यंतरनिवर्त्तिनां ।
प्रणमामि **जिनान् शेषान्** सर्वपापपनुत्तये ॥५॥
सुदर्शनमुनिं वंदे धीरं सद्ब्रह्मचारिणं ।
येन कर्मारिमाहत्य प्राप्तं सिद्धत्वमद्भुतं ॥६॥
तनुतां गुरवः सर्वे पूज्या मे शर्मसंपदम् ।
सर्वविघ्नहरा वंद्यास्तुल्याः सुरनराधिपैः ॥७॥
जिनराजमुखोत्पन्नां विमलां ज्ञानसंपदम् ।
दायिनीं **शारदां** स्तोष्ये मुहुरज्ञानहानये ॥८॥
मोहांधकारतरणिं तपस्तेजोऽनुसारिणं ।
गणेशं **गौतमं** वंदे संयतं जगदुत्तमं ॥९॥
कवित्व-नलिनीग्राम-निबोधन-सुधाघृणिं ।
वंद्यैर्वंद्यमहं वंदे **कुंदकुंदाभिधं** मुनिं ॥१०॥
यस्य यशोरवेर्नष्टा कृष्णास्या बौद्धकौशिकाः ।
स्तुव्येऽकलंकसूरिं तं मोह-सारंग-कन्धरम् ॥११॥
क्रोधसारंगकीलालं **जिनसेन**महाकविं ।
कुवादिहंससारंगं वंदेऽहं तद्गुणाप्तये ॥१२॥
आवश्यकलता-कन्द-प्रसारण-घनागमं ।
रत्नकीर्तिमहं भक्त्या स्तौमि गच्छाधिपं विभुं ॥१३॥
परवादि-महाकव्याद्वारणे लक्ष्मणाग्रजं ।
वागर्थमिह वंदेऽहं **प्रभेन्दुं** सूरिसत्तमं ॥१४॥
क्षमा-सर्वस्व-धरणिं बोधबीजस्य भूमिकां ।
मुनीन्द्रं गतसन्देहं **पद्मनन्दिं** स्तुवेऽनिशम् ॥१५॥
जीवाजीवादितत्त्वानां देशकं च गुणार्णवं ।
देवेन्द्रकीर्तिं भक्त्याऽहं मुनिं नौमि मुनीश्वरम् ॥१६॥

विद्यानन्दि-मुनीन्द्रेण तस्य शिष्येण धीमता ।
स्वस्यान्यस्योपकाराय दिने जातु मनोहरं ॥१७॥
चिन्तितं मानसे श्रेयो यतिना तत्कथं भवेत् ।
शुभोपदेशतोऽस्माकं पुनस्तस्य च योगतः ॥१८॥ (युग्मं)
येन श्रुतेन भव्यानामघं याति भवार्जितं ।
सुदर्शनमुनेर्वृत्तं वक्ष्येऽहं तत्समासतः ॥१९॥

अन्तभाग :—

योगत्रयेषु निष्णातः विशालकीर्तिशुद्धधीः ।
श्रीकुंदकुंदसंताने बभूव मुनिसत्तमः ॥९८॥
तत्पट्टेऽजनि विख्यातः पंचाचारपवित्रधीः ।
शुभकीर्तिमुनिश्रेष्ठः शुभकीर्तिः शुभप्रदः ॥९९॥
धर्मचन्द्रस्ततो रत्नकीर्तिः शुद्धवचोनिधिः ।
प्रभेन्दुः पद्मनन्दिश्च ख्यातः कामाहिमर्द्दनः ॥१००॥
भारतीगच्छपंकेज-विकाशन-दिवाकरः ।
देवेन्द्रनामकीर्त्त्यंते कीर्त्यंते लोकविश्रुतः ॥१०१॥
विद्यानन्दिमुनिख्यातस्तस्य शिष्यो गुणाग्रणीः ।
सुदर्शनस्य तेनेदं चरितं शर्मणे कृतं ॥१०२॥
तनुतां साधवः सर्वे चतुःसंघसमुद्भवाः ।
मया कृति(त)मिदं शोध्यं लोके तैर्विशदाशयैः ॥१०३॥
ये लेखयंति लिखते पठंति पाठयंति च ।
सुदर्शनमुनेरेष चरित्रं ते सुखाश्नुते ॥१०४॥
यदक्षरस्वरैर्मात्राहीनं प्रमादतो इह ।
तं शोध्यं शुद्धचरितैः मुनिभिः मे कृतं तथा ॥१०५॥
गान्धारपुर्यां जिननाथचैत्ये छत्रध्वजाभूषितरम्यदेशे ।
कृतं चरित्रं स्वपरोपकारकृते पवित्रं हि सुदर्शनस्य ॥१०६॥

नित्यं नमामि तमहं जिनपार्श्वनाथं पद्मावती-धरणयक्ष-नुतं त्रिकालं ।
येनाखिलं निरसितं किलकर्मजालं नालं क्षमो रचयितं स्तवनं तदीयं ॥१०७॥

जिनान्तिमं नागनरेंद्रवंद्यं, श्रीवर्द्धमानं गतरागबंधं ।
अंतातिगं सर्वगुणांबुराशिं, वंदे भवाब्ध्युत्तरणैकहेतोः ॥१०८॥

पंचैते परमेष्ठिनः सुखकराः कारुण्यपूर्णाशयाः,
सार्द्धं श्रीजिनधर्म आगमयुतः सद्धव्यराशिस्तुतः ।
चैत्यं श्रीजिननायकस्य सततं चैत्यालयं मेस्य(?) वै,
शश्वन्मे शरणं भवाब्धितरणं भूयाद्भवापन्नुदे ॥१०९॥

इति श्रीसुदर्शनचरित्रे पंचनमस्कारमाहात्म्यप्रदर्शके मुमुक्षुश्रीविद्यानन्दि-विरचिते सुदर्शनमहामुनिमुक्तिगमनो नाम द्वादशमः परिच्छेदः समाप्तः । संवत् १७७६ वर्षे शुभं भव । [दिल्ली, धर्मपुरा, नयामन्दिर ।

६. सुदर्शनचरित्र (मुमुक्षु विद्यानन्दी)

आदिभाग :—

नत्वा पंचगुरून् भक्त्या पंचमं गतिनायकान् ।
सुदर्शनमुनेश्चारुचरित्रं रचयाम्यहं ॥ १ ॥
येषां स्मरणमात्रेण सर्वे विघ्ना घना यथा ।
वायुना प्रलयं यांति तान्स्तुवे परमेष्ठिनः ॥२॥

(इसके बाद वृषभादि चतुर्विंशतितीर्थंकरों तथा सिद्धोंका स्मरण है)

जिनेन्द्र-वदनांभोज-समुत्पन्नां सरस्वतीं ।
संस्तुवे त्रिजगन्मान्यां सन्मतेव सुखप्रदां ॥१८॥
यस्याः प्रसादतो नित्यं सतां बुद्धिः प्रसर्पति ।
प्रभाते पद्मनीवोच्चैस्तां स्तुवे जिनभारतीं ॥१९॥
नमामि गुणरत्नानामाकरान्-श्रुतसागरान् ।
गौतमादिगणाधीशान् संसाराम्भोधितारकान् ॥२०॥

कवित्वनलिनी-ग्राम-प्रबोधन-दिवामणिं ।
कुंदकुंदाभिधं नौमि मुनीन्द्रं महिमास्पदं ॥२१॥
जिनोक्त-सप्ततत्त्वार्थसूत्रकर्ता कवीश्वरः ।
उमास्वातिमुनिर्नित्यं कुर्यान्मे ज्ञानसंपदां ॥२२॥
स्वामी **समन्तभद्राख्यो** मिथ्यातिमिरभास्करः ।
भव्यपद्मौघसंस्कर्ता जीयान्मे(न्मो) भावितीर्थकृत् ॥२३॥
विप्रवंशाऽग्रणीः सूरिः पवित्रः **पात्रकेशरी** ।
संर्जायाज्जिनपादाब्जसेवनैकमधुव्रतः ॥२४॥
यस्य वाक्किरणैर्नष्टा बौद्धौघाः कौशिका यथा ।
भास्करस्योदये स स्यादकलङ्कः श्रिये कविः ॥२५॥
श्रीजिनेन्द्र-मतांभोधि-वर्द्धनैकविधूत्तमं ।
जिनसेनं जगद्वंद्यं संस्तुवे मुनिनायकं ॥२६॥
मूलसंघाग्रणीर्नित्यं **रत्नकीर्तिगुरुर्महान्** ।
रत्नत्रय-पवित्रात्मा पायान्मां चरणाश्रितं ॥२७॥
कुवादिमत्तमातंग-विमदीकरणे हरिः ।
गुणभद्रो गुरुर्जीयात्कवित्वकरणे प्रभुः ॥२८॥
भट्टारको जगत्पूज्यः **प्रभाचन्द्रो** गुणाकरः ।
वंद्यते स मया नित्यं भव्यराजीवभास्करः ॥२६॥
जीवाजीवादितत्त्वानां समुद्योतदिवाकरं ।
वंदे **देवेन्द्रकीर्तिं** च सूरिवर्यं दयानिधिं ॥३०॥
मद्गुरुर्योविशेषेण दीक्षालक्ष्मीप्रसादकृत् ।
तमहं भक्तितो वंदे **विद्यानन्दी** सुसेवकः ॥३१॥
सूरिराशाधरो जीयात् सम्यग्दृष्टिशिरोमणिः ।
श्रीजिनेन्द्रोक्त-सद्धर्म-पद्माकर-दिवामणिः ॥३२॥
इत्याप्त-भारती-साधु-संस्तुतिं शर्मदायिनीं ।
मंगलाय विधायोच्चैः सच्चरित्रं सतां ब्रुवे ॥३३॥

तुच्छमेधोऽपि संक्षेपात् सुदर्शनमहामुनेः ।
वृत्तं विधाय पूतोस्मि सुधा-स्पर्शोपि शर्मणे ॥३४॥

इति श्रीसुदर्शनचरिते पंचनमस्कारमाहात्म्यप्रदर्शके मुमुक्षुश्रीविद्यानंदि-विरचिते श्रीमहावीरतीर्थंकरपरमदेवसमागमाख्यवर्णनो नाम प्रथमोधिकारः !

अन्तभाग :—

गांधारपुर्यां जिननाथगेहे छत्रध्वजाद्यैः परिशोभितेऽत्र ।
कृतं चरित्रं स्वपरोपकार-कृते पवित्रं हि सुदर्शनस्य ॥४२॥
श्रीमूलसंघे वरभारतीये गच्छे बलात्कारगणेऽतिरम्ये ।
श्रीकुंदकुंदाख्यमुनीन्द्रवंशे जातः **प्रभाचन्द्र**-महामुनीन्द्रः ॥४७
पट्टे तदीये मुनि**पद्मनंदी** भट्टारको भव्यसरोजभानुः ।
जातो जगत्त्रयहितो गुणरत्नसिंधुः कुर्यात्सतां सारसुखं यतीशः ॥४८॥
तत्पट्टपद्माकरभास्करोऽत्र **देवेन्द्रकीर्ति**र्मुनिचक्रवर्ती ।
तत्पादपंकेजसुभक्तियुक्तो **विद्यादिनंदी** चरितं चकार ॥४६॥
तत्पट्टे जिन**मल्लिभूषण**गुरुश्चारित्रचूडामणिः
संसाराम्बुधितारणैकचतुरश्चिन्तामणिः प्राणिनां ।
सूरिश्री**श्रुतसागरो** गुणनिधिः श्री**सिंहनन्दी** गुरुः ।
सर्वे ते यतिसत्तमाः शुभतरा कुर्वन्तु वो मंगलं ॥५०॥
गुरुणामुपदेशेन सच्चरित्रमिदं शुभं ।
नेमिदत्तो व्रती भक्त्या भावयामास शर्मदं ॥५१॥

इति श्रीसुदर्शनचरिते पंचनमस्कारमाहात्म्यप्रदर्शके ब्रह्मश्रीनेमिदत्त-विरचिते······एकदशमोधिकारः । [जयपुर प्रति

नोट—१०वीं संधितक ग्रन्थकारका नाम मुमुक्षुविद्यानन्दी ही दिया है और इस ग्यारहवें अधिकारके उक्त श्लोक नं० ४६में भी इसे विद्यानंदि-कृत सूचित किया है; परन्तु इस अन्तिम संधिमें ब्रह्मनेमिदत्तका नाम दिया है, जो चिन्तनीय है। क्या ५१वें पद्यानुसार ब्र०नेमिदत्तके द्वारा

इस ग्रन्थके भावित ('भावयामास') होनेसे ही यह नाम बादको दिया गया है ? विद्यानंदिके नामका दूसरा भी यशोधरचरित है जिसकी प्रशस्ति इससे पहले नं० ८ पर दी गई है। दोनोंमें विद्यानन्दीको गुरुपरम्परा एक है और पद्योंका कितना ही साम्य है। फिर भी दोनोंको रचनापरसे सर्वथा एक नहीं कहा जा सकता।

१०. श्रीपालचरित्र (श्रुतसागर)

आदिभाग :—

अर्हतः संस्तुवे सिद्धान् वंदे निर्ग्रंथनायकान् ।
श्रयामि पाठकान् सेवे साधूनाराधये मुदा ॥१॥
सिद्धान् जगच्छिरोरत्नप्रायान् वंदामहे सदा ।
त्रिशुद्धयैषां यदाऽध्येति मानवः श्लाघ्यते तदा ॥२॥
संसारसरितानाथ-समुत्तरण-कारणम् ।
जिनं नत्वा ब्रुवे वृत्तं श्रीपालनृपतेः शुभम् ॥३॥

(मध्यका कथाभाग गद्यात्मक है)

अन्तभाग :—

सिद्धचक्रव्रतात्सोऽयमीदृशाऽभ्युदयो बभौ ।
निःश्रेयसमितोऽस्मभ्यं ददातु स्वगतिं प्रभुः ॥१॥
श्रीविद्यानंदिपादाब्जे मत्तभृंगेणधीमता ।
श्रुतादिसागरेणेयं संपत्पालकथा कृता ॥२॥
इति श्रीपालनृपचरित्रं समाप्तं ।

११. श्रीपालचरित्र (ब्र० नेमिदत्त)

आदिभाग :—

नत्वा श्रीमज्जिनाधीशं सुराधीशार्चितक्रमं ।
श्रीपालचरितं वक्ष्ये सिद्धचक्रार्चनोत्तमं ॥१॥

(वृषभादि २४ तीर्थंकरों, सिद्धों आदिके स्मरणके अनन्तर-)

एतेषां शर्महेतूनां चरणस्मृतिमंगलं ।
कृत्वाऽहं तुच्छबुद्ध्यापि श्रीपालचरितं ब्रुवे ॥२२॥
यच्चरित्रं सदासर्व्वरोगसंतापनाशनं ।
सिद्धचक्रव्रतोपेतं सिद्धौषधिमिवोत्तमं ॥२३॥
यत्पुरा रचितं पूर्वसूरिभिः श्रुतसागरैः ।
तदहं चापि वक्ष्यामि किमाश्चर्यमतः परं ॥२४॥

अन्तभाग :—

गच्छे श्रीमति मूलसंघतिलके सारस्वतीये शुभे ।
श्रीभट्टारकपद्मनन्दिमुनिपो देवेन्द्रकीर्तिस्ततः ॥३२॥
विद्यानन्दिगुरुस्ततो गुणनिधिः पट्टे तदीये सुधीः ।
श्रीभट्टारकमल्लिभूषणगुरुः सद्बोधसिंधुर्महान् ॥३३॥
तच्छिष्यो गुणरत्नरंजितमतिः श्रीसिंहनन्दी गुरुः
सद्रत्नत्रयमंडितोऽति नितरां भव्यौघनिस्तारकः ।
तेषां पादपयोजयुग्ममधुपः श्रीनेमिदत्तो यती
चक्रे चारुचरित्रमेतदुचितं श्रीपालजं शं क्रियात् ॥३४॥
अग्रोतोत्तमवंशमंडनमणिः सद्ब्रह्मचारी शुभः
श्रीभट्टारक-मल्लिभूषणगुरोः पादाब्जसेवारतः ।
जीयादत्र महेन्द्रदत्तसुयती संज्ञानवान्निर्मलः
सूरिः श्रीश्रुतसागरादियतिनां सेवापरः सन्मतिः ॥३५॥
ख्याते मालवदेशस्थ पूर्णाशानगरे वरे ।
श्रीमदादिजिनागारे सिद्धं शास्त्रमिदं शुभं ॥३६॥
संवत्सार्द्धसहस्रे च पंचाशीतिसमुत्तरे(१५८५) ।
आषाढे शुक्लपंचम्यां संपूर्णे रविवासरे ॥३७॥

इति श्रीसिद्धचक्रपूजातिशय-प्राप्त-श्रीपालमहाराज-चरित्रे भट्टारक-

श्रीमल्लिभूषणशिष्याचार्यश्रीसिंहनंदि-ब्रह्मशान्तिदासानुमोदिते ब्रह्म-नेमिदत्त-विरचिते श्रीपालमुनीन्द्रनिर्वाणगमनवर्णनो नाम नवमो सर्गः ॥६॥

१२. धर्मोपदेशपीयूषवर्ष (ब्र० नेमिदत्त)

आदिभाग :—

श्रीसर्वज्ञं प्रणम्योच्चैः केवलज्ञानलोचनं।
सद्धर्म्मं देशयाम्येष भव्यानां शर्महेतवे ॥१॥

अन्तभाग :—

इत्थं श्रीजिनभाषितं शुभतरं धर्मं जगद्योतकं
सद्रत्नत्रयलक्षणं द्वितयगं देवेन्द्रचन्द्रार्चितं।
ये भव्या निजशक्तिभक्तिसहिताः संपालयंत्यादरात्
ते नाकीं(कें)द्र-नरेंद्र-चक्रि-पदवीं भुक्त्वा शिवं यांति च ॥१६॥
गच्छे श्रीमति मूल[संघ]तिलके सारस्वतीये शुभे
विद्यानंदिगुरुप्रपट्टकमलोल्लासप्रदो भास्करः।
श्रीभट्टारकमल्लिभूषणगुरुः सिद्धांतसिंधुर्महां-
स्तच्छिष्यो मुनिसिंहनंदिसुगुरुर्जीयात् सतां भूतले ॥१७॥
तेषां पादाब्जयुग्मं निहितनिजमतिर्नेमिदत्तः स्वशक्त्या
भक्त्या शास्त्रं चकार प्रचुरसुखकरं श्रावकाचारमुच्चैः।
नित्यं भव्यैर्विशुद्धैः सकलगुणनिधैः प्राभिहितं च मत्वा
युक्त्या संसेवितोऽसौ दिशतु शुभतमं मंगलं सज्जनानां ॥१८॥
लेखकानां वाचकानां पाठकानां तथैव च।
पालकानां सुखं कुर्यान्नित्यं शास्त्रमिदं शुभं ॥१९॥

इति धर्मोपदेशपीयूषवर्षनामश्रावकाचारे भट्टारकश्रीमल्लिभूषणशिष्य-ब्रह्मनेमिदत्त-विरचिते सल्लेखनाक्रम-व्याख्यानो नाम पंचमोऽधिकारः।

१३. उपदेशरत्नमाला (भ० सकलभूषण)

आदिभाग :—

वंदे श्रीवृषभं देवं दिव्यलक्षणलक्षितम् ।
प्रीणित-प्राणिसद्वर्गं युगादिपुरुषोत्तमम् ॥१॥

× × × ×

श्रीकुंदकुंदनामानं यतीशं जितमत्सरम् ।
उमास्वातिं समंतादिभद्रांतं पूज्यपादकम ॥१५॥
अकलंकं कलाधारं नेमिचन्द्रं मुनीश्वरम् ।
विद्यानंदं प्रभाचन्द्रं पद्मनंदिगुरुं परम् ॥१६॥
श्रीमत्सकलकीर्त्याख्यं भट्टारकशिरोमणिम् ।
भुवनादिसुकीर्त्यन्तं गच्छाधीशं गुणोद्धरम् ॥१७॥
ज्ञानभूषणनामानं ज्ञानज्ञातभवस्थितिम् ।
वरं विजयकीर्तिं च कीर्तिव्याप्तसुभूतलं ॥१८॥
शुंभच्छोभाभरभ्राजमानं श्रीशुभचन्द्रकम् ।
सुबुद्धि(सुमति)कीर्तिसंयुक्तं नौमि प्रारब्धसिद्धये ॥१६॥

अन्तभाग :—

श्रीमूलसंघतिलके वरनंदिसंघे गच्छे सरस्वतिसुनाम्नि जगत्प्रसिद्धे ।
श्रीकुंदकुंदगुरुपट्टपरंपरायां श्रीपद्मनंदिमुनिपः समभूज्जिताक्षः ॥२२५॥
तत्पट्टधारी जनचित्तहारी पुराणमुख्योत्तमशास्त्रकारी ।
भट्टारकः श्रीसकलादिकीर्तिः प्रसिद्धनामाऽजनि पुण्यमूर्तिः ॥२२६॥
भुवनकीर्तिगुरुस्तत ऊर्जितो भुवनभासनशासनमंडनः ।
अजनि तीव्रतपश्चरणक्षमो विविधधर्मसमृद्धिसुदेशकः ॥२२७॥
श्री(सं)ज्ञानभूषेण परि(वि)भूषितांगः प्रसिद्धपांडित्यकलानिधानः ।
श्रीज्ञानभूषाख्यगुरुस्तदीयपट्टोदयाद्राविव भानुरासीत् ॥२२८॥
भट्टारकः श्रीविजयादिकीर्तिस्तदीयपट्टे परिलब्धकीर्तिः ।

महामना मोक्षसुखाभिलाषी बभूव जैनावनिपार्श्वपादः ॥२२९॥
भट्टारकः श्रीशुभचन्द्रसूरिस्तत्पट्टपंकेरुहतिग्मरश्मिः ।
त्रैविद्यवंद्यः सकलप्रसिद्धो वादीभसिंहो जयताद्धरित्र्यां ॥२३०॥
पट्टे तस्य प्रीणितप्राणिवर्गः, शांतो दांतः शीलशाली सुधीमान् ।
जीयात्सूरिः श्रीसुमत्यादिकीर्तिर्गच्छाधीशः कम्रकान्तिः कलावान् ॥२३१॥

तस्याभूच्च गुरुभ्राता नाम्ना सकलभूषणः ।
सूरिर्जिनमते लीनमनाः संतोषपोषकः ॥२३२॥
तेनोपदेशसद्रत्नमालासंज्ञो मनोहरः ।
कृतः कृतिजनानंद-निमित्तं ग्रंथ एषकः ॥२३३॥
श्रीनेमिचन्द्राचार्यादियतीनामाग्रहात्कृतः ।
सद्वर्धमानाटोलादि-प्रार्थनातो मयैषकः ॥२३४॥
सप्तविंशत्यधिके षोडशशतवत्सरेषु(१६२७) विक्रमतः ।
श्रावणमासे शुक्ले पक्षे षष्ट्यां कृतो ग्रन्थः ॥२३५॥
न मया ख्यातिनिमित्तं न चाभिमानेन विरचितो ग्रंथः ।
धर्मरतानां गृहिणां हिताय च स्वस्य पुण्याय ॥२३६॥
× × × ×
सहस्रत्रितयं चैव त्रिशतं त्र्य(तथैवा)शीति-संयुतम् ।
अनुष्टुपछंदसां चास्य प्रमाणं निश्चितं बुधैः ॥२४३॥

इति श्रीभट्टारक-श्रीशुभचन्द्रशिष्याचार्य-श्रीसकलभूषण-विरचितायामुपदेशरत्नमालायां पुण्यषट्कर्मप्रकाशिकायां तपोदानमाहात्म्य-वर्णनं नामाऽष्टादशः परिच्छेदः समाप्तः ।

१४. श्रावकाचारसारोद्धार (मुनि पद्मनन्दी)

आदिभाग :—

स्व-संवेदन-सुव्यक्त-महिमानमनश्वरं ।
परमात्मानमाद्यंतविमुक्तं चिन्मयं नुमः ॥१॥

श्रीनाभेयो जिनो भूयाद्भूयसे श्रेयसे स वः ।
जगज्ज्ञानजले यस्य दधाति कमलाऽऽकृतिं ॥२॥
वंदारु-त्रिदशाधीश-शिरोमणि-विभार्चितं ।
यदंह्रिद्वितयं सोऽस्तु संपदे शशिलांछनः ॥३॥

अन्तभाग :—

इति श्रावकाचारसारोद्धारे श्रीपद्मनन्दिमुनिविरचिते द्वादशव्रतवर्णनो नाम तृतीयः परिच्छेदो समाप्तः ॥३॥

यस्य तीर्थंकरस्येव महिमा भुवनातिगा ।
रत्नकीर्तिर्यतिः स्तुत्यः स न केषामशेषवित् ॥१॥
अहंकारस्फारी भवदमितवेदांतविबुधो-
ल्लसत्सिद्धांतश्रेणी-क्षपण-निपुणोक्तिद्युतिभरः ।
अधीती जैनेन्द्रेऽजनि रजनिनाथ-प्रतिनिधिः
प्रभाचन्द्रः सान्द्रोदयशमितापव्रतिवरः ॥२॥
महाव्रति-पुरंदरः प्रशमदग्धा(दग्धभवा)ङ्कुरः
स्फुरत्यपरपौरुषस्थितिरशेषशास्त्रार्थवित् ।
यशोभर-मनोहरीकृत-समस्तविश्वंभरः
परोपकृति-तत्परो जयति पद्मनन्दीश्वरः ॥३॥
श्रीमत्प्रभेन्दुप्रभुपादसेवा-हेवाकिचेत्ताऽप्रसरत्प्रभावः ।
सच्छ्रावकाचारमुदारमेनं श्रीपद्मनन्दी रचनां चकार ॥४॥
श्रीलंबकंचुककुले विततांतरिक्षे, कुर्वन् स्वबांधवसरोजविकाशलक्ष्मीं ।
लुंपन् विपक्षकुमुदव्रजभूरिकांतिं, गोकर्णहेलिरुदियाय लसत्प्रतापः ॥५॥
भुवि सूपकारसारं पुण्यवता येन निर्म्ममे कर्मा ।
भीमइव सोमदेवो गोकर्णात्सोऽभवत्पुत्रः ॥६॥
सती मतल्लिका तस्य यशः कुसुमवल्लिका ।
पत्नी श्रीसोमदेवस्य प्रेमा प्रेमपरायणा ॥७॥

विशुद्धयोः स्वभावेन ज्ञानलक्ष्मी जितेन्द्रियोः ।
नया इवाऽभवन् सप्तगंभीरास्तनयास्तयोः ॥८॥
वासाधर-हरिराजौ प्रह्लादः शुद्धधीश्च महराजः ।
भवराजो रत्नाख्यः सतनाख्यश्चेत्यमी सप्त ॥९॥
वासाधरस्याद्भुतभाग्यराशेर्मिपात्तयोर्वेश्मनि कल्पवृक्षः ।
अगण्यपुण्योदयतोऽवतीर्णो वितीर्णचेतोऽभिमतार्थसार्थः ॥१०॥
वासाधरेण सुधिया गांभीर्याद्यदि ऋणीकृतो नाब्धिः ।
कथमन्यथा स वडवाज्वलनज्वलनसूत्रस्थितोद्वलति ॥११॥
सांद्रानन्दस्वरूपाद्भुतमहिमपरब्रह्मविद्याविनोदा-
च्चात्तं जैनेन्द्रपादार्च्चनविमलविधौ पात्रदानाच्च पाणि ।
वाणी सन्मंत्रजापी प्रवचनवचनाकर्णनात्कर्णयुग्मं
लोकालोकावलोकान्न विरमति यशः साधुवासाधरस्य ॥१२॥
शीतांशूराजहंसत्यमितकुवलयत्युल्लसत्तारकालि-
स्तिग्मांशुः स्मेररक्तोत्थस्थलति जगदिदं चांतरीयत्यशेषं ।
जंबालत्यंतरिक्षं कनकगिरिरयं चक्रवाकत्युदग्रः
साधोवासाधरौदार्यगुणनिलय यशो वारिपूरो त्वदीयः ॥१३॥
द्वितीयाप्यद्वितीयो भूद्धर्योदार्यादिभिर्गुणैः ।
पुत्रः **सोमदेवस्य हरिराजा**ऽभिधः सुधीः ॥१४॥
गुणैः सदास्मप्रतिपक्षभूतैः संगं करोत्येष विवेकचक्षुः ।
इतीव सेर्ष्यैर्**हरिराज**साधुर्दोषैरवालोकितशीलसिंधुः ॥१५॥
संप्राप्य रत्नत्रितयैकपात्रं रत्नं सुतं मंडनमुर्व्वरायाः ।
श्रीसोमदेवः स्वकुटुम्बभार-निर्व्वाह-चिंता-रहितो बभूव ॥१६॥
हृष्टं शिष्टजनैः सपत्नकमलैः कुत्रापि लीनं जवा-
दर्थिप्रोद्धतनीलकंठनिवहैश्छत्रं प्रमोदो हु मान् (?) ।
तृष्णाधूलिकणोत्करैर्विगलितं स्थाने मुनीन्द्रैः स्थितिं ।
वृष्टिं दानमथर्विन्वति(?) परां रत्नांकरोम्भोधरो ॥१७॥

संतोनाम्ना पत्न्यां जिनराजध्यानकृत्सहरिराजः।
पुत्रं मनःसुखाख्यं धर्म्माद्युत्पादयामास ॥१८॥
सति प्रभुत्वे पि मदो न यस्य रतिः परस्त्रीषु न यौवनेऽपि।
परोपकारैकनिधिः स साधुर्धर्म्मात्सुखः कस्य न माननीयः ॥१६॥
जैनेंद्राङ्घ्रिसरोजभक्तिरचला बुद्धिर्विवेकांचिता
लक्ष्मीर्दीनसमर्पिता सकरुणं चेतः सुधायुग्वचः।
रूपं शीलयुतं परोपकरणव्यापारनिष्टं वपुः
शास्त्रं चापि मनःसुखे गतमदं काले कलौ दृश्यते ॥२०॥

संघभारधरो धीरः साधुर्वासाधरः सुधीः।
सिद्धये श्रावकाचारमचीकरदमुं मुदा ॥२१॥

यावत्सागरमेखला वसुमती यावत्सुवर्णाचलः
स्वर्णरी कुलसंकुगमितं(?)...........।
चिन्तास्क(?)...........लोकप्रकाशोद्यतो
तावन्नंदतु पुत्र-पौत्रसहितो वासाधरः श्रावकः ॥२२॥

[आमेर-प्रति

१५. महापुराण-टीका (भ० ललितकीर्ति)

आदिभाग :—

नत्वा श्रीमज्जिनेशानं लोकालोकप्रकाशकम्।
टीकां महापुराणस्य कुर्वे स्वाभीष्टसिद्धये ॥१॥

अथ श्रीमज्जिनसेनाचार्यः श्रीमद्गुणभद्राचार्यवर्यसंसेवितपाद-पंकेरुहयुग्मो रत्नत्रयमंडितमूर्तिर्निःशेषविघ्नसमाप्त्यर्थं भगवन्नमस्क्रियारूपं मंगलमाचष्टे।........

अन्तभाग :—

वर्षे सागरनागभोगिकुमिते (१८७४) मार्गे च मासेऽसिते
पक्षे पक्षति-सत्तिथौ रविदिने टीका कृतेयं वरा।

काष्ठासंघवरे च माथुरवरे गच्छे गणे पुष्करे
देवः श्रीजगदादिकीर्तिरभवत्ख्यातो जितात्मा महान् ॥१॥
तच्छिष्येण च मंदतान्वितधिया भट्टारकत्वं यता
शुभद्रे ललितादिकीर्त्यभिधया ख्यातेन लोके ध्रुवम् ।
राजच्छ्रीजिनसेनभाषितमहाकाव्यस्य भक्त्या मया
संशोध्यैव सुपठ्यतां बुधजनैः क्षांतिं विधायादरात् ॥२॥

१६. पंचनमस्कार-दीपक (भ० सिंहनन्दि)

आदिभाग :—

नमाम्यर्हन्तं देवेशं लक्ष्मीरात्यंतिकी स्वयं ।
यस्य निर्द्धूत-कर्मेन्ध-धूमस्यापि विराजते ॥१॥

अन्तभाग :—

श्रीमूलसंघे वरपुष्कराख्ये गच्छे सुजातः शुभचन्द्रसूरिः ।
तस्याऽत्र पट्टेऽजनि सिंहनन्दिर्भट्टारकोऽभूद्विदुषां वरेण्यः ॥५३॥
तेनेदं रचितं ग्रंथं नाम्ना पंचनमस्कृति-
दीपकं विस्तरभिया संक्षिप्तं चाल्पमेधसा ॥५४॥
अब्दैस्तत्त्वरसर्तुचंद्रकलिते (१६६७) श्रीविक्रमादित्यजे
मासे कार्तिकनामनीह धवले पक्षे शरत्संभवे ।
वारे भास्वति सिद्धनामनि तथा योगेषु पूर्णातिथौ
नक्षत्रेऽश्विनिनाम्नि तत्त्वरसिकः पूर्णीकृतो ग्रंथकः ॥५५॥
श्लोकं सहस्रगणितं वक्तुः श्रोतुः सुखप्रदं ।
ग्रन्थस्य पंचनत्याख्यदीपकस्याऽस्य तिष्ठतां ॥५६॥
इति बहुतरमपि फलविषयं पंचनमस्कारग्रन्थे संक्षिप्य पूर्णीकृतं ।

१७. द्विसंधानकाव्य-टीका (पं० नेमिचन्द्र)

आदिभाग :—

श्रीमान् शिवानन्दनयीशवंद्यो भूयाद्विभूत्यै मुनिसुव्रतो वः।
सद्धर्मसंभूतिनरेन्द्रपूज्यो भिन्नेन्द्रनीलोल्लसदंगकांतिः ॥१॥
जीयान्मृगेन्द्रो विनयेन्दुनामा संवित्सटाराजितकंठपीठः।
प्रत्तीववादीभ-कपोलभित्ति प्रमाक्षरैः स्वैर्नखरैर्विदार्य ॥२॥
तस्याथ शिष्योऽजनि देवनन्दी सद्ब्रह्मचर्यव्रत-देव-नन्दी।
पादाम्बुजद्वंद्वमनिंद्यमर्च्यं तस्योत्तमांगेन नमस्करोमि ॥ ३ ॥
त्रैलोक्यकीर्तेश्चरणारविंदं पारं भवार्णोधितटीं[1] प्रणम्य।
पिपासतां राघव-पांडवीयां टीकां करिष्ये पदकौमदीं तां ॥४॥

अन्तभाग :—

इति निरवद्यविद्यामण्डनमण्डित-पण्डितमण्डली-मण्डितस्य षट्तर्क-चक्रवर्तिनः श्रीमद्विनयचन्द्रपण्डितस्य गुरोरंतेवासिनो देवनन्दिनाम्नः शिष्येण सकलकलोद्भव-चारुचातुरी-चंद्रिकाचकोरेण नेमिचन्द्रेण विरचितायां द्विसंधानकवेर्धनंजयस्य राघवपांडवीयापरनाम्नः[2] काव्यस्य 'पद-कौमुदी'नाम दधानायां टीकायां श्रीरामकृष्णयुधिष्ठराभ्युदयवर्णनं[3] नामाष्टादशः सर्गः समाप्तः ॥१८॥

१८. ज्ञानसूर्योदय-नाटक (भ० वादिचन्द्र)

आदिभाग :—

अनाद्यनन्तरूपाय पंचवर्णात्ममूर्त्तये।
अनंतमहिमाप्ताय सदोंकार नमोस्तु ते ॥१॥

१ 'पारे नयार्णोदधिसं' इति आरा सि० भ० प्रतौ पाठः।
२ 'राघवपांडवीयाभिधानस्य' इति आरा सि० भ० प्रतौ पाठः।
३ 'नायकाभ्युदय-रावण-जरासंध-वर्णनं' इति आ० सि० भ० प्रतौ पाठः।

तस्मादभिन्नरूपस्य वृषभस्य जिनेशतुः ।
नत्वा तस्य पदांभोजं-भूषिताऽखिलभूतलं ॥२॥
भूपीठभ्रांतभूतानां भूयष्ठिानंददायिनीं ।
भजे भवापहां **भाषां** भवभ्रमणभंजिनीं ॥३॥
येषां ग्रन्थस्य संदर्भो प्रोस्फुरीति विदां हृदि ।
ववंदे तान् गुरून् भूयो भक्तिभारनमच्छिरः ॥४॥

नाद्यंते सूत्रधारः—आदिष्टोस्मि ।

ब्रह्मश्री**कमलसागर**—ब्रह्मश्री**कीर्तिसागरा**भ्यां सकलागमामवारिधि-चंद्रावताराणां **सरस्वतीगच्छ**शृंगारहाराणां श्रीमन्**मूलसंघो**दयाद्रिप्रकटन-प्रभाकराणां चंचच्छिखि-शिखंडशोभितकरकमलानां त्रिविद्यविद्याचक्रवर्तिनां दिगम्बरशिरोमणीनां श्रीमत्**प्रभाचन्द्र**सूरीश्वराणां शिष्यैरस्मद्गुरुभिश्च श्रीमद्वादिचन्द्रसूरिर्भिनिर्माय **ज्ञानसूर्योदयं** नामनाटकं प्रदत्तमासीत् तत्सभ्यानां पुरतोऽभिनेतव्यं अस्ति चाधुना सर्वेषां कुतूहललालसं चेतः । इति प्रस्तावः ।

अन्तभाग :—

मूलसंघे समासाद्य **ज्ञानभूषं** बुधोत्तमाः ।
दुस्तरं हि भवांभोधिं सुतरिं मन्वते हृदि ॥१॥
तत्पट्टामलभूषणं समभवद्दैगम्बरीये मते
चंचद्बर्हकरः स भाति चतुरः श्रीमत्**प्रभाचन्द्रमाः** ।
तत्पट्टेऽजनि वादिवृन्दतिलकः **श्रीवादिचन्द्रो** यति-
स्तेनायं व्यरचि प्रबोधतरणिर्भव्याब्जसंबोधनः ॥२॥
वसुवेदरसाब्जांके (१६४८) वर्षे माघे सिताष्टमी-दिवसे ।
श्रीमन्**मधूकनगरे** सिद्धोऽयं बोधसंरंभः ॥३॥ १८३॥

इति सूरिश्रीवादिचन्द्रं विरचिते ज्ञानसूर्योदयनाटके चतुर्थोऽध्यायः॥४॥

संपूर्णोयं ग्रन्थः । स्वस्ति ।

१६. षोडशकारणव्रतोद्यापन (केशवसेन सूरि)

आदिभाग :—

श्रीमंतं धरणीश्वरार्च्चितपदं पापापहं हंसभं
हंसास्य हरिहंसदोदयमहं स्तुत्वार्षभं देवतां ।
भक्त्या षोडशकारणार्च्चनविधिं विद्वज्जनोल्लासकं ।
कुर्वे केशवसेनसूरिरतुलश्रीधर्म्मणे सन्मणिः ॥१॥

अन्तभाग :—

दिक्संघेऽभूद्रामसेनक्रमेण श्रीमान् विद्वद्रत्नभूषो भदंतः ।
चारित्रांभो जातभानुश्चकास्ति, तत्पट्टे वै श्रीजयाद्यंतकीर्तिः ॥१३॥
वेदनंदरसचंद्रवत्सरे (१६६४) मार्गमासि सितसप्तमीविधौ(तिथौ) ।
रामनामनगरे मया कृतार्च्चान्यपुण्यनिवहाय सूरिणा ॥१४॥

श्रीमत्केशवसेनसूरिगदितां पूजां पठंत्येव ये
शृण्वन्ति त्वथ पाठयन्ति सुनरा नार्यश्च सद्भावतः ।
ये चात्रैव लिखाप्य पुस्तकमथ प्रायः सुपात्राय वै
दास्यंत्यर्थमिनप्रतापमखिलैश्वर्यं लभंतेऽन्तके ॥१५॥

इति श्रीआचार्यकेशवसेन-विरचितं षोडशकारणव्रतोद्यापनं संपूर्णं ॥

२०. चतुर्दशीव्रतोद्यापन (अक्षयराम)

आदिभाग :—

श्रीवीरं शिरसानम्य वक्ष्ये संक्षेपतस्तरां ।
चतुर्दश्युपवासानामष्टषष्ठिशतप्रमां ॥१॥

अन्तभाग :—

शास्त्राब्धेः पारगामी परममुनिरभून्मंडलाचार्य्यमुख्यः
श्रीविद्यानन्दिनामा निखिलगुणनिधिः पुण्यमूर्तिः प्रसिद्धः ।

तच्छिष्यो संप्रधारी(?)विबुधजनमनोहर्षसंदानदक्षो
दक्षोऽश्रीरामनामा विधिरमुमकरोत्पूजनाया विधेश्च ॥१॥
श्रीजयसिंहभूपस्य मंत्रिमुख्योऽग्रणीः सतां ।
श्रावकस्ताराचंद्राख्यस्तेनेदं व्रतसमुद्धृतं ॥२॥
तदवसरमुद्दिश्य पूर्व्वशास्त्रानुवृत्तितः ।
व्रतोद्योतनमेनेन कारितं पुण्यहेतवे ॥३॥
अब्दे द्विशून्याष्टैकांके (१८००) चैत्रमासेसिते दले ।
पंचम्यां च चतुर्दश्या व्रतस्योद्योतनं कृतं ॥४॥
इति प्रतिमासान्तचतुर्दशीव्रतोद्यापनविधि-पूजा-जयमाला संपूर्ण ।

२१. त्रिभंगीसारटीका (सोमदेवसूरि)

आदिभाग :—

सर्वज्ञं करुणार्णवं त्रिभुवनाधीशार्च्यपादं विभुं
यज्जीवादिपदार्थसार्थकलने लब्धप्रशंसं सदा ।
तं नत्वाऽखिलमंगलास्पदमहं श्रीनेमिचन्द्रं जिनं
वक्ष्ये भव्यजनप्रबोधजननीं टीकां सुबोधाऽभिधां ॥१॥
जिनेन्द्रवक्त्राम्बुरुहाद्विनिर्गतां स्याद्वादरूपां गुणशालिनीं सदा।
निरस्य जाड्यं प्रददाति या मतिं तां भारतीं नौमि परंपवित्रां॥२॥
कर्म्मद्रुमोन्मूलनदिक्करीन्द्रं सिद्धान्तपाथोनिधिदृष्टपारं ।
षट्त्रिंशदाचार्यगुणैः प्रयुक्तं नमाम्यहं श्रीगुणभद्रसूरिं ॥३॥
या पूर्वा श्रुतटीका कर्णाट[मु]भाषया विहिता ।
लाटीयभाषया सा विरच्यते **सोमदेवेन** ॥४॥
अतीन्द्रियसुखप्राप्त्यै निर्मुक्तैर्जन्मसंततेः ।
भाविता जायते सम्यग्भावना बंधमोक्षयोः ॥५॥
प्रणिपत्य नेमिचन्द्रं वृषभाद्यान् वीरपश्चिमाञ्जिनान् सर्वान् ।
वक्ष्ये सुभाषयाऽहं विशदां टीकां त्रिभंग्यायां ॥६॥

अन्तभाग :—

अमितगुणगणः साध्वीभदेवाब्धिसोमः
विजयनिवरत्नं काममुद्योतकारी ।
गतकलिलकलंकः सर्वदा यः स्ववृत्तः
स जयति जिनबिंबस्थापनाचार्यचार्याः(वर्यः) ॥१॥

यथाऽमरेन्द्रस्य पुलोम[जा]प्रिया नाराय[ण]स्याब्धिसुता बभूव।
तथाभदेवस्य वैजैणिनाम्नी प्रिया सुधर्मा सुगुणा सुशीला ॥२॥
तयोः सुतः सद्गुणवान् सुवृत्तः सोमोऽभिधः कौमुदवृद्धिकारी ।
स्याघेरवालंबुनिधेः सुरत्नं जीयाच्चिरं सर्व्वजनीनवृत्तिः ॥३॥
श्रीमज्जिनोक्तानि समंजसानि शास्त्राणि लेभे स यथात्मशक्त्या ।
श्रीमूलसंघाब्धिविवर्द्धनेन्दोः श्रीपूज्यपाद-प्रभुसत्प्रमादात ॥४॥

न ज्ञातृत्वाभिमानेन न यशःप्रसरेच्छया ।
कृतिः किन्तु मदीयेयं स्वबोधायैव केवलं ॥५॥
शब्दशास्त्रविरोधं यत् यदागमविरोधि च ।
न्यूनाधिकं च यत्प्रोक्तं शोधितं तन्मनीषिभिः ॥६॥
श्रीमद्यांह्रियुगे जिनस्य नितरां लीनः शिवाशाधरः ।
सोमः सद्गुणभाजनं सविनयः सत्पात्रदाने रतः ॥
सद्रत्नत्रययुक् सदा बुधमनो(जना)ह्लादी चिरं भूतले ।
नंद्यात्येन विवेकिना विरचिता टीका सुबोधाभिधा ॥

इति त्रिभंगीसारटीका समाप्ता ।

२२. यशोधरचरित्र (भ० श्रुतसागर)

आदिभाग :—

विद्यानंदीश्वरं देवं नाभिराजसमुद्भवं ।
स्तुवेहं मरुदेव्यंगसंभवं वृषभं जिनं ॥१॥

अकलंकं जिनाधीशमजितं विजयात्मजं।
जितशत्रुमहाराजनंदनं प्रणमाम्यहं ॥२॥
समंतभद्रं सर्वज्ञं स्वस्ति श्रावस्तिसंभवं।
दृढराज-सुषेणोत्थं संभवं चिंतयाम्यहं ॥३॥
शिवकोटिप्रदं वंदे शरण्यमभिनंदनं।
स्वयंवर-महाराज-सिद्धार्था-स्वामिनी-सुतं ॥४॥
उमास्वामिनमर्हंतं श्रयामि सुमतीश्वरं।
श्रीमेघरथराजेंद्र-मंगलाजं सुमंगलं ॥५॥
भद्रबाहुं जगद्भद्रं भजे पद्मप्रभं विभुं।
कौशांबी-धरणाधीश-सुसीमा-सुतनूद्भवं ॥६॥
गुप्तिगुप्तं पुरीकाशीपतिश्रीप्रतिष्ठितं।
सुपार्श्वं पृथिवीषेणा-सुतनीलांग[भं] भजे ॥७॥

(ग्रन्थ सामने न होनेसे अगले पद्य नहीं दिये जा सके।)

अन्तभाग :—

श्रीमद्वीरजिनेन्द्र-शासन-शिरोरत्नं सतां मंडनं
साक्षादक्षयमोक्षकारि करुणाकृन्मूलसंघेऽभवत्।
वंशे श्रीमत्कुंदकुंदविदुषो देवेन्द्रकीर्तिर्गुरुः
पट्टे तस्य मुमुक्षुरक्षयगुणो विद्यादिनंदीश्वरः ॥२७१॥

तत्पादपावनपयोरुहमत्तभृंगः श्रीमल्लिभूषणगुरुर्गरिमप्रधानः।
संप्रेरितोहममुनाभयरुच्यभिख्ये भट्टारकेण चरिते श्रुतसागराख्यः ॥२७२॥
क्षांत्यार्जवादिगुणवेश्म तपोनिधानं चारित्रसद्म करुणानिधिराप्तपूज्यः।
सद्धर्ममूर्तिरिह सोपि महेन्द्रकीर्तिराचार्यवर्यविनुतो [ऽनु]मतं चकार॥२७३॥

विद्यादिनंदिगुरुपूर्वगिरा च भक्त्या।
संप्रार्थितश्च मुनिनाऽमरकीर्तिनाम्ना।
श्रीरत्नराज-ऋषिणा गुरुभक्तिभाजा
राजाधिराज-नत-पादकज-द्वयेन ॥२७४॥

तर्क-व्याकरणार्हत-प्रविलसत्सिद्धांतसारामल-
छंदोलंकृतिपूर्वनव्यकृतधीसंश्रव्यकाव्योच्चये ।
चंचारुधिया प्रमोदितमतिर्भूयः कृताभ्यर्थनः
साधुश्रीमतिसागरेण कृतवानेतच्चरित्रं शुभं ॥२७५॥
गंधारसारनगरे संघाभ्यर्च्चनमनेकशः शुचा(श्रुत्वा) ।
श्रुतसागरेण रचितं शास्त्रमिदं सिद्धिदं भवतु ॥२७६॥

इति श्रीभट्टारकश्रीविद्यानंदि-प्रियशिष्यसूरिश्रीश्रुतसागर-विरचिते यशोधरमहाराजचरिते अभयरुच्याऽभयमति-मारदत्त-यशोमति-कल्याणमित्र-कुसुमावली-श्रीसुदत्तभट्टारक-स्वर्गगमनवर्णनं नाम चतुर्थः परिच्छेदः ।

[आमेर-प्रति

२३. भविष्यदत्तचरित्र (विबुध श्रीधर)

आदिभाग :—

श्रीमतं त्रिजगन्नाथं नमामि वृषभं जिनं ।
इन्द्रादिभिः सदा यस्य पादपद्मद्वयी नता ॥१॥

(आगे चन्द्रप्रभ, शान्ति, पार्श्व, महावीर आदिकी स्तुति है)

यज्जिनेन्द्रमुखोद्गीतं यद्गणेशप्रकाशितं ।
यन्मुनीन्द्रगणैर्ग्रंथ कथितं ग्रंथवेदिभिः ॥८॥
श्रेमद्देदोमयूतायां(?)स्थितेन नयशालिना ।
श्रीलंबकंचुकाऽनूकनभोभूषणभानुना ॥६॥
प्रसिद्धसाधुधामैकदनुजेन दयावता ।
प्रवरोपासकाचार-विचाराहित-चेतसा ॥१०॥
गुरुदेवार्चनादानध्यानाध्ययनकर्मणा ।
साधुना लक्ष्मणाख्येन प्रेरितो भक्तिसंयुता ॥११॥
तदहं शक्तितो वक्ष्ये चरितं दुरितापहं ।
श्रीमद्भविष्यदत्तस्य कमलश्रीतनूभुवः ॥१२॥

समोपरोधतः संतः शृएवंतु स्थिरमानसाः ।
निःश्रेयसाय मुंचंतु खलभावं खलाहदः (?)॥१३॥

अन्तभाग :—

चन्द्रप्रभस्य जगतामधिपस्य तीर्थे यातेयमद्भुतकथा कविकंठभूषा ।
विस्तारिता च मुनिनाथगणैः क्रमेण ज्ञाता मयाप्यपरसूरिमुखाम्बुजेभ्यः ॥५१॥
भक्त्याऽत्र ये चरितमेतदनूनबुद्ध्या शृएवंति संसदि पठंति च पाठयंति ।
दत्वा धनं निजकरेण च लेखयंति व्युद्ग्राहभावरहिताश्च लिखंति संतः॥५२॥
ते भवंति बललक्षणशुद्धाः श्रीधरामलमुखा जनमुख्याः ।
प्राप्तचिंतितसमस्तसुखार्थाः शुभ्रकीर्तिधवलीकृतलोकाः ॥५३॥

इति श्रीभविष्यदत्तचरिते[1] विबुधश्रीधर-विरचिते साधुलक्ष्मण-नामांकिते श्रीवर्द्धन-नंदिवर्द्धन-मोक्षगमनवर्णनं नाम पंचदशः सर्गः समाप्तः ॥

२४. त्रिलोकसार-टीका (सहस्रकीर्ति)

आदिभाग :—

यस्योक्ति-शीतलसुधारसविप्रसंगाज्जन्माग्नितापपरितापित-भव्यजीवः ।
निर्वान्ति नेमिमवनम्य मुनीन्द्रचन्द्रं त्रैलोक्यसारवरवृत्तिमहं करिष्ये ॥२॥

सकलसैद्धान्तिकचक्रचूडामणि-श्रीनेमिचन्द्रभट्टारकोऽभिमतदेवता-श्रीनेमिजिननमस्कारप्रतिपादनार्थं निर्विघ्नाभिप्रेतार्थसिद्ध्यर्थं च स्वशास्त्रादौ नमस्कारमाह ।

अन्तभाग :—

असापल्यां सुधीः साधुर्वा सुपूज्य-जिनालये ।
सहस्रकीर्तिराख्यातो नानाभव्यावबोधनः ॥१॥

---

१ इस ग्रन्थकी एक जीर्णप्रति, संवत १४८६ आषाढ वदि ६ गुरुवारकी लिखी हुई, देहली-धर्मपुराके नया मन्दिरमें मौजूद है, जिसमें प्रारंभके दो पत्र नहीं और कुछ पत्र जीर्णोद्धार द्वारा नये भी शामिल किये गये हैं ।

नेमिाकृते त्रिजगती वय-बुद्धि-वृद्धा वृत्तिर्दिगम्बरधरार्णववर्णकीर्णा ।
यावज्जगद्धृतमिदं मरुतां त्रयेण तावत्सतामियमलं मुदमातनोतु ॥२॥
इति त्रैलोक्यसार-टीका समाप्ता ।

२५. धर्मपरीक्षा (रामचन्द्र मुनि)

आदिभाग :—

प्रणिपत्य जिनं भक्त्या स्याद्वादवरनायकम् ।
कथां धर्मपरीक्षाख्यामभिधास्ये यथागमम् ॥१॥

अन्तभाग :—

इति श्रीरामचन्द्रेण मुनिना गुणशालिना ।
ख्याता धर्मपरीक्षा सा कृता कृतिरियं ततः ॥१॥
श्रीपूज्यपादसद्वंशे जातोऽसौ मुनिपुंगवः ।
पद्मनन्दी इति ख्यातो भव्यव्यूह-प्रवन्दितः ॥२॥
तच्छिष्यो रामचन्द्राख्यो भद्रश्चारुगुणान्वितः ।
वेदिता सर्वशास्त्राणां ख्यातो धर्मरताशयः ॥३॥
स च शुद्धव्रतोपेतः समयादिविवर्जितः ।
समयः सर्वसत्त्वानां तत्प्रार्थनवशाद्वरः ॥४॥
यावद्व्योम्नि प्रवर्त्तन्ते शशांकरवितारकाः ।
तावद्धर्मपरीक्षेयं वर्तिष्यति सदाशये ॥५॥
पद्मनिवासभूता हि कथा पद्मायनी वरा ।
तथा धर्मपरीक्षा च मिथ्यात्वाज्ञानध्वंसिनी ॥६॥
इति धर्मपरीक्षाकथा समाप्ता ।

२६. करकण्डुचरित्र (भ० जिनेन्द्रभूषण)

आदिभाग :—

पार्श्वनाथजिनं वन्दे विश्वविघ्नौघनाशनम् ।
कमठोपसर्ग-दैत्यारि-नाशनं सौख्य-कारणम् ॥१॥

अन्तभाग :—

वक्तुं सर्वमिह क्षमः किल भवेत्कस्योत्तमा भारती ॥१५॥

इति श्रीमुमुक्षु-सिद्धान्तचक्रवर्ति-श्रीकुन्दकुन्दाचार्यानुक्रमेण श्रीभट्टारक-विश्वभूषण-विरचिते श्रीमज्जिनेन्द्रपुराणान्तर्गत-भगवत्पूजाफल-व्यावर्णने श्रीकरकण्डु-सहस्रारकाप्तिवर्णनो नाम चतुर्थोऽधिकारः सम्पूर्णः।

करकण्डुकथा सम्पूर्णा।

२७. अनन्तजिन-व्रतपूजा (भ० गुणचन्द्र)

आदिभाग :—

श्रीसर्वज्ञं नमस्कृत्य सिद्धं साधूंस्त्रिधा पुनः।

अनन्तव्रतमुख्यस्य पूजां कुर्वे यथाक्रमम् ॥१॥

अन्तभाग :—

इत्यनंतविधेः पूजां व्यरचद् गुणचंद्रकः।

श्लोकः सप्तशती पंचसप्तत्यूना यतीश्वरः ॥१॥

संवत्षोडशत्रिंशत्र्यष्यफलके(१६३३) पक्षेऽवदाते तिथौ

पक्षत्यां गुरुवासरे पुरुजिनेट्-श्रीशाकमार्गे पुरे।

श्रीमद्हुम्बडवंशपद्मसविता हर्षाख्यदुर्गो वणिक्

सोयं कारितवाननंतजिनसत्पूजां वरे वाग्वरे ॥२॥

श्रीमूलसंघेघविघातिनीह प्रद्योतमानेऽन्यमतानि नेशुः।

सभस्वतो गच्छ इहैव नंद्यात् श्रीमद्बलात्कारगणाभियुक्ते ॥३॥

श्रीरत्नकीर्तिर्भगवज्जगतां वरेण्यश्चारित्ररत्ननिवहस्य बभार भारम्।

तद्दीक्षितो यतिवरो यशकीर्तिकीर्तिश्चारित्ररंजितजनोद्धहिता सुकीर्तिः ॥४॥

तच्छिष्यो गुणचंद्रसूरिरभवच्चारित्रचेतोहर-

स्तेनेदं वरपूजनं जिनवरानन्तस्य युक्त्याऽरचि।

येऽत्र ज्ञानविकारिणो यतिवरास्तैः शोध्यमेतद्ध्रुवं

नंद्यादारविचंद्रमक्षयतरं संघस्य मांगल्यकृत् ॥५॥

इत्याचार्यगुणचंद्रविरचिता श्रीअनन्तनाथजिनपूजा उद्यापनसहिता समाप्ता।

२८. पद्मपुराण (भ० धर्मकीर्ति)

आदिभाग :—

शक्राली-मौलि-रत्नांशु-वारि-धौत-पदाम्बुजं ।
ज्ञानादिमहिमव्याप्तविष्टपं विष्टपाधिपं ॥१॥
मुनिसुव्रतनामानं मुक्ताराधितक्रमं ।
वंदे भक्तिभरानम्रः श्रेयसे श्रेयसि स्थितं ॥२॥

अन्तभाग :—

अथाभवन्मूलसुसंघ एव गच्छे सरस्वत्यधिके(भिधे) गणे च ।
बलात्कृतौ श्रीमुनिपद्मनन्दी श्रीकुंदकुंदान्वयजप्रसूतिः ॥२४॥
देवेन्द्रकीर्तिश्च बभूव तस्य पट्टे महिष्टे सुमहानुभावः ।
त्रिलोककीर्तिस्तत तत्र(एव) दीक्षो भट्टारकस्तत्पदलक्ष्यनिष्ठः ॥२५॥
सहस्रकीर्तिमुनिवृन्दसेव्यस्तत्पट्टपाथोधिनिशाधिनाथः ।
तदीयशिष्यः पद-पद्मनन्दी बभूव नाम्ना मुनिपद्मनन्दी ॥२६॥
पट्टे तदीयेऽखिलसंघसेव्यो यशःसुकीर्तिः शुभकीर्तिसिंधुः ।
बभूव भट्टारक-सत्पदस्थो मुनिः स्मरारेः हनने प्रवीणः ॥२७॥
तत्पट्टपंकेजविकाशनेयः साम्यं विभर्तीह सहस्रभानोः ।
हतस्मरार्जितदुःकषाश्री(?) विनष्टदुर्भावचयो महात्मा ॥२८॥
यं वीक्ष्य लोके व्रतभासुरांगं तपस्विनं शास्त्रविदं मुनीशं ।
भजंति मिथ्यात्वचयं न जातु क्रियापरं शीलनिधिं सुशांतं ॥२९॥
यं सेवमाना सततं सुशिष्या विज्ञात-तत्त्व-व्रत-भासुरांगाः ।
भवंति नूनं जगती-प्रकाशास्तपःकृशांगा रविणो गुणौघैः ॥३०॥
यं सेवमानः समकुद्विजातं मुनीशमासीद्बुद्धररत्नपालः ।
पटुत्व-वाग्मित्व-कवित्व-वेत्ता .... सद्गुणरत्नगात्रं ॥३१॥
एवं विधोऽसौ मुनिसंघसेव्यो भट्टारको भासितदिक्समूहः ।
संघस्य कल्याणततिः प्रदेया नाम्ना गुरुः श्रीललितादिकीर्तिः ॥३२॥

तच्छिष्यस्तत्पदस्थो व्रतनिचययुतो जैनपादाब्जभृंगो
नाम्ना धर्मादिकीर्तिर्मुनिविमलमनास्तेन चैतत्पुराणं।
स्वल्पप्रज्ञेन दृब्धं निजदुरितचय-प्रक्षयाय हिताय
भव्यानां च परेषां श्रवण-मुपठने प्रोद्यतानामजस्रं ॥३३॥
मूलकर्ता पुराणस्य श्रीजिनश्चोत्तरस्तथा।
गणीशो यतयोन्ये च उत्तरोत्तरकर्तृकाः ॥३४॥
इदं श्रीरविषेणस्य पुराणं वीक्ष्य निर्मितः।
चिरं स्थेयात् क्षितौ भव्यैः श्रुतं चाधीतमन्वहं ॥३५॥
संवत्सरे द्व्यष्टशते मनोज्ञे चैकोनसप्तत्यधिके(१६६९) सुमासे।
श्रीश्रावणे सूर्यदिने तृतीयातिथौ च देशेषु हि मालवेषु ॥३६॥

× × × ×

इति श्रीपद्मपुराणे भट्टारकश्रीधर्मकीर्तिविरचिते पद्मदेवनिर्वाणगमनं नाम चतुश्चत्वारिंशः पर्वः ॥४४॥

२९. हरिवंशपुराण (भ० धर्मकीर्ति)

आदिभाग:—

श्रीमंतं त्रिजगन्नाथं नेमिनाथं जिनाधिपम्।
अरिष्टखंडने नेमिं वन्देऽनन्तगुणार्णवम् ॥१॥
पुरुदेवादि-वीरान्तान् शेषांस्तीर्थकरान्मुदा।
वन्देऽनन्तगुणालीढान्प्रातिहार्यादिभूषितान् ॥२॥
सप्तत्यग्रशतक्षेत्र्यान्सतो भूतान्भविष्यतः।
नमामि श्रीजिनान् घातिकर्मसंघातघातकान् ॥३॥
सिद्धानष्टगुणोपेतान्पंचाचारादिसंगतान्।
आचार्यान्पाठकान्वंदे तथासाधूंस्तपोधनान् ॥४॥
जिनेन्द्र-वक्त्र-संजातां सुरासुरमुनीडिताम्।
भारतीं नौमि दुर्जाड्य-नाशिनीं विश्वदीपिकाम् ॥५॥

वन्दे वृषभसेनादीन् गौतमान्तान् गणेशिनः ।
चतुर्ज्ञानधरान्सम्यक् पूर्वाङ्ग-रचनोद्यतान् ॥६॥
कुन्दकुन्दादिकाचार्यान् कवीन्द्रान्नौमि भक्तितः ।
प्रदीपायितमेतत्र (?) यैर्मिथ्यात्वतमोवृते ॥७॥
तथा ललितकीर्त्याख्यमीडे भट्टारकं गुरुम् ।
क्रियते यत्प्रसादेन कृतिरेषा बुधोचिता ॥८॥

अन्तभाग :—

वीरेणोक्तं पुरा चैतद्गौतमाद्यैस्ततोऽखिलम् ।
श्रुतकेवलिभिस्तद्वत्ततः श्रीगुणभद्रकैः ॥६०॥
संक्षेपेण च तद्वीक्ष्य प्रोक्तं तच्च मया पुनः ।
उक्तमेतच्चिरं नंद्यात्पठितं पाठितं बुधैः ॥६१॥

नानाकथातत्त्वरहस्यपूर्णं पूजाव्रतत्याग-तपोगुणाढ्यम् ।
स्वर्गापवर्गोरुनिदानभूतं पुराणमेतत्सुचिरं प्रजीयात् ॥६२॥
श्रीमूलसंघेऽजनि कुन्दकुन्दः सूरिर्महात्माखिलतत्त्ववेदी ।
सीमंधरस्वामिपदप्रवन्दी पञ्चाह्वयो जैन-मत-प्रदीपः ॥६३॥
तदन्वयेऽभूद्यशकीर्तिनामा भट्टारको भाषितजैनमार्गः ।
तत्पट्टवान् श्रीललितादिकीर्तिर्भट्टारकोऽजायत सत्क्रियावान् ॥६४॥

जयति ललितकीर्तिर्ज्ञाततत्त्वार्थसार्थो
नय-विनय-विवेक-प्रोज्वलो भव्यबन्धुः ।
जनपदशतमुख्ये मालवेऽलं यदाज्ञा
समभवदिह जैन-द्योतिका दीपिकेव ॥६५॥
तत्पट्टाम्बुजहर्ष-वर्ष-तरणिर्भट्टारको भासुरो
जैनग्रन्थविचार-केलिनिपुणः श्रीधर्मकीर्त्याह्वयः ।
तेनेदं रचितं पुराणममलं गुर्वाज्ञया किञ्चन
संक्षेपेण विबुद्धिनापि सुहृदा तत्शोध्यमेतद् ध्रुवम् ॥६६॥

यशोलाभाभिमानार्थे न ग्रन्थोऽयं कृतो मया ।
स्वश्रेयसे तथान्येषामुपकाराय केवलम् ॥६७॥
एतद्ग्रन्थकृतं वांछे फलं कर्मक्षयं ध्रुवं ।
ततः संसारवाराब्धिः सुतरो मे भविष्यति ॥६८॥
हीनाधिकमभूत्किंचिद्यदिह विदुषांवरै-
स्तच्छोध्यं कृपया तत्र हास्यः कार्यो न मे मनाक् ॥६६॥
को हेयो विदुषामनादृतिरथ कः पोषणीयोऽपि कः ।
को मासो गदितश्च का वरनदी किं पाठनीयं पुरा ॥
निंद्या का महतां तथा जिनपतेः का पूजनीया मुदा ।
ज्ञातव्यस्त्रिकवर्णनामसुगतैर्मध्याक्षरै ग्रंथकृत् ॥१००॥

अधमः । कार्मणः । स्वकीयः । कार्तिक । यमुना । गणित । विकृतिः । प्रतिमा । धर्मकीर्तिमुनिकृति ।

वर्षे द्व्यष्टशते चैकाग्रसप्तत्यधिके(१६७१) रवौ ।
आश्विने कृष्णपंचम्यां ग्रन्थोऽयं रचितो मया ॥१०१॥

३०. हरिवंसपुराण (पं० रामचन्द्र)

आदिभाग :—

श्रीमते नेमिनाथाय केवलज्ञानमूर्तये ।
स्याद्वादवादिने नित्यं नमोस्तु भवहारिणे ॥१॥
यल्लोकेन्द्रानलं नेमिं प्रह्वीकृत्य गुणार्णवम् ।
हरिवंशपुराणस्य समासो वर्ण्यते मया ॥२॥
जिनसेन-समुद्रस्य पारं गन्तुं न पार्यते ।
भव्यैः कालप्रभावेन तदर्थं-श्रुति-सुन्दरः ॥३॥
लम्बकंचुकवंशोऽसौ जातो जन-मनोहरः ।
शोभनाङ्गी सुभगाख्यो देवकी यस्य वल्लभा ॥४॥

तदात्मजः कलावेदी विश्वगुणविभूषितः ।
रामचन्द्राभिधः श्रेष्ठी **मल्हणा** वनिता प्रिया ॥५॥
तत्सूनुर्जनविख्यातः शीलपूजाद्यलंकृतः ।
अभिमन्युर्महादानी तत्प्रार्थनवशादसौ ॥६॥
शृण्वन्ति य इदं भक्त्या भव्याः सुकृतमूर्तयः ।
प्राप्नुवन्ति महाभोगान्तपो(तो)ऽपवर्गमच्युतम् ॥७॥
चारुवाक्यप्रबोधेन कथां संकलनात्मना ।
प्रोच्यते **जिनसेनेन** शृण्वन्तु भुवि कोविदः ॥८॥

अन्तभाग :—

यादवान्वय-विभूषिणी-भुवा दान-पूजन-विनोद-चेतसा ।
कारितेयम**भिमन्यु**ना मुदा सान्वयश्रवणहेतुका कथा ॥३॥
यदुक्तं **जिनसेने**न सूरिणा भव्यबंधुना ।
तन्मया **रामचन्द्रेण** संक्षेपेणैव भाषितम् ॥४॥
यावद्रत्नाकरो लोके यावन्मेरुधुरीशिता ।
तावदयं समासो हि तिष्ठतां महदाशये ॥५॥

इति श्रीहरिवंशपुराणसमासे अभिमन्युश्रेष्ठिनामांकिते नेमिनाथ-परिनिर्वाणवर्णनं पंचमाऽधिकरणं समाप्तं ॥

३१. जयपुराण (ब्रह्म कामराज)

आदिभाग :

श्रीमन्तं श्री(त्रि)जगन्नाथं वृषभं नृसुरार्चितम् ।
भव-भीति-निहन्तारं वन्दे नित्यं शिवाप्तये ॥१॥

अन्तभाग :—

प्रकथ्यतेऽन्वयोऽथात्र ग्रंथकृद्ग्रंथभक्तयः ।
मूलसंघे वरे बीरपारंपर्याच्चतुर्गुणे ॥७६॥

अभूद्गणो बलात्कारः पद्मनन्द्यादिपंचसु ।
नामास्मिन् च मुनिग्रावशारदाबलवाचकात् ॥८०॥
आचार्यात्कुन्दकुन्दाख्यात्तस्मादनुक्रमादभूत् ।
स सकलकीर्तियोगीशो ज्ञानी भट्टारकेश्वरः ॥८१॥
येनो[द्]धृतो गतो धर्मो गुर्जरे वाग्वरादिके ।
निर्ग्रंथेन कवित्वादिगुणेनेवार्हता पुरा ॥८२॥
तस्माद्भुवनकीर्तिः श्रीज्ञानभूषणयोगिराट् ।
विजयकीर्तयोऽभूवन् भट्टारकपदेशिनः ॥८३॥
तेभ्यः श्रीशुभचन्द्रः श्रीसुमतिकीर्तिसंयमी ।
गुणकीर्त्याह्वया आसन् बलात्कारगणेश्वराः ॥८४॥
ततः श्रीगुणकीर्तेर्यः पट्ट-व्योमदिवाकरः ।
वादिनां भूषणो भट्टारकोऽभूद्वादिभूषणः ॥८५॥
तत्पट्टाधीश्वरो विश्वव्यापिनिश्वेतकीर्तिधृत् ।
रामकीर्तिरभूदन्य[द्]रामो वा सुखदैर्गुणैः ॥८६॥

तस्मात्स्वगच्छपतिरस्ति स पद्मनन्दी निष्णातकोकसुखकारकपद्मनंदी ।
भट्टारको जिनमताम्बर-पद्मनंदी श्रीरामकीर्तिपदभूधर-पद्मनंदी ॥८७॥
यः शब्दतर्कपरमागमविद्विरागी रागी शिवे विहित-सर्वतपःसमूहः ।
भात्यत्र वस्त्रपरिवर्जन-जातरूपः काले कलौ परिहृताखिलवस्तुलोभः ॥८८॥

वस्त्राणां त्यजनत्वणोऽस्य यतिनो वंशादिवालस्यविद्-
धृत्वाग्रे समरादिसिंहनृपतिः खड्गं पुरस्येति सः ।
प्राहाऽसिं प्रवितीर्य मां मुनिवर त्वं चाम्बराणि प्रभो
राजन्यं कुरु संप्रगृह्य स तदा स्वाङ्गीकृतान्नाचलत् ॥८९॥

गिरिपुराधिपतिर्नृपपुंगवस्तमभिवीक्ष्यमुदोल्लसते प्रभुः ।
गिरिधरादिमदाससमाह्वयः जलधिरम्बुचयेन विधुं यथा ॥९०॥

तदुपदेशवशेन तदीयसत्प्रवरपुण्यभराकृतसाहसं ।
जयपुराणमिदं तनुबुद्धिना रचितमंगजनाथसुवर्णिना ॥९१॥

नाग्रध्रवंशभव-पंडितजीवराज-मेधाबलात्सकलसौख्यकरकृतोयं ।
जैनालयः स्थपति-बुद्धिभरादपूर्वो ग्रंथानु वा जयभृतो जिनदर्शनोव्यं(?)॥६२
भट्टारकस्य गुरुबन्धुरभूत्प्रसिद्धो मेधावतः सुमतिकीर्तिमुनेर्गुणाव्यः ।
आचार्यमुख्यसकलादिमभूषणाख्यस्तच्छिष्यसूरिरभवत्सनरेन्द्रकीर्तिः॥६३
पूर्णस्य वक्तृकवितादिगुणैरदभ्रैः शिष्यो बभूव नृपमान्यनरेन्द्रकीर्तेः ।
वर्णीस्मराभवपुषः सहितादृकाख्यः शिष्योस्ति तस्य जयसेवककामराजः॥६४

मात्रा-संधि-विभक्ति-लिङ्ग-वचनालंकार-रीत्यादिभिः
प्रोक्तं यद्रहितं सरस्वति मया ग्रंथेत्र सूरीश्वरैः ।
निर्वाह्यो चिदभावतः चम मयि त्वं तद्धिते बालके
मातेवास्फुटवाग्रतं शिवकरा तारुण्यकालाद्रुते(?)॥६५॥
दुःसंध्यादिमलं विनाश्य गुणिनः संवीक्ष्य यूयं बुधा
हर्षतः कविचिल्लवं कुरुत भो ग्रंथद्रुहं स्वात्मनि ।
शुद्धं सज्जनतागुणादुदमिवाकृतादिनैर्मल्यदं
गंभीरं पृथुलं त्रिवर्गसलिलं पंकं शरद्वाशराः(?)॥६६॥

भूयात्पुराणरचनाभवपुण्यतो मे सम्यक्पदेन सहितो भवसौख्यवर्गात् ।
अन्योतथकर्मजनकाद्विमुखस्य दृक्चिचारित्ररत्ननिचयो न हितस्वतोन्यः॥६७॥

अमृतवार्द्धिखभूमिसुदर्शना विजयनामनगाचलमंदिर(?) ।
चपलरूकसमूहैः सहिता द्रुमे(?) जयतु यावदिदं भुवनत्रये ॥६८॥
शिल्पिरुत्पादयत्येव जिनबिम्बं तथा कविः ।
शास्त्रं तन्मान्यतामेति मान्यं तन्मानितं जनैः ॥६९॥

राष्ट्रस्यैतत्पुराणं शकमनुजपतेर्मेदपाटस्य पुर्यां
पश्चात्संवत्सरस्य प्ररचितमटतः पंचपंचाशतो हि ।
अभ्राभ्रात्तैकसंवच्छरनिकरयुजः(१५५५) फाल्गुणे मासि पूर्णे
मुख्यायामौदयायां सुकविविनयिना लालजिष्णोश्च वाक्यात्॥१००॥
सकलकीर्तिकृतं पुरुदेवजं समवलोक्य पुराणमियं कृतिः ।
जयमुनेर्गुणपालसुतस्य च बृहदलं जिनसेनकृतं कृता ॥१०१॥

इति श्रीजयाङ्के जयनाम्नि पुराणे भट्टारक-श्रीपद्मनंदि-गुरूपदेशाद्ब्रह्म-कामराजविरचिते पंडितजीवराजसाहाय्यात् त्रयोदशमः सर्गः ।

३२. कार्तिकेयानुप्रेक्षा-टीका (भ० शुभचन्द्र)

आदिभाग :—

शुभचंद्रं जिनं नत्वाऽनंतानंतगुणार्णवम् ।
कार्तिकेयानुप्रेक्षाष्टीकां वक्ष्ये शुभश्रिये ॥१॥

अन्तभाग :—

श्रीमूलसंघेऽजनि नन्दिसंघो वरो बलात्कारगणः प्रसिद्धः ।
श्रीकुंदकुंदो वरसूरिवर्यो विभाति भाभूषणभूषितांगः ॥२॥
तदन्वये श्रीमुनिपद्मनन्दी ततोऽभवच्छ्रीसकलादिकीर्तिः ।
तत्पट्टधारी भुवनादिकीर्तिः श्रीज्ञानभूषो वरचित्तभूषः ॥३॥
तदन्वये श्रीविजयादिकीर्तिस्तत्पट्टधारी शुभचंद्रदेवः ।
तेनेयमाकारि विशुद्धटीका श्रीमत्सुमत्यादि-सुकीर्तिकीर्तिः ॥४॥
सूरिश्रीशुभचंद्रेण वादि-पर्वत-वज्रिणा ।
त्रिविद्येनानुप्रेक्षाया वृत्तिर्विरचिता वरा ॥५॥
श्रीमद्विक्रमभूपतेः परिमिते वर्षे शते षोडशे
माघे मासि दशाग्रवन्हिसहिते(१६१३) ख्याते दशम्यां तिथौ ।
श्रीमच्छ्रीमहिसार-सारनगरे चैत्यालये श्रीगुरोः
श्रीमच्छ्रीशुभचंद्रदेव-विहिता टीका सदा नन्दतु ॥६॥
वर्णिश्रीक्षेमचंद्रेण विनयेन कृतप्रार्थना ।
शुभचंद्रगुरो स्वामिन् कुरु टीकां मनोहरां ॥७॥
तेन श्री शुभचन्द्रेण त्रैविद्येन गणेशिना ।
कार्तिकेयानुप्रेक्षाया वृत्तिर्विरचिता वरा ॥८॥
तथा साधुसुमत्यादिकीर्तिना कृतप्रार्थना ।
सार्थीकृता समर्थेन शुभचन्द्रेण सूरिणा ॥९॥

भट्टारक-पदाधीशा **मूलसंघे** विदांवराः ।
रमा-वीरेन्दु-चिद्रूप-गुरवो हि गणेशिनः ॥१०॥
लक्ष्मीचंद्रगुरुः स्वामी शिष्यस्तस्य **सुधीयशाः** ।
वृत्तिर्विस्तारिता तेन **श्रीशुभेन्दुप्रसादतः** ॥११॥

इति स्वामिकार्तिकेयानुप्रेक्षा-टीकायां त्रैविद्यविद्याधर-षड्भाषाकवि-चक्रवर्तिभट्टारकश्रीशुभचंद्र-विरचितायां धर्मानुप्रेक्षायां द्वादशोऽधिकारः ॥

३३. चन्द्रप्रभचरित (भ० शुभचन्द्र)

आदिभाग :—

श्रीवृषं **वृषभं** वन्दे वृषदं वृषभाङ्कितं ।
वृषभादिसमाश्लिष्ट-पादद्वितयपंकजं ॥१॥

(इसके आगे चन्द्रप्रभादिकी स्तुतिके आठ पद्य हैं ।)

ज्ञानभूषान् **जिनान् शेषान्** सदर्थप्रतिपादकान् ।
मुक्तयङ्गनासमाश्लिष्टानीडेऽनन्तसुशर्मणे ॥१०॥
सप्तभंगीविधिं प्राप्तां **गां जैनीं** वैष्णवीं[1] स्तुवे ।
यस्य प्रसादतः सर्वे बोबुध्यन्ते जनाः समे ॥११॥
गुरूनखिलसन्मार्ग-द्योतकान् ज्ञानभूषणान् ।
विजये कीर्तिसंप्राप्तांस्तोष्टुवीमि स्वसिद्धये ॥१२॥
जिनसेनादयः पूर्वसूरयः सूरसन्निभाः ।
मया संस्ते शिवं दद्युः परमात्मध्यानवेदिनः ॥१३॥
तदध्वनि विवक्षामो गंतु शक्तिविवर्जिताः ।
स्थाने तत्सूरसंद्योत्ये मार्गे गच्छंति तारकाः ॥१४॥

अन्तभाग :—

श्रीमूलसंघेऽजनि **पद्मनन्दी** तत्पट्टधारी **सकलादिकीर्तिः** ।
तत्पट्टधारी **भुवनादिकीर्तिर्जीयाच्चिरं** धर्मधुरीणदक्षः ॥५६॥

१ व्यापनशीलां ।

तत्पट्टेऽजनि बोधबुद्धिर्निखिलन्यायादिशास्त्रार्थक-
श्चिद्रूपामृतपानलालसमतिः श्रीज्ञानभूपो जयी।
जीयात् पंचमकालकल्पशिखरी तत्पट्टधारी चिरं
श्रीमच्छ्रीविजयादिकीर्तिमुनिपो जीयाच्च शास्त्रार्थवित् ॥५७॥
सोमप्रभः सोमसमानतेजाः श्रीसोमसल्लांछन इद्धकांतिः।
सोमः सुमूर्तिश्च करोतु साम्यं श्रीशौभचंद्रस्य सुयोगिनः सः ॥५८॥
यः संश्रृणोति भजते निखिलं चरित्रं
यः कामयति प्रथयतीन्दुनिभस्य भावात्।
यः पाठयन् पठयति जिनभक्तिरागात्
स सिद्धिभीरुमुखपंकजमश्नुते हि ॥५ ॥
श्लोकाः षष्ठ्यधिकाः सर्वे शतपंचदशामलाः।
प्रमाणमस्य विज्ञेयं लेखकैः पाठकैः सदा ॥६०॥

इति श्रीचन्द्रप्रभचरिते भट्टारकश्रीशुभचन्द्रविरचिते भगवतो निर्वाण-गमनो नाम दशमो सर्गः।

३४. पार्श्वकाव्य-पंजिका (भ० शुभचन्द्र)

आदिभाग :—

श्रीपार्श्वं पार्श्वमानम्य सुपार्श्व-निहितोत्तमम्।
पद-वैषम्य-संभेत्रीं वक्ष्ये तत्काव्यपंजिकाम् ॥१॥

अन्तभाग :—

श्रीमूलसंघेऽजनि नन्दिसंघस्तत्राभवच्छ्रीसकलादिकीर्तिः।
शास्त्रार्थकारी खलु तस्य पट्टे भट्टारकः श्रीभुवनादिकीर्तिः ॥१॥
तत्पट्टोदयपर्वते रविरभूत् श्रीज्ञानभूषो यतिः
मिथ्यामार्ग[महा]न्धकारतरणिश्चारित्रचूडामणिः।
सम्यक्स्वीकृतशास्त्रसद्व्रतभरः सच्छ्रामलीलायुतः
पायाद्वो भवदुःखतस्त्रिजगति प्रख्यातनामा मुनिः ॥२॥

प्रकटतत्पदपंकजभानुमान् सकलतार्किकवंदितपद्युगः ।
विजयकीर्ति[गुणी] गुणसागरः स भवताम[व]ताद्यतिनायकः ॥३॥

तदीय-पट्ट-पर्वत-प्रचण्ड-चण्डदीधितिः
स्फुरद्यशाः सुधीघनः कृपापरः परोदयः ।
सुनव्य-भव्य-गद्य-पद्य-गीति-रीति-वेदकः
सुशौभचन्द्रसन्मुनिर्गणाधिपः पुनातु नः ॥४॥
वादविद्याविनोदेन रञ्जितानेकभूपतिः ।
सौभद्रः(शौभेन्दुः) मे श्रियं देयाद्वाचा तर्पित-सज्जनः ॥५॥

विजित-वादिगणो गतमत्सरः सकलसूरिगुणोदयसुन्दरः ।
शममयः सुकजः सुविदांवरः सुशुभचन्द्र गुरुर्गुणबंधुरः ॥६॥

दुर्व्याख्येदं मंदधीभिः पार्श्वकाव्यं सुभाकरम ।
मत्वेति मतिमांस्तस्य पंजिकामकरोद्गणी ॥७॥

श्रीभूषणः स्वस्य गुरोः सुशिष्यः सूरिः स्वयं शास्त्रविदां मतश्च ।
तदा······च्छ्रीशुभचन्द्रदेवः चक्रे सुपंजी जिनकाव्यवाण्याः ॥८॥

वर्णिश्रीपालनामा मतिमतमहितो मार्गसर्गो निसर्गा-
दग्रस्त्रैविद्यविद्याविधिविकचसरो जातभास्वद्विवस्वान ।
सार्थं ग्रंथार्थवेत्ता विशदमिदमरं पुस्तकं प्राक् सुपार्श्व-
काव्यस्य वै सुपंज्याः लिखितललितवाक् वाग्मिनां चोपजीव्यः॥९॥

पंजिकेयं चिरं चित्ते स्थेयात्साद्विदुषां स्थिरम् ।
कृता श्रीशुभचन्द्रेण श्रीभूषणसमाग्रहात ॥१०॥
श्रीपार्श्वपूज्यपादो गणिगणविनुतः श्रीप्रभाचन्द्रदेवः
सिद्धः श्रीवर्धमानो वरविजययशाः ज्ञानभूषोऽकलंकः ।
दिव्यश्रीभूषणोमत्रर्विधिविदुषां शाश्वतश्रीशुभेन्दुः
श्रीपालः पातु पापात्प्रमितिपरिणतिर्वादिराजश्च युष्मान ॥११॥

इति श्रीपार्श्वनाथ-काव्य- जिका समाप्ता ।

३५. श्रेणिकचरित्र (भ० शुभचन्द्र)

आदिभाग :—

श्रीवर्द्धमानमानंदं नौमि नानागुणाकरं ।
विशुद्धध्यानदीप्तार्चिहु तकर्म्मसमुच्चयं ॥१॥
बाल्येपि मुनि-संदेह-निर्नाशाद्यो जिनेश्वरः ।
सन्मतित्वं समापन्नः सन्मत्याख्यां समाश्रितः ॥२॥
अमराहिफणामर्द्दान्महावीरसुनामभाक् ।
बाल्ये यो बलतां प्राप्तो वीराणां वीरतां गतः ॥३॥
जरत्तृणमिवात्यंतं राज्यं प्राज्यं नरेश्वरं(च नश्वरं) ।
मत्वा त्यक्त्वाश्रितो दीक्षां यो वीरो विश्ववंदितः ॥४॥

अन्तभाग :—

जयतु जितविपक्षो मूलसंघः सुपक्षो
हरतु तिमिरभारं भारती-गच्छबारः (बाणः=प्रकाशः?) ।
नयतु सुगतमार्गे शासनं शुद्धवर्गे
जयतु च शुभचंद्रः कुंदकुंदो मुनीन्द्रः ॥१७॥
तदन्वये श्रीमुनिपद्मनंदी विभाति भव्याकर-पद्मनन्दी ।
शोभाधिशाली वरपुष्पदंतः सुकांति-संभिन्न-सुपुष्पदन्तः ॥१८॥
पुराण-काव्यार्थ विदांवरत्वं विकाशयन्मुक्तिविदांवरत्वं ।
विभातु वीरः सकलाद्यकीर्तिः कृतापकेनौ(?) सकलाद्यकीर्तिः ॥१९॥
भुवनकीर्तियतिर्जयताद्यमी भुवनपूरितकीर्तिचयः सदा ।
भुवनबिम्बजिनागमकारणं भव-नगाम्बुद-वातभरः परः ॥२०॥
तत्पट्टोदयपर्वते रविरभूद्भव्याम्बुजं भासयन्
सन्नेत्रास्त्रहरं तमो विघटयन्नानाकरैर्भासुरः ।
भव्यानां सुगतश्च विग्रहमतः श्रीज्ञानभूषः सदा
चित्रं चंद्रकसंगतः शुभकरः श्रीवर्द्धमानोदयः ॥२१॥

जगति विजयकीर्तिः पुण्यमूर्तिः सुकीर्तिः
जयतु च यतिराजो भूमिपैः स्पृष्टपादः ।
नय-नलिन-हिमांशुर्ज्ञानभूषस्य पट्टे
विविध-परविवादि-क्ष्माधरे वज्रपातः ॥२२॥
तच्छिष्येण शुभेन्दुना शुभमनः श्रीज्ञानभावेन वै
पूतं पुण्यपुराणमानुषभवं संसारविध्वंसकः ।
नो कीर्त्या व्यरचि प्रमोहवशतो जैने मते केवलं
नाहंकारवशात्कवित्तमदतः श्रीपद्मनाभेहितं ॥२३॥
इदं चरित्रं पठतः शिवं वै श्रोतुश्च पद्मेश्वरवत्पवित्रं ।
भविष्णु संसारसुखं नृदेवं संभुज्य सम्यक्त्वफलप्रदीपं ॥२४॥
चंद्राऽर्क-हेमगिरि-सागर-भू-विमानं
गंगानदीगमन-सिद्धशिलाश्च लोके ।
तिष्टंति यावदभितो वरमर्त्यशेवा(देवा ?)
स्तिष्ठंतु कोविदमनोम्बुजमध्यभूताः ॥२५॥
इति श्रीश्रेणिकभवानुबद्ध-भविष्यत्पद्मनाभपुराणे पंचकल्याणवर्णनं नाम पंचदशः पर्वः ॥१५॥

३६. पाण्डवपुराण (भ० शुभचन्द्र)

आदिभाग :—

सिद्धं सिद्धार्थसर्वस्वं सिद्धिदं सिद्धिसत्पदं ।
प्रमाण-नय-संसिद्धं सर्वज्ञं नौमि सिद्धये ॥१॥
वृषभं वृषभं भांतं वृषभांकं वृषोन्नतं ।
जगत्सृष्टि-विधातारं वन्दे ब्रह्माणमादिमं ॥२॥
चन्द्राभं चन्द्रशोभाढ्यं चन्द्रार्च्यं चन्द्रसंस्तुतं ।
चन्द्रप्रभं सदाचन्द्रमीडे सच्चन्द्रलांछनं ॥३॥

शान्तिं शान्तेर्विधातारं सुशांतं शांतकिल्विषम् ।
तन्नमामि निरस्ताऽघं मृगांकं षोडशं जिनम् ॥४॥
नेमिर्धर्मरथेनेमिः शास्तु मंशितशासनः ।
जग(जीया)जगतत्रयीनाथो निर्जितानंगसम्मदः ॥५॥
वर्धमानो महावीरो वीरः सन्मति-नामभाक् ।
स पातु भगवान् विश्वं येन बाल्ये जितः स्मरः ॥६॥
गौतमो गौतमो गीष्पो गणेशो गणनायकः ।
गिरः गणनतो नित्यं भातु भा-भारभूषितः ॥७॥
युधिष्ठिरं कर्मशत्रु-युधिस्थिरं स्थिरात्मकं ।
दधे धर्मार्थसंसिद्धं मानसे महित मुदा ॥८॥
भीमं महामुनिं भीमं पापारिक्षयकारणे ।
संसारासातशान्त्यर्थं दधे हृदि धृतोन्नतिं ॥९॥
अर्जुनस्य प्रसिद्धस्य विशुद्धस्य जितात्मनः ।
स्मरामि स्मरमुक्तस्य स्मररूपस्य सुस्मृतेः ॥१०॥
नकुलो यै सदा देवैः सेवितः शुद्धशासनः ।
सहदेवो बली कौल्यमलनाशी विभाति च ॥११॥
भद्रबाहुर्महाभद्रो महाबाहुर्महातपाः ।
स जीयात् सकलं येन श्रुतं ज्ञानं कलौ विदा ॥१२॥
विशाखो विश्रुता शाखा सुशाखो यस्य पातु मां ।
स भूतले मिलन्मौलिहस्तामूलोक-संस्तुतः ॥१३॥
कुन्दकुन्दो गणी येनोर्जयंतगिरिमस्तके ।
सोऽवताद्वादिता ब्राह्मी पाषाणघटिता कलौ ॥१४॥
समन्तभद्रो भद्रार्थो भातु भारतभूषणः ।
देवागमेन येनाऽत्र व्यक्तो देवागमः कृतः ॥१५॥
पूज्यपादः सदा पूज्य-पादः पूज्यैः पुनातु मां ।
व्याकरणार्णवो येन तीर्णो विस्तीर्णसद्गुणः ॥१६॥

अकलंकोऽकलंकः स कलौ कलयतु श्रुतं ।
पादेन ताडिता येन मायादेवी घटस्थिता ॥१७॥
जिनसेनो यतिर्जीयाज्जिनसेनं कृतं वरं ।
पुराणपुरुषाख्यार्थं पुराणं येन धीमता ॥१८॥
गुणभद्रभदन्तोऽत्र भगवान् भातु भूतले ।
पुराणादौ प्रकाशार्थं येन सूर्यायितं लघु ॥१९॥
तत्पुराणार्थमालोक्य धृत्वा सारस्वतं श्रुतम् ।
मानसे पाण्डवानां हि पुराणं भारतं ब्रुवे ॥२०॥

× × × ×

वीरो विश्वगुणाश्रितो गुणगणा वीरं श्रिता सिद्धये ।
वीरेणैव विधीयते व्रतचयो वीराय स्वस्त्यस्तु च ॥
वीराद्वर्तत एव धर्मनिचयो वीरस्य सिद्धिर्वरा ।
वीरे याति जगत्त्रयं जितमदं संजायते निश्चितं ॥१५४॥

इति श्रीपाण्डवपुराणे महाभारतनाम्नि भट्टारकश्रीशुभचन्द्रप्रणीते ब्रह्मश्रीपाल-साहाय्यसापेक्षे श्रेणिकस्य जिनवन्दनोत्साहवर्णनं नाम प्रथमं पर्व ॥१॥

अन्तभाग :—

श्रीमूलसंघेऽजनि पद्मनन्दी तत्पट्टधारी सकलादिकीर्तिः ।
कीर्तिः कृता येन च मर्त्यलोके शास्त्रार्थकर्त्री सकला पवित्रा ॥१६७॥
भुवनकीर्तिरभूद्भुवनाधिपैर्भुवनभासनचारुमतिः स्तुतः ।
वरतपश्चरणोद्यतमानसो भवभयाहिखगेट् क्षितिवत् क्षमी ॥१६८॥
चिद्रूपवेत्ता चतुरश्चिरन्तनश्चिद्भूषणश्चर्चितपादपद्मकः ।
सूरिश्च ··न्द्रादिचयैश्चिनोतु वै चारित्रशुद्धिं खलु नः प्रसिद्धिदां ॥१६९॥
विजयकीर्तियतिर्मुदितात्मको जितता(?)ऽन्यमतः सुगतैः स्तुतः ।
अवतु जैनमतः सुमतो मतो नृपतिभिर्भवतो भवतो विभुः ॥१७०॥
पट्टे तस्य गुणाम्बुधिव्रतधरो धीमान् गरीयान् वर

श्रीमच्छ्रीशुभचन्द्र एष विदितो वादीभसिंहो महान ॥१७१॥
तेनेदं चरितं विचारसुकरं चाकारि चंचद्रुचा ।
पांडोः श्रीशुभसिद्धिसातजनकं सिद्धयै सुतानां मुदा ॥१७२॥
चन्द्रनाथचरितं चरितार्थं पद्मनाभचरितं शुभचन्द्रं ।
मन्मथस्य महिमानमतंद्रो जीवकस्य चरितं च चकार ॥१७३॥
चन्दनायाः कथा येन दृब्धा नन्दीश्वरी तथा ।
आशाधरकृतार्चायाः वृत्तिः सद्वृत्तशालिनी ॥१७४॥
त्रिंशच्चतुर्विंशतिपूजनं यः सद्वृद्धसिद्धार्चनमाव्यधत्त ।
सारस्वतीयार्चनमत्र शुद्धं चिंतामणीयार्चनमुच्चरिष्णुः ॥१७५॥
श्रीकर्मदाहविधिबंधुरसिद्धसेवां नानागुणौघ-गणनाथसमर्चनं च ।
श्रीपार्श्वनाथवरकाव्यसुपंजिकां च यः संचकार शुभचन्द्रयतीन्द्रचन्द्रः१७६

उद्यापनमदीपिष्ट पल्योपमविधेश्च यः ।
चारित्रशुद्धितपसश्च चतुस्त्रिद्विदशात्मनः ॥१७७॥

संशयिवदनविदारणमपशब्दसुखडनं परं तर्कं ।
सतत्त्वनिर्णयं च वरस्वरूपसंबोधिनीं वृत्तिं ॥१७८॥
अध्यात्मपद्यवृत्तिं सर्वार्थापूर्वसर्वतोभद्रम् ।
योऽकृत सद्व्याकरणं चिन्तामणिनामधेयं च ॥१७९॥
कृता येनाऽङ्गप्रज्ञप्तिः सर्वाङ्गार्थ-प्ररूपिका ।
स्तोत्राणि च पवित्राणि षड्वादाः श्रीजिनेशिनां ॥१८०॥

तेन श्रीशुभचन्द्रदेवविदुषा सत्पाण्डवानां परं
दीप्यद्वंशविभूषणं शुभभगभ्राजिष्णुशोभाकरं ।
शुभद्भारतनाम निर्मलगुणं सच्छब्दचिन्तामणि
पुष्यत्पुण्यपुराणमत्र सुकरं चाकारि प्रीत्या महत् ॥१८१॥

श्रीपालवर्णिना येनाकारि शास्त्रार्थसंग्रहे ।
साहाय्यं स चिरं जीयाद्वरविद्या-विभूषणः ॥१८२॥

× × × ×

श्रीमद्विक्रमभूपतेर्द्विकहते स्पष्टाष्टसंख्ये शते
रम्येऽष्टाधिकवत्सरे(१६०८) सुखकरे भाद्रे द्वितीया-तिथौ।
श्रीमद्वाग्वरनीवृतीदमतुले श्रीशाकवाटे पुरे
श्रीमच्छ्रीपुरुधाम्नि च विरचितं स्थेयात्पुराणं चिरं ॥१८६॥

इति श्रीपांडवपुराणे भारतनाम्नि भट्टारक-श्रीशुभचन्द्र-प्रणीते ब्रह्म-श्रीपालसाहाय्यसापेक्षे पांडवोपसर्गसहन-केवलोत्पत्ति-मुक्ति-सर्वार्थसिद्धिगमन-श्रीनेमिनिर्वाणगमन-वर्णनं नाम पंचविंशतितमं पर्व ॥२५॥

३७. जीवंधरचरित्र (भ० शुभचन्द्र)

आदिभाग :—

श्रीसन्मतिः सतां कुर्यात्समीहितफलं परं।
येनाप्येत महामुक्तराजस्य वरवैभवः ॥१॥

(इसके बाद सिद्धादि परमेष्ठि-स्मरणके ४ पद्य हैं।)

गौतमं धर्मपारीणं पूज्यपादं प्रबोधकं।
समंतभद्रमानंदमकलंकं गुणाकरं ॥६॥
जिनसेनं शुभासीनं ज्ञानभूषं परं गुरुं।
शुभचंद्रं प्रणम्योच्चैर्वक्ष्ये श्रीजीवकोद्भवं ॥७॥

इति श्रीजीवंधरस्वामिचरिते काष्ठांगार-वर्णनो नाम प्रथमोल्लासः।

अन्तभाग :—

ये(ते)षां धर्मकथासुयोगमुनिधिज्ञानप्रमोदागमा—
चार-श्रीशुभचंद्र एष भविनां संसारतः संभवं।
मार्गादर्शनकोविदं हतहितं तामस्यभारं सदा
छिंद्याद्वाक्किरणैः कथंचिदतुलैः सर्वत्र सुख्यापिभिः ॥८५॥

श्रीमूलसंघो यतिमुख्यसेव्यः श्रीभारतीगच्छविशेषशोभः।
मिथ्यामतध्वान्त-विनाशदक्षो जीयाच्चिरं श्रीशुभचन्द्रभासी ॥८६॥

श्रीमद्विक्रमभूपतेर्वसुहतद्वैतेशते[1600] सप्तह[7](के?)
वेदै[4]र्न्यूनतरे समे (१६०३ ?)शुभतरे मासे वरेण्ये शुचौ।
वारे गीष्पतिके त्रयोदशतिथौ सन्नूतने पत्तने
श्रीचंद्रप्रभधाम्नि वै विरचितं चेदं मया तोषतः ॥८७॥
आचंद्रार्कं चिरं जीयाच्छुभचंद्रेण भाषितं।
चरितं जीवकस्याऽत्र स्वामिनः शुभकारणं ॥८८॥

इति श्रीमुमुक्षु-शुभचंद्रविरचिते श्रीमज्जीवंधरस्वामिचरिते जीवंधर-स्वामिमोक्ष-गमनवर्णनं नाम त्रयोदशो लंभः ॥१३॥

३८. चंदनाचरित (भ० शुभचन्द्र)

आदिभाग :—

चकार करुणाक्रांतः कृतिं कर्मटकर्मणः।
यस्तं केवलिनं कामं चेक्रियेहं कृतार्थकं ॥१॥
सिद्धध्यानाः सदासिद्धाः सिद्धिवृद्धिसमृद्धयः।
एधंते स्म विशुद्धा नः शुद्धिं ददतु धर्मिणां ॥२॥

अन्तभाग :—

जयति जितविपक्षः पालितानेकपक्षः कृतसकलसुशिक्षः प्राप्तदीप्यत्सुदक्षः।
विहितसमितिरक्षो मूलसंघाग्रलक्षः जिनपदकरपक्षो ध्वस्तपापाकरेक्षः॥९३॥
स्वगुरुविजयकीर्तिः प्रस्फुरत्सोमकीर्ति-
र्भवजलधिसुतूर्तिः शास्त्रा(श्चवार)ब्धिपूर्तिः।
जिनपतिमतवर्तिर्निश्वदुःखारिहूर्ति-
र्जयतु जनसुभूतिर्नष्टकष्टोत्तरार्तिः ॥९४॥
शास्त्राण्यनेकान्यवगाहय कृत्वा पुराणसल्लक्षणकानि भूरि।
सच्चंदनाचारुचरित्रमेतच्चकार च श्रीशुभचन्द्रदेवः ॥९५॥
श्रीज्ञानभूषणपदे विजयादिकीर्तिस्तत्पादपंकजमधुव्रत एव सेव्यः।
श्रीमूलसंघपदभृत् शुभचन्द्रदेवः शीलेशशीलमहिमानमिमं चकार ॥९६॥

अकृत-सुकृत-कर्ता सर्व्व-सावद्य-हर्ता
शम-दम-यम-हर्ता(भर्त्ता) शौभचन्द्रः सुभर्ता ।
चरितममलवर्ता चंदनायाश्च पर्ता
जनन-जलधिभर्ता कर्मकामारिशर्ता ॥६७॥
शीलं सर्वगुणान्वितं वरगुणाः शीलं बुधाः कुर्वते
शीलेनैव समाप्यते परगुणः स्वस्त्यस्तुशीलाय वै ।
शीलात्सद्व्रतसंचयः सममयाच्छीलस्य सर्वे गुणाः
शीले चित्तमहं दधे धृतिधरे हे शील मां पाहि वै ॥६८॥
श्रीचंदनायाश्चरितं पवित्रं ये चिन्वते चेतसि चित्स्यभावाः ।
ईक्षंत एवं जगतः समक्षं मोक्षं तके क्षीणविपक्षपक्षाः ॥२६६॥
वाग्वरे वाग्वरे देशे वाग्वरैर्विदिते क्षितौ ।
चंदनाचरितं चक्रे शुभचंद्रो गिरौपुरे ॥२००॥
·ा शीलतो जयति चंदनबालिकेयं वीरस्य संसदि समाप जयं जयंती ।
म्मारिपक्षमखिलं च समेष्यतीद्धं मोक्षं परं परमका दशकांगवेत्री ॥२०१॥
इति श्रीशीलविलासे चंदनाचरिते भट्टारक-श्रीशुभचंद्र-विरचिते
~ दनार्यकादिभवान्तरवर्णनं नाम पंचमपर्व ॥ इति चंदनाचरित्रं संपूर्णम्

३६. प्राकृतलक्षण-सटीक (भ० शुभचन्द्र)

आदिभागः—

श्रीज्ञानभूषणं देवं परमात्मानमव्ययं ।
प्रणम्य बालसवुद्धयै वक्ष्ये प्राकृतलक्षणं ॥१॥

अन्तभाग :—

यदुक्तं सूत्रतन्त्रेऽस्मिन् शब्दचिन्तामणौ स्फुटं ।
विचार्य बुद्धिसंसिद्धयै शुभचन्द्रेण सूरिणा ॥१॥
श्रीमूलसंघे शिवसाधुसंघे श्रीकुन्दकुन्दान्वयपद्मसूर्यः ।
निरस्तमोहः सकलादिकीर्तिर्जीयात्सदा श्रीभुवनादिकीर्त्तिः॥२॥

तत्पट्टपद्मे रविवद्विभाति विभासुरो भोगभवारिभेदी ।
श्रीज्ञानभूषो नरलोकलोक्यो लोकाग्रलोकोत्तमलोकनेच्छुः ॥३॥
विजयकीर्तियतिर्जगतां गुरुर्गरिमगीर्मदितांगिगणो गणी ।
गिरति गां गुणिनो गतयेऽग्रणीः सुगुरुणां रविगुः समगुः समः॥४॥
षट्तर्कचंचुचरणोद्धतवादिमत्तमातङ्गकुम्भमदभेदनपंचतुण्डः ।
श्रीमच्छुभेन्दुगणपो गुणगेय(?)कीर्तिश्चिन्तामणिं विशदशब्दमयं चकार॥५॥
शुभचन्द्रमुनीन्द्रेण लक्षणाब्धिं विगाह्य वै ।
प्राकृतं लक्षणं चक्रे शब्दचिन्तामणौ स्फुटं ॥६॥
शब्दचिन्तामणिं धीमान् योऽध्येति धृतिसिद्धये ।
प्राकृतानां सुशब्दानां पारं याति सुनिश्चितं ॥७॥
प्राकृतं लक्षणं रम्यं शुभचन्द्रेण भाषितं ।
योऽध्येति वै सुशब्दार्थधनराजो भवेन्नरः ॥८॥

इति मुमुक्षु-भट्टारक-श्रीज्ञानभूषणपट्टोदयाचलद्युमणि-सकलतार्किकचूडामणि-भट्टारकश्रीविजयकीर्त्तिपट्टप्रकटत्रैविद्यविद्याविशदभट्टारकश्रीशुभचंद्रविरचितायां स्वोपज्ञशब्दचिन्तामणिवृत्तौ तृतीयस्याऽध्यायस्य चतुर्थपादः समाप्तः।

समाप्तेदं प्राकृतव्याकरणम् ॥

४०. अध्यात्मतरङ्गिणी (भ० शुभचन्द्र)

आदिभाग :—

जयतु जितविपक्षः पालिताशेषशिष्यो विदितनिजस्वतत्त्वश्चोदितानेकसत्त्वः ।
अमृतविधुयतीशः कुन्दकुन्दो गणेशः श्रुतसुजिनविवादः स्याद्विवादाधिवादः ॥१॥

अन्तभाग :—

सम्यक्संसारवल्लीवलय-विदलने मत्तमातङ्गमानी
पापातापेभकुम्भोद्गमनकराकुण्ठकण्ठीरवारिः
विद्वद्विद्याविनोदाकलितमतिरहो मोहतामस्य सार्थो(?)
चिद्रूपोद्भासिचेता विदितशुभयतिर्ज्ञानभूषस्तु भूयात् ॥२॥

विजयकीर्तियतिर्जगतां गुरुर्विधृतधर्मधुरोद्धृतिधारकः ।
जयतु शासन-भासन-भारतीमयमतिर्दलितापरवादिकः ॥३॥
शिष्यस्तस्य विशिष्टशास्त्रविशदः संसारभीताशयो
भावाभावविवेकवारिधितरस्स्याद्वादविद्यानिधिः ।
टीकां नाटकपद्यजां वरगुणाध्यात्मादिस्रोतस्विनीं
श्रीमच्छ्रीशुभचन्द्र एष विधिवत्संचकरीति स्म वै ॥४॥
त्रिभुवनवरकीर्तेर्जातरूपात्तमूर्तेः शमदममयपूर्तेराग्रहान्नाटकस्य ।
विशदविभववृत्तौ वृत्तिमाविश्चकार गतनयशुभचन्द्रो ध्यानसिद्धयर्थमेव ॥५॥
विक्रमवरभूपालात्पंचत्रिशते त्रिसप्ततिव्यधिके(१५७३) ।
वर्षेऽप्याश्विनमासे शुक्ले पक्षेऽथ पंचमी-दिवसे ॥६॥
रचितेयं वरटीका नाटक-पद्यस्य पद्ययुक्तस्य ।
शुभचन्द्रेण सुजयताद्विद्यासवलं(?) न पद्मांकात् ॥७॥
········पातनिकाभिश्च भिन्नभिन्नाभिः ।
जीयादाचन्द्रार्कं स्वाऽध्यात्मतरङ्गिणी टीका ॥८॥

इति कुमतद्रुममूलोन्मूलन-महानिर्झरणीश्रीमदध्यात्मतरंगिणी टीका समाप्ता । समाप्तश्चायं ग्रन्थः ।

४१. कर्णामृतपुराण (केशवसेन सूरि)

आदिभाग :—

लीलावासमलक्ष्मं च श्रीपतिं परमेश्वरं ।
सुलक्ष्मं ज्ञानिनां वंदे पुरुं पावन-शासनं ॥१॥
मातरं जगतां ज्ञान-विधान-परमोदयां ।
ध्यायामि मनसि प्रायो गिरं श्रीशर्महेतवे ॥२॥
अज्ञानतिमिरं येन दारितं ज्ञान-दीप्तिभिः ।
मित्रेणेव सदा तस्मै गुरुवे स्यान्नमस्कृतिः ॥३॥

(आगे सज्जन, खल, वक्ता, श्रोताके लक्षण १० पद्योंमें है)

दानिनां चक्रिणां तीर्थंकृतां शीलवतां सतो ।
राम-कृष्ण-मनोज्ञानां कथा तच्छास्त्रमुच्यते ॥१४॥
अमृताख्यपुराणेऽस्मिन कर्णसाकल्यमुच्यते ।
मरीचिभवप्राचुर्यांकुरः सम्यक्त्वसत्फलं ॥१५॥
बहुनां प्रेमयुक्तानां दानशीलवतां व्रतं ।
कामदेवचरित्रं श्रीश्रीपालकथानकं ॥१६॥
तपःपूजा-सुभावानां कुभावानां कथानकं ।
शूराणां विरहाकान्तदेहिनो वृत्तमित्यलं ॥१७॥
[त्रिभिः] कुलकं । इति पुराणद्वारं ॥

अगाधोऽयं पुराणाब्धिर्मतिर्मेऽल्पा प्रवर्तते ।
तथापि तर्तुमिच्छामि गगनं पक्षिराडिव ॥१८॥
सिद्धान्त-नीतिसारादि-पुराणोद्भू तसन्मतिं ।
विधास्यामि प्रसन्नार्थं ग्रंथं संदर्भगर्भितं ॥१९॥
खंत्राग्निरसबाणेन्दुश्लोकसंख्या(१५६३००) प्रसूत्रिता ।
नीतिसारपुराणस्य सिद्धसेनादिसूरिभिः ॥२०॥
पूर्वाचार्योद्धृतं तत्त्वं निरीक्ष्य परमात्मनः ।
प्रसादेन सदानन्दं करिष्यामि मनोज्ञ(ग)तं ॥२१॥

× × × ×

इति श्रीकर्णामृतपुराणे धर्मशास्त्रे तत्त्वोद्धारे भ०श्रीरत्नभूषणाम्नायालंकार-ब्रह्मश्रीमंगलाग्रज-श्रीपूरमल्लापति-स्थविराचार्य-श्रीकेशवसेन-विरचिते ब्रह्मवर्द्धमानसहाय्यसापेक्षे श्रीभगवदागमनं नाम प्रथमः स्कन्धः ॥१॥

अन्तभाग :—

काष्ठासंघे गरिष्ठे प्रवलमुनियुते रामसेनो भदन्तः
श्रीमानासीत् क्रमेणेन्दुकविशदयशा रत्नभूषाभिधानः ।
तत्पादांभोजभृंगो विमलतरमतिः श्रीजयाद्यन्तकीर्ति-
रास्ते विद्वज्जनानां प्रथम इह जिनाराधनैकस्वभावः ॥८८॥

वाग्वरे जनपदे च वीरिका-कान्त-हर्ष इति नाम तत्सुतः ।
कृष्णदासमुनिपो विराजते प्रेमपूरपरमो दयान्तरः ॥८९॥
नीतिसंग्रहपुराणसागरादुद्धृतोऽखिलहिताय मेऽर्घ्यं(?) ।
धर्मशास्त्रमणिरुत्तमोऽघहाः श्राव्य एव नितरां मनस्विभिः ॥९०॥
केवलं सुमनसा मया कृतो ग्रन्थ एष परमार्थबुद्धितः ।
श्रीपुराणगुरुप-प्रसादतः कृष्णदासकविवेधसा शुभः ।९१॥
मालवे जनपदे मनोरमे भाति भूतिलकभागा पुरी ।
स्वर्गपस्य भ्रंशपूरिव पावना परमपावनैर्नरः ॥९२॥
तत्र पार्श्वजिनालये शुभे माघमासि उडुनविवसारे(?) ।
सत्तिथौ प्रतिपदि प्रभासिनाऽकार्ययः(?) च कविता यथागमः ॥९३॥
शोधयंतु निपुणा इदं सदा कर्णदेवसुपुराणमादरात् ।
ये विरोधरहिता विचारिणः सन्तु तेल(?) हितकारणाम् ॥९४॥
लेलिहान-वसु-षड्-विधुप्रमे(१६८८) वत्सरे विविधभावसंयुतः ।
एष एव रचितो हिताय मे ग्रंथ आत्मन इहाखिलांगिनां ॥९५॥
आकर्णयन्ति खलु ये सुनरा नतांगा श्रीकर्णभूपतिपुराणमिदं पवित्रं ।
पुत्रं लभंत इह ते परमां रमां च कृष्णेन चन्द्रवदनेन निरूपितार्थे ॥९६॥
श्लोकसंख्या समाख्याता खखाम्बरचतुःप्रमा(४०००) ।
सदोदयैः सतां श्रेष्ठैः केशवाद्यन्तसूरिभिः ॥९७॥
आगंगासागरं यस्य दक्षिणे गूर्जरे तथा ।
मालवे मेदपाटे च यशो जयति सत्कवेः॥९८॥
दिशां ········शिबिकाधिरूढो भट्टारकस्थापकसूरिमंत्री ।
भट्टारकाचार्य इहास्ति कृष्णके नः पृथिव्यां यत ईशपूज्यः ॥९९॥
नृपैर्भट्टारकाचार्यपदं दत्तं च दक्षिणे ।
यस्य स कृष्णसेनाख्यः कविनाथोजयत्परं ॥१००॥

इति श्रीकर्णामृतपुराणे धर्मशास्त्रे भ०श्रीरत्नभूषणाम्नायालंकार-वृषभ-जिनचरण-परिशीलन-लब्धप्रताप-ब्रह्ममंगलाग्रज-राजराजेश्वरपूरमल्लेष्ट-

ब्रह्मचारीश्वर-स्थविराचार्य-श्रीकेशवसेन-कृष्णजिष्णु-विरचिते ब्रह्मवर्धमान-साहाय्यसापेक्ष्ये श्रीकर्णदेवातिशय-निर्वाण-वर्णनं नाम चतुर्विंशतितमः स्कन्धः समाप्तः ॥२४॥

४२. सप्तव्यसनकथासमुच्चय (भ० सोमकीर्ति)

आदिभाग :—

प्रणम्य श्रीजिनान सिद्धान् आचार्यान् पाठकान् यतीन्।
सर्वद्वन्दविनिर्मुक्तान सर्वकामार्थदायकान् ॥१॥
ततोपि शारदादेवीं कल्याणावलिवल्लरीं।
जिनेन्द्रवदनोद्भूतां नत्वा भक्त्या प्रमोदितः ॥२॥
गुरूणां चरणं(णौ) नत्वा वक्ष्ये बुद्धयानुसारतः।
सप्तानां व्यसनानां हि कथां भव्यहिताय वै ॥३॥

अन्तभाग :—

नन्दीतटाके विदिते हि संघे श्रीरामसेनास्य पद-प्रसादात्।
विनिर्मितो मंदधिया ममायं विस्तारणीयो भुवि साधुसंघैः ॥६९॥
यो वा पठति विमृश्यति भव्योपि [सु]भावनायुक्तः।
लभते स सौख्यमनिशं ग्रन्थं [श्री]सोमकीर्तिना रचितं ॥७०॥
रसनयनसमेते बाणयुक्तेन चन्द्रे(१५२६)
गतवति सति नूनं विक्रमस्यैव काले।
प्रतिपदि धवलायां माघमासस्य सोमे
हरिभदिनमनोज्ञे निर्मितो ग्रन्थ एषः ॥७१॥
सहस्रद्वयसंख्योऽयं सप्तषष्ठिसमन्वितः (२०६७)।
सप्तैव व्यसनाद्यश्च कथासमुच्चयो ततः ॥७२॥
यावत्सुदर्शनो मेरुर्यावच्च सागरा धरा।
तावन्नन्दत्वयं लोके ग्रन्थो भव्यजनाश्रितः ॥७३॥

इतिश्री इत्यार्षे भट्टारक-श्रीधर्मसेनाभः-श्रीभीमसेनदेवशिष्य-आचार्य-

सोमकीर्ति-विरचिते सप्तव्यसनकथासमुच्चये परस्त्रीव्यसनफलवर्णनो नाम सप्तमः सर्गः । इति सप्तव्यसनचरित्रकथा संपूर्णा ।

४३. प्रद्युम्नचरित्र (भ० सोमकीर्ति)

आदिभाग :—

श्रीमंतं सन्मतिं नत्वा नेमिनाथं जिनेश्वरं ।
विश्वजेताऽपि मदनो बाधितुं नो शशाक यं ॥१॥
वर्द्धमानं जिनं नत्वा वर्द्धमानं सतामिह ।
यद्रूपदर्शनाज्जातस्सहस्रनयनो हरिः ॥२॥
प्रणम्य भारतीं देवीं जिनेन्द्रवदनोद्गतां ।
कृष्णपुत्रस्य चारित्रं वक्ष्ये सूत्रानुसारतः ॥३॥
यदुक्तं चात्र विद्वद्भिर्महासेनादिसूरिभिः ।
तत्कथं शक्यते नूनं मया बालेन भाषितुं ॥४॥
तथापि तत्क्रमांभोजप्रणामार्जितपुण्यतः ।
श्रीप्रद्युम्नाभिधं ग्रन्थं प्रवक्तुं मे श्रमो न हि ॥५॥

× + × ×

जिनसेनादिभिः पूज्यैराचार्यैर्यन्निरूपितं ।
करोमि शक्तिहीनोऽहं तत्पादाम्बुजसेवनात् ॥१२॥

अन्तभाग :—

नन्दीतटाख्ये विमले सुगच्छे श्रीरामसेनो गुणवारिराशिः ।
बभूव तस्यान्वयशोभकारी श्रीरत्नकीर्तिर्दुरितापहारी ॥१६६॥
श्रीलक्ष्मिसेनोत्र ततो बभूव शीलालयः सर्वगुणैरुपेतः ।
तस्यैव पट्टोद्धरणैकधीरः श्रीभीमसेनः प्रगुणः प्रवीरः ॥१६७॥
श्रीभीमसेनस्य पदप्रसादात् सोमादिसत्कीर्तियुतेन भूमौ(लोके) ।
रम्यं चरित्रं विततं स्वभक्त्या संशोध्य भव्यैः पठनीयमेतत् ॥१६८॥

संवत्सरे सत्तिथिसंज्ञके वै वर्षेऽत्र त्रिशैकयुते (१५३१) पवित्रे ।
विनिर्मितं पौषसुदेश्च(?)तस्यां त्रयोदशी या बुधवारयुक्ता ॥१६८॥
(आगे ३ पद्य आशीर्वादादिके हैं)

इति श्रीप्रद्युम्नचरित्रे श्रीसोमकीर्त्याचार्य-विरचिते श्रीप्रद्युम्न शंबर-अनुरुद्धादिनिर्वाणगमनो नाम षोडशः सर्गः समाप्तः ॥१६॥ सर्वसंघस्य-कल्याणमस्तु । ग्रन्थाग्रंथ ४८५० ॥

[नोट—आराके जैनसिद्धान्तभवनमें इस ग्रन्थकी जो प्रति संवत् १७६६ ज्येष्ठ शुक्ल ६ की लिखी हुई सन् १६२० में नं० १४७ पर दर्ज है उसके अन्तमें सुर्खीसे यह एक लाइन लिखी हुई है :—
"संवत् १७६५ वर्षे फाल्गुणमासे सुकलपक्षे द्वादसी दिने नादर-साह बादसाहनैं दिल्लीमैं कतलाम कीया मनुष्योंका प्रहर तीन ३"]

४४. सुभौम-चक्रि-चरित्र (भ० रत्नचन्द्र)

आदिभाग :—

श्रीमंतं त्रिजगन्नाथं प्राप्तानंतचतुष्टयं ।
सरताऽरं जिनाधीशं संसारोत्तारकारणं ॥१॥
(आगे शेष तीर्थंकरों तथा सिद्धादिके स्मरणके ६ पद्य हैं)
वन्दे वृषभसेनादीन् गौतमान्तान् गणेशिनः ।
दीप्तसप्तर्द्धिदीप्राङ्गांश्चतुर्थावगमत्विषः ॥८॥
गुरवः कुन्दकुन्दाद्या गुणचन्द्रा गुणाकराः ।
ध्यानोष्मप्रहतोप्राघशैत्यास्ते सन्तु सिद्धये ॥६॥
श्रीरत्नकीर्तये नित्यं नमः श्रीयशकीर्तये ।
नमः श्रीगुणचन्द्राय जिनपूर्णेन्दवे नमः ॥१०॥
कृत्वेति मंगलं भव्यं क्रियमाणार्थसिद्धिदं ।
समुद्धृत्य पुराणाब्धेश्चरित्रं रच्यते मया ॥११॥

अरतीर्थकृतस्तीर्थे वर्तमानेऽजनिष्ट तत् ।
सत्सपारशुरामीयं **सौभौमं** चरितं वरम् ॥१२॥

अन्तभाग :—

अथासीन्मूलसंघेस्मिन् गच्छेसारस्वताभिधे ।
मुनिश्रीकुन्दकुन्दाख्यः श्रीसीमंधरतीर्थगः ॥१॥
तस्यान्वये विदां मान्यः **पद्मनन्दी** यतीश्वरः ।
भव्यांगि पद्मनंदीव समभूत्तपमां निधिः ॥२॥
भट्टारकवरेण्योऽस्य पट्टे **सकलकीर्तिवाक्**(भाक् ?) ।
धर्म्मः प्रकाशितो येन सजीयाज्जगदीश्वरः ॥३॥
गुरुर्भुवनकीर्त्याख्यस्तत्पट्टोदयभानुमान् ।
जातवान् जनितानन्दो वनवासी महातपः ॥४॥
गुरुभ्राता तदीयोऽभूद्रत्नकीर्तिर्गणाऽग्रणीः ।
स्थविरो मंडलाचार्य्यपदभाग्धर्म्मकार्यकृत् ॥५॥
तत्पट्टे मंडलाचार्यो **यशःकीर्तिर्यशोनिधि-**
रजायताऽऽगमाध्यात्मपुराणार्थविचक्षणः ॥६॥
वादित्वस्य परं सीमा गमकस्य परं पदं ।
कवित्वादेः परं धाम **गुणचन्द्रस्तदन्वये** ॥७॥
जिनचन्द्रो जयत्वत्र **बलात्कारगणाग्रणी-**
स्तत्पट्टे सर्वथैकान्तनिर्जिताशेषवाक्सूरिः(वादिनः ?) ॥८॥
तत्पट्टे **सकलचन्द्रो**ऽभूत्तदीये विपुलोदये ।
सैद्धान्तिकः सतां वंद्यः सूरिवर्यो विदाम्वरः ॥९॥
तस्य पट्टे वरीवर्ति भट्टारकपदस्थितः ।
रत्नचन्द्रो विदांमान्यः स्याद्वादमकलार्थवित् ॥१०॥
सम्वत्षोडशाख्याते त्र्यशीतिवत्सरांकिते(१६८३) ।
मासे भाद्रपदे श्वेतपंचम्यां गुरुवासके ॥११॥

पत्तने पाटलीपुत्रे मगधांतःप्रवर्तिनी ।
स्वर्धुनीतटगे पार्श्वे सुदर्शनालयमाश्रिते ॥१२॥
मल्लेमसाहिसद्राज्ये सर्वम्लेच्छाधिपाधिपे ।
रक्षत्यत्र धराचक्रं निर्जिताखिलविद्विषि ॥१३॥

श्रीमत्प्रभाचन्द्रगणीन्द्रपट्टे भट्टारकश्रीमुनिचन्द्रकीर्तेः ।
पट्टांबरोद्भासनभानुमाली भट्टारकोऽभूद्दिविजेन्द्रकीर्तिः ॥१४॥
तच्छिष्यदाम्नायकौ हि सुभगौ खण्डेलवालान्वयौ ।
श्रीतेजपाल-हेमनामपरमौ धनराज-रेखांगजौ ।
संप्रीत्यौ गुरुभक्तिभाजनपरौ सद्दर्शनालंकृतौ ।
चक्राते सुभौमचक्रिचरितं साहाय्यसाक्षेपतां ॥१५॥

सौमण्यगोत्रे तेजाख्यो बुधादिपदसंयुतः ।
पट्टणिगोत्रजो हेमपट्टणी च तदन्वये ।
सम्मेदाचलयात्रार्थं रत्नचन्द्रास्समागताः ।
जगन्महन्नात्मजाचार्य्यजयकीर्तिभिरन्वतः ॥१६॥
श्रीमत्कमलकीर्त्याद्यैः सूरिभिश्च सुवर्णिभिः ।
कल्याण-कचराख्यान-कान्हजी-भोगिदासकैः ॥१७॥
श्रीमद्हुम्बडजातीय-मही-अक्षवणिक्पतिः ।
चम्पाकुक्षिसमुत्पन्नो रत्नचन्द्रो व्यरीरचन् ॥१८(त्रिभिः कुलकं)
श्रीमत्खंडेलवालेषु श्र्यग्रवालेषु दानिषु ।
जैसवालेषु सद्भक्तिंकुर्व्वत्सु श्रावकेषु च ॥१९॥
धनराज-केसि-पुत्रस्य तेजपालविपश्चितः ।
साहाय्याखिलसामग्रीसापेक्ष्य स्वेप्सितप्रदं ॥२०॥
श्रीमत्खंडेलवालार्य्यो हीराख्यभ्रातृजान्वितः ।
हमीरदेपतिहेमराजः कारितवानिदं चरितं ॥२१॥(युग्मं)
आद्यवाग्वरदेशस्थ सागपत्तन-वासिनः ।
हेमाख्य-श्रेष्ठिनः पुत्रो जयतान्मङ्गलाभिधः ॥२२॥

बहुश्राणकृष्णदासस्य क्षत्रियान्वयसन्मणेः ।
महौजसौ कुमारौ स्त राजसिंहऽमराऽभिधौ ॥२३॥
भीमाद्याह्वाननात्तत्राकार्य श्रीहेमकीर्तयः ।
यं पट्टे स्थापयामासू रत्नेन्दुं संघसादरात् ॥२४॥
तेनेदं चरितं वणिजेमराज-प्रसादतः ।
वादिचन्द्रानुभावाच्चाऽऽचन्द्रार्कं जयताच्चिरं ॥२५॥

एकोऽपि सिंहसदृशस्सकलावनीशो हत्वा पितुर्वधकृतो नरकं प्रपद्य ।
दुःखं प्रभुज्य बहुधा भरतेऽत्र तस्मान्निर्गत्य तीर्थपदभाग्भविताऽस्तु सिद्धयै २६

इति श्रीसुभौमचरित्रे सूरिश्रीसकलचन्द्रानुचर-भट्टारकश्रीरतनचन्द्र-विरचिते विबुधश्रीतेजपालसाहाय्यसापेक्ष्ये श्रीखण्डेलवालान्वयपट्टणिगोत्राम्बरादित्य श्रेष्ठिश्रीहेमराजनामांकिते सुभौमनरकप्राप्तिवर्णनो नाम सप्तमसर्गः ।

४५. होलीरेणुकाचरित्र (पं० जिनदास)

आदिभाग :—

श्रीसर्वज्ञं नाभिसूनुं जिनेन्द्रं भक्त्या वंदे मोहवल्ली-गजेन्द्रं ।
स्वात्मज्ञानैः सद्वशीभूतखेन्द्रं लक्ष्म्या युक्तं कामपद्मद्विजेन्द्रं ॥१॥
सद्धर्माणां कल्पवल्लीं कवीनां भूयो नत्वा शारदां पारदां च ।
संसाराब्धेर्भव्यलोकानुकूलां नित्यां वंद्यां दायिनीं सन्मतेश्च ॥२॥
सद्देवैः संस्तुतां चेन्द्रमुख्यैर्नागेन्द्राद्यैः संनुतां पूजितां च ।
मर्त्यैर्ल्लोके चक्रिमुख्यैः किमुक्तं प्राज्यैनार्य्या वाचयाऽगोचरां च ॥३॥
सत्याचारान् गौतमादीन् गुरूंश्च सद्धर्म्माणां मंगलानां च दातॄन् ।
वक्ष्ये होलीपर्व्व धूलेश्च पर्व्वं सम्यग्दृष्टेर्निर्मलत्वाय स्वस्य ॥४॥

× × × ×

ललितकीर्तिमुनीश्वर-नोदितस्तदपि सच्चरितं रचयाम्यहम् ।
न हि कथं समुदेति कलंकयुक् शशधरो विमले गगनाङ्गणे ॥७॥

अन्तभाग :—

पूर्वं हरपतिर्नाम्ना लब्ध-पद्मावती-वरः ।
पेरोसाहिनरेन्द्रात्त-सत्पंडितपदोऽप्यभूत् ॥२६॥
पद्माऽभिधः पद्मविशालनेत्रः तदीयवंशांबरभानुरासीत् ।
येन प्रदत्तं बहुधा जनेभ्यो दानं सदानेकगुणालयेन ॥३०॥
ग्याससाहिनरेन्द्राच्च येनाप्ता बहुमान्यता ।
साकुंभरीपुरे रम्यं कारितं जिनमन्दिरं ॥३१॥
आज्ञा यस्य न लोपिता क्षितितले कैश्चिन्नरेन्द्रैरपि
दुष्टव्याधिगजेन्द्रपंचवदनो मिथ्यात्वविध्वंसकः ।
नित्यं यः कृतवान् जिनेश्वरमहाकल्याणकानां विधिं
सत्पाण्डित्यपदस्थितश्चतुरताहंसीसरो भासुरः ॥३२॥
तत्पुत्रो बिंझनामाभूत् प्रसिद्धो भुवि वैद्यराट् ।
नसीरसाहिभूपाल-लब्धोत्कर्षो विशालधीः ॥३३॥
माननीयो नरेन्द्राणां भूपतिर्वणिजामिव ।
दान-पूजाद्वितीयश्च सर्वविद्याविदांवरः ॥३४॥
अयं चिरं स्थिरीभूय गृहे वैभवसयुते ।
पश्चाद्धि व्रतिको नूनं समभूत्कर्महानये ॥३५॥

द्वितीयपुत्रोपि सुहृज्जनाख्यो विवेकवाग्व्यादिगजेन्द्रसिंहः ।
आसीत्सदासर्वजनोपकारी खानिः गुणानां जिनधर्मचारी ॥३६॥
भट्टारक-श्रीजिनचन्द्रपट्टे भट्टारकोऽयं समभूद्गुणाढ्यः ।
प्रभेन्दुसंज्ञो हि महाप्रभावः त्यक्त्वा विभूतिं नृपराजसाम्यां ॥३७॥

बिंझाभिधस्य तनयो धर्मदासाह्वयोप्यभूत् ।
अभिमानहिरण्याद्रिर्वादिनक्षत्रभास्करः ॥३८॥

विवेकिनो वै महमूदसाहि-नृपेण दत्ता बहुमानता हि ।
अस्यापि सद्वैद्यशिरोमणेश्च पद्मावतीदत्तवरस्य नित्यं ॥३६॥

अयं विख्यातकीर्तिश्च रूपनिर्जितमन्मथः ।
सर्वलोकोपकारी च दयालुर्बुद्धिसागरः ॥४०॥
यत्समो दृश्यते नैव कोप्यन्यः पृथिवीतले ।
महाभाग्यश्च सद्वैद्यो बहुना भाषितेन किं ॥४१॥
धर्मश्रीरितिनामतोऽस्य वनिता देवादि-पूजा-रता ।
सौभाग्यादि-गुणान्विताऽतिविमला विख्यातकीर्तिः खलु ।
आसीत्सर्वहिता सुवाक्यकथका दानाऽद्वितीया परा
सम्यग्दृष्टियुता प्रफुल्लवदना दीनोपकारान्विता ॥४२॥
विवेकसत्क्षेत्रस्य परा सीमेव याऽभवत् ।
रोरुसंतापितानां च शरदश्चन्द्रिकेव हि ॥४३॥
रेखानामास्ति पुत्रो वरगुणनिलयो ह्येतयोः सत्प्रतापो
वैद्याधीशः प्रसिद्धो विविधजननुतो धैर्यमेरुः सदैव ।
भोगाढ्यो बुद्धिसिंधुः शशधरवदनः स्वर्णकांतिः सभार्हः
सद्विद्यालंकृतांगो विविधसुखनिधिः भाग्यवांश्चोपकारी ॥४४॥
सन्मानितो रणस्तंभे दुर्गेऽयं बहुसंपदः ।
शेरसाहिनरेन्द्रेण गांभीर्यगुणसागरः ॥४५॥
माननीयो नरेंद्राणां बहूनां वणिजां तथा ।
साहसी चास्त्यसौ नूनमहंकारसुरालयः ॥४६॥
यस्य हृतं न मर्यादां क्षमः कोऽपि न दृश्यते ।
नरः प्रियतमस्याऽपि सर्वेषां च विवेकिनां ॥४७॥
सौन्दर्य-जितकन्दर्प्पः सुहृदब्जदिवाकरः ।
योऽस्ति दुर्जननक्षत्रहंसो विमलमानसः ॥४८॥
वांछितार्थप्रदो योऽस्ति सेवकानां हितार्थिनां ।
कलात्रयप्रवीणश्च सन्मनुष्यशिरोमणिः ॥४९॥
भार्याऽस्य सद्गुणोपेता नाम्ना रिषसिरि स्मृता ।
गृहे दक्षा च दीनानां कल्पवल्लीव निर्म्मला ॥५०॥

सदाचाररता नूनं महाविनयकारिणी ।
ख्यातनिर्मलकीर्तिश्च शीलसम्यक्त्वसंभृता ॥५१॥
विद्यते ह्य तयोः पुत्रो जिनदासाभिधो वरः ।
बुधः सज्जनमर्यादा माननीयो मनीषिणां ॥५२॥
अधीती बहुविद्यासु आयुर्वेदे विशेषतः ।
अपि योऽस्ति महाधीमान् वरिष्ठो हि विवेकिनां ॥५३॥
नाम्ना भर्तुर्जवणाद(एणादे ?)इति ज्ञानदयान्विता ।
जिनदासाऽभिधानस्य भार्या स्याच्छीलसंभृता ॥५४॥
सती सीतासमा साऽपि भर्तारमनुसारिणी ।
धर्मदान-क्रियायुक्ता दम्पत्योर्वरयोस्तयोः ॥५५॥
पुत्रोऽस्य(स्ति)नारायणदाससंज्ञो विराजते निर्मललक्षणैर्हि ।
स्वर्णप्रभः पंकजपत्रनेत्रः पितामहादृष्टिपयोजभानुः ॥५६॥
स्वकीयवंशाम्बरपूर्णचन्द्रः सुबुद्धिमान् यः शुकनाश(स)कोस्ति ।
सुहृज्जनानंदकरो वरिष्ठो दरिद्रवल्ली द्विरदः प्रहृष्टः ॥५७॥
श्रीरणस्तंभसद्दुर्ग-समीपस्थे सुखप्रदे ।
नानावृक्षैः समाकीर्णे सरोभिः सकजैस्तथा ॥५८॥
जिनागारयुते रम्ये नवलक्षपुरे शुभे ।
वासिना जिनदासेन पंडितेन सुधीमता ॥५९॥
दृष्ट्वा पूर्व्वकथामेकपंचाशत्(५१)श्लोकसंयुतां ।
पुरे सेरपुरे शांतिनाथचैत्यालये वरे ॥६०॥
वसुखकायशीतांशुमिते(१६०८) संवत्सरे तथा ।
ज्येष्ठमासे सिते पक्षे दशम्यां शुक्रवासरे ॥६१॥
अकारि ग्रंथः पूर्णोऽयं नाम्ना दृष्टिप्रबोधकः ।
श्रेयसे बहुपुण्याय मिथ्यात्वापोहहेतवे ॥६२॥
भट्टारक-प्रभाचन्द्र-शिष्यो यो विद्यते भुवि ।
अनेकगुणसम्पन्नो धर्मचन्द्राभिधो मुनिः ॥६३॥

सम्पूर्ण सिद्धांत-विचारणैकः धीरो वरो ज्ञातमहाविवेकः ।
चारित्रपात्रं निधिपूतगात्रः स मे क्रियाद्बोधयुतो रमां हि ॥६४॥
अस्यास्ति शिष्यो ललितादिकीर्तिः मुनिः सदा भव्यजनैश्च पूज्यः ।
दयार्द्रचित्तो विनयेन युक्तः प्रभाववान् शीलपरश्च विद्वान् ॥६५॥
जिनेन्द्रपादांबुज-सत्प्रसादाज्जीयाच्चिरं श्रीजिनदाससंज्ञः ।
साकं हि नारायणदास-नाम्ना पुत्रेण सल्लक्षणसंयुतेन ॥६६॥

जिनेन्द्रचरणांभोजपूजनं च भवेद्भुवि ।
यावत्तिष्ठति हेमाद्रिर्यावच्चंद्रदिवाकरौ ॥६७॥

जिनेशवाणी सुखदा च यावत्संतः कृपार्द्राश्च महीतलेऽपि ।
सुरापगा श्रीजिनदेवभक्तिर्महामुनीनां निवहः कृपार्द्रः ॥६८॥

यावत्पंचनमस्कारमंत्रस्तावदयं शुभः ।
ग्रंथस्तिष्ठतु पुण्याय वाच्यमानो बुधैर्जनैः ॥६९॥
शांतिः श्रीजिनमार्गस्य नरेंद्रस्य तपोभृतां ।
प्रजानां काव्यकर्तॄणां भवतात्सुहृदोऽपि च ॥७०॥
यत्किंचिदधिकं न्यूनं शास्त्रेऽस्मिन्नादितं मया ।
जाड्यात्तज्जिन क्षंतव्यं दयासागरवारिज ॥७१॥
त्रिवाद्धिवसुसंख्यैरनुष्टुप्श्लोकैः(८४३)प्रमाणता ।
ग्रंथस्यास्य सुविद्वद्भिर्जिनदासैः कृता स्वयं ॥७२॥

इति श्रीपंडितजिनदासविरचिते मुनिश्रीललितकीर्तिनामाङ्किते होली-रेणुकापर्वचरित्रे दर्शनप्रबोधनाम्नि धूलिपर्व-समयधर्म-प्रशस्तिवर्णनो-नाम सप्तमोऽध्यायः । [जयपुर प्रति

४६. मुनिसुव्रतपुराण (ब्रह्म कृष्णदास)

आदिभाग :—

देवेन्द्रार्च्चितसत्पाद-पंकजं प्रणमाम्यहं ।
आदीश्वरं जगन्नाथं सृष्टिधर्म्मकरं भुवि ॥१॥

कनककच्नारसंछायं वृषभांकं वृषोद्धुरं ।
वृषभं जगतां साक्षाच्छर्मणोऽनंतसिद्धये ॥२॥

अन्तभाग :—

काष्ठासंघे वरिष्ठेऽजनि मुनिपनुतो रामसेनो भदंत-
स्तत्पादांभोजसेवाकृत-विमलमतिःश्रीभीमसेनः क्रमेण ।
तत्पट्टे सोमकीर्तिर्यवनपति-करांभोज-संपूजितांह्रि-
रेतत्पट्टोदयाद्रौ जिनचरणलयी श्रीयशःकीर्तिरेनः(?)॥६१॥

कमलपतिरिवाभूत्सदुदयाद्यंतसेन
उदितविशदपट्टे सूर्यशैलेन तुल्ये ।
त्रिभुवनपतिनाथांह्रिद्वयासक्तचेता-
स्त्रिभुवनजनकीर्तिर्नाम तत्पट्टधारी ॥६२॥

रत्नभूषणभदंत इनाभो न्याय-नाटक-पुराण-सुविज्ञः ।
वादि-कुंजर-घटाकर-सिंहस्तत्पदेऽजनि रंजनभक्तः ॥६३॥
देवतानिकरसेवितपादः श्रीवृषेशविभुपादप्रसादात् ।
कोमलेन मनसा कृत एष ग्रंथ एव विदुषां हृदिहारः ॥६४॥
शोधयंतु विबुधा विविरोधा यत्पुराणमद एव मयोक्तं ।
संभवन्ति सुजनाः खलु भूमौ ते सदा हितकरा हतपापाः ॥६५॥
इन्द्रष्टषट्चंद्रमितेऽथ वर्षे(१६८१) श्रीकार्तिकाख्ये धवले च पक्षे ।
जीवे त्रयोदश्यपरान्हया मे कृष्णेन सौख्याय विनिर्मितोऽयं ॥६६॥
लोहपत्तननिवासमहेभ्यो हर्ष एव वणिजामिव हर्षः ।
तत्सुतः कविविधिः कमनीयो भाति मंगल-सहोदर कृष्णः ॥६७॥
श्रीकल्पवल्लीनगरेगरिष्ठे श्रीब्रह्मचारीश्वर एष कृष्णः ।
कंठावलंब्यूर्जितपूरमल्लः प्रवर्द्धमानो हितमाततान ॥६८॥

पंचविंशतिसंयुक्तं सहस्रत्रयमुत्तमं (३०२५) ।
श्लोकसंख्येति निर्दिष्टा कृष्णेन कविवेधसा ॥६९॥

इति श्रीपुण्यचन्द्रोदये मुनिसुव्रतपुराणे श्रीपूरमल्लांके हर्ष-वीरिका देहज-

ब्रह्मश्रीमंगलदासाग्रज-ब्रह्मचारीश्वर-कृष्णदास-विरचिते रामदेव शिवगमनं नाम त्रयोविंशतितमः सर्गः समाप्तः ॥२३॥

४७. चन्द्रप्रभ-चरित (कवि दामोदर)

आदिभाग :—

श्रियं चन्द्रप्रभो नित्यं चन्द्रदश्चन्द्रलांछनः ।
भव्यकुमुदचन्द्रो वश्चन्द्र-प्रभो जिनः क्रियात् ॥१॥
कुशासन-वचोब्रूडजगत्तारण हेतवे ।
तेन स्ववाक्य सूत्रास्त्रैर्धर्मपोतः प्रकाशितः ॥२॥
युगादौ येन तीर्थेशा धर्मतीर्थः प्रवर्त्तितः ।
तमहं वृषभं वन्दे वृषदं वृषनायकम् ॥३॥
चक्री तीर्थकरः कामो मुक्तिप्रियो महाबली ।
शान्तिनाथः सदा शान्ति करोतु नः प्रशान्तिकृत् ॥४॥
येन विध्वंसितो दुष्टः प्रद्युम्नभूपतिर्वरं ।
मुक्तिसीमंतिनीनाथं वीरं नमामि तं जिनम् ॥५॥
(इसके बाद शेष तीर्थंकरों तथा सिद्धादिकोंका स्मरण है)
गुणान्वितां शुभाकारां वृत्तमुक्ताफलाचिताम् ।
मालामिव सदाभूषां स्वकण्ठे भारतीं दधे ॥११॥
जगद्धितकरं सारं विश्वतत्वप्रकाशकं ।
स्तौमि जिनागमं नित्यं ज्ञानाप्तयेऽघनाशनं ॥१२॥
परहित समुद्युक्तांस्त्रैलोक्येश्वर संस्कृतान् ।
गौतमादीन्मुनीन् भक्त्या स्तुवे तद्गुणसिद्धये ॥१३॥
सीमंधर-मुखात् श्रुत्वागमं येनाऽत्र दुःषमे ।
प्रवर्त्तितं हितं कुन्दकुन्दाचार्यं नमाम्यहम् ॥१४॥
परमतेभ-नागारियः कवेर्गुण-सागरः ।
तद्गुणसिद्धये तस्मै नमोऽकलङ्क-योगिने ॥१५॥

यद्भारत्या: कवि: सर्वोऽभवत्सज्ज्ञान-पारग: ।
तं कविनायकं स्तौमि **समन्तभद्र**-योगिनम् ।।१६।।
नाभेयस्य पुराणाब्धि: कृतो येन सुबुद्धिदः ।
स्वसिद्धयै शिरसा वन्दे **जिनसेन**कवीश्वरं ।।१७।।
सर्वेषां तीर्थंकर्तृणां चरिताब्धि: प्रकाशित: ।
येन तं **गुणभद्राचार्य**कविं नौमि संततम् ।।१८।।
चन्द्रप्रभजिनेशस्य चरितं येन वर्णितं ।
तं **वीरनन्दिनं** वन्दे कवीशं ज्ञानलब्धये ।।१६।।
येऽन्येऽपि कवयोऽभूवन् जिनगुण-प्रकाशका: ।
कवित्वसिद्धये सन्तु सर्वे ते मम संस्तुता: ।।२०।।

अन्तभाग :—

भव्यांबुजौघदिनकृद्गणभृत्समानो निश्शेषमुन्यधिपति: शुभमंडलेशः ।
राजाधिराज-गणसेवित-पादपद्म: ख्यातो बभूव सुवचा भुवि **नेमिचन्द्र**: ।।६८
सुगुण-गण-समुद्रो विष्टपे ख्यातकीर्तिर्मुनिनरपतिवृन्दै: पूजितांघ्रि: सुरूपी ।
विजितसकलवादी तस्य पट्टे बभूव महिमितजिनधर्मा श्री**यश:कीर्ति**नामा ।।

योगीशभूभृद्गणलब्धपूज: कवीशसेव्य: भुवनप्रसिद्ध: ।
पट्टे तदीये जितकाममाय: श्री**भानुकीर्ति**र्दृढशान्तमूर्तिः ।।७०।।
सिद्धान्तादि-पुराणकोशजलधि: प्रध्वस्त मिथ्यातम:
भव्याभोज-रवि: समस्तगुणभृद्धर्माब्धिचन्द्रोपम: ।
विख्यातो भुवने तपोभरधृतो गच्छाधिराज: शमी
शिष्यस्तस्य सुयोगिसंस्तुतपद: श्री**भूषणो** राजते ।।७१।।
भव्यांभोजाऽर्कभानुर्मुनिनृपतिगणैः सेवितांघ्रिः प्रसिद्ध-
स्तर्कालंकारशास्त्रप्रवचन-पटुर्ध्वस्त-मिथ्याप्रवादः ।
उद्यन्द्भानुप्रतापो गुणगणनिलयो जैनधर्मप्रकाशी
तत्पट्टेशस्तपस्वी प्रकटमुर्महिमा **धर्मचन्द्रो** विभाति ।।७२।।

श्रीमूलसंघसुपतेः परिशान्तमूर्तेः चन्द्रप्रभेशचरितं भुवि सारमेतत् ।
शिष्येण तस्य चरितं बहुसौख्यहेतुर्दामोदरेण विदुषा तनुबुद्धिभाजा ।।७३।।
निश्शेषशास्त्रनिपुणाः परकृत्यचित्ताः कृत्स्नप्रदोषरहिता बहुकीर्तिभाजः ।
चन्द्रप्रभस्य चरितं परिशोधयन्तु सारं सतां समुदयाः स्वगुणाप्रभुज्याः।।७४।।
जिनरुचिदृढमूलो ज्ञानविज्ञानपीठः शुभवितरणशाखश्चारुशीलादिपत्रः ।
सुगुणचयसमृद्धः स्वर्गसौख्यप्रसूनः शिवसुखफलदो वै जैनधर्मद्रुमोऽस्तु ।।८४।।

भूभृन्नेत्राचलशशधराङ्कप्रमे(१७२७)
वर्षेऽतीते नवमिदिवसे मासि भाद्रे सुयोगे ।
रम्ये ग्रामे विरचितमिदं श्रीमहाराष्ट्रनाम्नि
नाभेयस्य प्रवरभवने भूरिशोभानिवासे ।।८५।।
रम्यं चतुःसहस्राणि पंचदशयुतानि(४०१५) वै ।
अनुष्टुप्कैः समाख्यातं श्लोकैरिदं प्रमाणतः ।।८६।।

इति श्रीमण्डलसूरिश्रीभूषण-तत्पट्टगच्छेशश्रीधर्मचन्द्रशिष्य-कविदामोदर-विरचिते श्रीचन्द्रप्रभचरिते श्रीचन्द्रप्रभनिर्वाणगमनवर्णनो नाम सप्तविंशतितमः सर्गः।

४८. ज्ञानार्णवगद्य-टीका (श्रुतसागर सूरि)

आदिभाग :—

शिवोऽयं वैनतेयश्च स्मरश्चास्यैव कीर्तितः ।
अणिमादि-गुणाऽनर्घ्यरत्न-वार्धिर्बुधैर्मतः ।।१।।

अन्तभाग :—

आचार्यैरिह शुद्धतत्वमतिभिः श्रीसिंहनंद्याह्वयैः
संप्रार्थ्य श्रुतसागरं कृतिवरं भाष्यं शुभं कारितम् ।
गद्यानां गुणवत्प्रियं विनयतो ज्ञानार्णवस्यान्तरे
विद्यानन्दिगुरु-प्रसाद-जनितं देयादमेयं सुखम् ।।

इति श्रीज्ञानार्णव-स्थित-गद्य-टीका तत्वत्रय-प्रकाशिनी समाप्ता ।

४६. सम्मेदशिखरमाहात्म्य (दीक्षित देवदत्त)

आदिभाग :—

ध्यात्वा यत्पदपाथोजं भव्याः संसारपारगाः ।
सारात्सारं सदाधारं तमर्हन्तं नमाम्यहम् ॥१॥
गुरुं गणेशं वाणीं च ध्यात्वा स्तुत्वा प्रणम्य च ।
सम्मेदशैलमाहात्म्यं प्रकटीक्रियते मया ॥२॥
जिनेन्द्रभूषणयतिर्यति-धर्मपरायणः ।
तस्योपदेशात्सम्मेदवर्णने मद्गिरोत्सुका ॥३॥
भट्टारकपदस्थायी स यतिः सत्कविप्रियः ।
भवाब्धितरणायेह सत्कथापोतसज्जकः ॥४॥
माहात्म्यपूर्तिसिद्ध्यर्थं वन्दे सिद्धगणं हृदि ।
सद्बुद्धिं ते प्रयच्छंतु वाणीं मे काव्यरूपिणीम् ॥५॥
सम्मेदशैलवृत्तांतो महावीरेण भाषितः ।
गौतमं प्रति भूयः स लोहार्येण धीमता ॥६॥
तत्सद्वाक्यानुसारेण देवदत्ताख्यसत्कविः ।
सम्मेदशैलमाहात्म्यं प्रकटीकुरुतेऽधुना ॥७॥

अन्तभाग :—

इति श्रीभगवल्लोहाचार्यानुक्रमेण-श्रीभट्टारकजिनेन्द्रभूषणोपदेशाच्छ्री-मद्दीक्षित-देवदत्तकृते श्रीसम्मेदशिखर-माहात्म्ये समाप्तिसूचको एकविंशति-तमोऽध्यायः ॥२१॥ समाप्तोऽयंग्रन्थः ॥

५०. ध्यानस्तवः (भास्करनन्दि)

आदिभाग :—

परमज्ञानसंवेद्यं वीतबाधं सुखादिवत् ।
सिद्धं प्रमाणतस्सार्वं सर्वज्ञं सर्वदोषक(कृत्?) ॥१॥

अन्तभाग :—

तस्याऽभवत् श्रुतनिधिर्जिनचंद्रनामा शिष्योऽनु तस्य कृति-**भास्करनंदिनाम्ना** !
शिष्येण संस्तवमिमं निजभावनार्थं ध्यानानुगं विरचितं सुविदो विदंतु ॥१००

इति ध्यानस्तवः समाप्तः ।

५१. पदार्थदीपिका (भ० देवेन्द्रकीर्ति)

आदिभाग :—

श्रीसर्वज्ञं जिनं नत्वा सर्वसत्वहितावहं ।
पदार्थदीपिकां सारां टीकां कुर्वे सुकोमलां ॥१॥

अन्तभाग :—

वस्वष्टयुक्तसप्तेन्दुयुते (१७८८) वर्षे मनोहरे ।
शुक्ले भाद्रपदे मासे चतुर्दश्यां शुभे तिथौ ॥१॥
ईसरदेति सद्ग्रामे टीका पूर्णतामिता ।
भट्टारक-जगत्कीर्तेः पट्टे **देवेन्द्रकीर्तिना** ॥२॥
दुष्कर्महानये शिष्य**मनोहर**-गिरा कृता ।
टीका **समयसारस्य** सुगमा तत्त्वबोधिनी ॥३॥
बुद्धिमद्भिः बुधैर्हास्यं कर्तव्यं न विवेकिभिः ।
शोधनीयं प्रयत्नेन नयतां विस्तरतां व्रजेत् ॥४॥
बुधैः संपाठ्यमानं च वाच्यमानं श्रुतं सदा ।
शास्त्रमेतच्छुभंकारि चिरं संतिष्ठतां भुवि ॥५॥
पूज्य-**देवेन्द्रकीर्तेशं**(तीश-)शिष्येण **स्वांतहारिणा** ।
नाम्नेयं लिखिता टीका स्वहस्तेन स्वबुद्धये ॥६॥

[इति समयसारस्य पदार्थदीपिका टीका समाप्ता ।]

५२. नागकुमारपंचमीकथा (पं० धरसेन)

आदिभाग :—

नेमिं नमत्सुराधीश-मुनीशमनर्घ्यश्रयम् ।
नत्वा नागकुमारस्य वक्ष्ये संक्षेपतः कथा ॥१॥

अन्तभाग :—

आसीद्भूरिगुणाकरस्य गुणिनः श्रीवीरसेनस्तुतः
शिष्यः श्रीधरसेनपंडित इति ख्यातः सतामीशितुः ।
गोनद्देवचितातपस्य वसतौ तेन प्रशान्तात्मना
संवेगार्थमियं विशुद्धमनसा साध्वी कथा श्रेयसे ॥१॥
सोढदेवाख्य-रट्टाभ्यां सद्धर्मरसिकत्वतः ।
कारिता पंचमी सेयमाऽऽचन्द्रमभिनन्दतु ॥२॥

इति श्रीधरसेनविरचिते नागकुमारपंचमीकथासमुच्चये नागकुमारनिर्वाण गमनवर्णनो नाम अष्टमः सर्गः ॥८॥*

५३. महीपालचरित्र (भ० चारित्रभूषण)

आदिभाग :—

यस्यांशदेशेऽस्तिकुन्तलाली दूर्वाङ्कुरालीव विभाति नीजा(त्यनीचा ?) ।
कल्याणलक्ष्मीवमतिः स दिश्यादादीश्वरो मंगलमालिकां वः ॥१॥
यस्याः क्रमोपास्तिवशाज्जडोपि विना श्रमं वाङ्मयपारमेति ।
सदा चिदानंदमयस्वरूपा सा शारदा रातु रतिं परां मे ॥२॥

---

* यह प्रशस्ति आजसे कोई ३०–३५ वर्ष पहले सेठ माणिकचन्द हीराचन्द जे० पी० बम्बईके 'प्रशस्तिसंग्रह' रजिष्टर न० १ परसे उद्धृत की गई थी। मूल ग्रन्थ सामने न होनेसे इस ग्रन्थकी रचना करानेवाले सोढदेव आदिका परिचय नहीं दिया जा सका ।

मनोवचःकायकृतोपकाराः जयंति संतः सुकृतैकसाराः ।
येषां भिया न स्खलते सतां धीर्हितं करास्तेपि जयंत्यसंतः ॥३॥
अज्ञोपि विज्ञाय कृतप्रसादः परोपकाराय रसाभिरामं ।
श्रीमन्महीपाल-नरेश्वरस्य चरित्रमेतद्रचयामि कामं ॥४॥

अन्तभाग:—

नित्यं सच्छुक्लपक्षस्थितिरतिविशदो नाशितश्यामपक्षो ।
विध्वस्ताशेषदोषो बहुमुनिमहितो भूरिशोभाभिरामः ।
विश्वाल्हादं ददानो हतनिखिलतमाः शश्वदामोदया च
श्रीमद्वाण्याख्यगच्छो परिविधुवदयं राजते शुद्धवृत्त ॥१॥
कल्याणावलिशालिनोऽत्र सुमनःश्रेणीश्रितो विश्रुतः
श्रीमान् मारकरो गणो विजयते यं(यो?) मेरुर्वान्निश्चलः ।
विश्वालंकरणस्य विस्तृतजुषः सन्नंदतस्याऽन्वहं
भांति स्फीतियुतस्य यस्य पुरतः पादा इवान्ये गुणाः ॥२॥
तस्मिन् विस्मयकारिचारुचरितश्चारित्रचूडामणिः
श्रीमान् श्रीविजयेन्दुसूरिरभवद्भव्यांगि-चिंतामणिः ।
तत्पट्टे समभून्महीन्द्रमहितः श्रीक्षेमकीर्तिर्गुरुः
कांस्कान्शेविबुधान् धिनोति नितरां यत्कल्पवृत्तिस्तथा ॥३॥

श्रीरत्नाकरसूरयः समभवन् ज्ञानांबुरत्नाकराः
कीर्तिस्फीतिमनोहरा शुभगुणश्रेणीलनांभोधरा ।
यन्नाम्नाऽत्रबलो गणोयमभवद्रत्नाकराख्यां परां
ख्यातेन क्षितिमंडलेपि सकले सत्यां तमोहारिणा ॥४॥
तस्यानुक्रमपूर्व्वशैलकरणिः कामद्विपोद्यत्सृणिः
सूरीशोऽभयनन्दि इत्यजनि सद्योगीन्द्रचूडामणिः ।
तत्पट्टे प्रकटप्रभावविदिते विध्वस्तवादिघृणिः
जज्ञे श्रीजयकीर्तिसूरिरसमो भव्यात्मचिन्तामणिः ॥५॥

कीर्तिर्यस्य निरस्ततापनिवहा सच्छीलदंडस्थिता
चंचच्चंद्रकलोज्वला दशदिशां श्वेतातपत्रायते ।
तत्पट्टे स्फुटकादिकुंजरघटासिंहो रुद्रंहोव्रजः ।
सूरीन्द्रो जयताच्चिरं गणधरः श्रीरत्ननंद्याभिधः ॥६॥
तस्यानेकविनेय-सेवितपदांभोज''भव्यावली
चंचन्नेत्रचकोरचंद्रमहशस्थानमग्रभूमीपतेः ।
शिष्याणु रचयांचकार चतुरश्चारित्ररम्याऽभिधो ।
विश्वाश्चर्यकरं महीपचरितं नानाविचारोद्धुरं ॥७॥
श्रीरत्ननंदिगुरुपादसरोरुहालिश्चारित्रभूषणकविर्य्येदिदं ततान ।
तस्मिन्महीपचरिते भयवर्णनाख्यः सर्गः समाप्तमगमत्किल पंचमोऽयं ॥८॥

इति श्रीभट्टारकश्रीरत्ननंदिसूरिशिष्य-महाकविवरचारित्रभूषण-विरचिते श्रीमहीपालचरिते पंचमः सर्गः । इति श्रीमहीपालचरित्रं काव्यं संपूर्णं । ग्रन्थ सं० ६६५ । संवत्सरे गुण-रुद्रनेत्र-वसु-चन्द्रयुते १८३६ का भाद्रपदमास-कृष्णपक्षषष्ठ्यां तिथौ । [जयपुर प्रति

५४. मदनपराजय (ठक्कुर जिनदेव)

आदिभाग :—

यदामलपदपद्मं श्रीजिनेशस्य नित्यं शतमख-शतसेव्यं पद्मगर्भादिवंद्यं ।
दुरितवन-कुठारं ध्वस्तमोहांधकारं सदखिलसुखहेतुं त्रिःप्रकारैर्नमामि ॥१॥
यः शुद्ध-रामकुल-पद्म-विकाशनार्को जातोऽर्थिनां सु[र]तरुर्भुवि चंगदेवः ।
तन्नंदनो हरिरसत्कविनागसिंहः तस्मा[द्भि]षग्जनपतिर्भुवि नागदेवः ॥२॥
तज्जावुभौ सुभिषजाविह हेम-रामौ रामात्प्रियंकर इति प्रियदोऽर्थिनां यः ।
तज्जश्चिकित्सित-महांबुधि-पारमाप्तः श्रीमल्लुगिज्जिनपदांबुज-मत्त-भृंगः ॥३॥
तज्जोहं नाग(जिन ?)देवाख्यः स्तोकज्ञानेन संयुतः ।
छंदोऽलंकार-काव्यानि नाभिधानानि वेद्म्यहं ॥४॥

कथा प्राकृतबंधेन **हरदेवेन** या कृता।
वक्ष्ये संस्कृतबंधेन भव्यानां धर्मवृद्धये ॥५॥

× × × ×

इति श्रीठक्कुरमाइंदसुत-**जिनदेव**-विरचिते स्मरपराजये सुसंस्कृतबंधे मुक्तिस्वयंवरो नाम पंचमः परिच्छेदः।

अन्तभाग :—

पाठ्यते यः शृणोतीदं स्तोत्रं स्मरपराजयं।
तस्य ज्ञानं च मोक्षः स्यात् स्वर्गादीनां च का कथा ॥१॥
तावद्दुर्गतयो भवन्ति विविधास्तावन्निगोद-स्थितिः
तावत्सप्तसुदारुणा हि नरकास्तावद्दरिद्रादयः।
तावद्दुःसहघोरमोहतमसाच्छन्नं मनः प्राणिनां
यावन्मार-पराजयोद्भवकथामेतां च शृण्वंति न ॥२॥

तथा च—शृणोति वा वक्ष्यति वा पठेत्तु यः कथामिमां मारपराजयोद्भवां।
सोऽसंशयं वै लभतेऽक्षयं सुखं शीघ्रेण कायस्य कदर्थनं विना ॥३॥
अज्ञानेन धिया विना किल जिनस्तोत्रं मया यत्कृतं
किं वा शुद्धमशुद्धमस्ति सकलं नैवं हि जानाम्यहं।
तत्सर्वं मुनिपुंगवाः सुकवयः कुर्वंतु सर्वे क्षमां
संशोध्याशु कथामिमां स्वसमये विस्तारयंतु ध्रुवं ॥४॥

इति मदनपराजयं समाप्तं।

५५. श्वेताम्बरपराजय (कवि जगन्नाथ)

आदिभाग :—

बुभुक्षाद्या यमीशानं न हि दुःखयितुं क्षमाः।
अनंतसुखसद्भावात्तस्मै श्री **नेमये** नमः ॥१॥
पदांबुज-मधुव्रतो भुवि **नरेन्द्रकीर्त्तेर्गुरोः**
सुवादिपदभृद्बुधः प्रकरणं **जगन्नाथवाक्**।

सिताम्बरपराजयाह्वयमिदं हि चेक्रीयते
जिनागम-विशालधी-विबुध-लालजीकाशया ॥२॥
पंचसहस्रथाद्युक्तं सांशयिकैर्यत्कुयुक्तिबलतस्तत् ।
सर्वं प्रत्याचष्टे धीरो वादी जगन्नाथः ॥३॥

इह हि नेमिनरेन्द्रस्तोत्रे स्वोपज्ञे—
"यदुत तव न भुक्तिर्नष्टदुःखोदयत्वाद्वसनमपि न चांगे वीतरागत्वतश्च ।
इति निरुपमहेतू न ह्यसिद्धाद्यसिद्धौ विशदविशददृष्टीनां हृदिलः(?)सुयुक्तये"—

इति पद्यमाकर्ण्य लालजीनामवर्णिभिरवादि पद्यस्यास्य वृत्तिकरण-मिवा(षा)त्पंचसहस्रीमतं सांशयिककल्पितं खंडनीयं ततस्तन्निमित्तमासाद्य सिताम्बरपराजयं नाम प्रकरणं कुरुते । तत्र तावत् केवलिनि कवलाहारवत्वेन विरोधमभिधत्ते—

अन्तभाग :—

इति दर्पता प्रबलतमयुक्ति-कुलिश-चूर्णिताखिलैकान्त-वादिभूधरै-र्दिगम्बरसुरवरैर्मा विवादेनेति ।

वत्से गुणाभ्रवीतेन्दुयुते (१७०३) दीपोत्सवे दिने ।
भुक्तिवादः समाप्तोयं सितम्बर-कुयुक्तिहा ॥१॥

इति श्वेताम्बरपराजये कवि-गमक-वादि-वाग्मित्वगुणालंकृतेन खंडिल्ल वंशोद्भव पोमराजश्रेष्ठिसुतेन जगन्नाथवादिना कृत केवलिभुक्तिनिरा-करणं समाप्तम् ।

५६. चतुर्विंशतिसन्धानकाव्य-सटीक (कवि जगन्नाथ)

आदिभाग :—

श्रेयान् श्रीवासुपूज्यो वृषभजिनपतिः श्रीद्रुमांकोऽथ धर्मो
हर्यंकः पुष्पदन्तो मुनिसुव्रतजिनोऽनंतवाक् श्रीसुपार्श्वः ।
शांतिः पद्मप्रभोऽरो विमलविभुरसौ वर्द्धमानोप्यजांको
मल्लिर्नेमिर्नमिर्मां सुमतिरवतु सच्छ्रीजगन्नाथधीरं ॥१॥

(स्रग्धरा छन्दात्मक इसी पद्यको २५ वार लिखकर उसका २५ प्रकारसे अर्थ किया है, एक एक प्रकारमें २४ तीर्थंकरोंकी स्तुति अलग अलग और २५ वें में समुच्चय स्तुति २४ तीर्थंकरोंकी की है।)

प्रणम्यांघ्रियुग्मं जिनानां जगन्नाथपूज्यांघ्रिपाथोरुहाणां।
वरैकाक्षरार्थैर्महायुक्तियुक्तैः सुवृत्तिं च तेषां नुतेश्चकरोमि ॥१॥

वाग्देवतायाश्चरणाम्बुजद्वयं स्मरामि शब्दांबुधिपारदं वरं।
यन्नाममात्रस्मरणोद्युक्तो(द्यतानि ?)हरंत्यघं कोविदमानसानि ॥२॥

अप्रसिद्धनिनादेषु नात्र कार्या विचारणा।
एकाक्षरसुकोषस्य पद्यं दृष्ट्वाऽवगम्यतां ॥३॥

पद्यस्य यस्य कस्यापि वाच्ययुग्मं हि चित्रकृत्।
चतुर्विंशतिसद्वाच्यैरेतत्कुर्वीत किं न शं ॥४॥

इति प्रस्तावना। चतुर्विंशतिजिनानामेकपद्यं कृत्वा तस्य चतुर्विंशतिभिरर्थैर्जगन्नाथस्तान् स्तौतीति तावदादिजिनस्य वृषभस्य स्तुतिः। तथा हि—अमौ लोकोत्तरः वृषभजिनपतिः।

इति श्रीचतुर्विंशतिजिनस्तुतावेकाक्षर-प्रकाशिकायां भट्टारकश्री-नरेन्द्रकीर्ति-मुख्यशिष्य-पंडितजगन्नाथ-विरचितायां प्रथमतीर्थंकरश्रीवृषभनाथस्तुतिः समाप्ता।

अन्तभाग :—

नयनय(नवनव ?)धररूपांके(१६६९) सुवत्से तपोमा-
स इह त्रिशदपंचम्यां च सत्सौरिवारे।
विहितजिनमहोत्रावत्पुरे सौधशुभ्रे
सुजिननुतिमकार्षीच्छ्रीजगन्नाथनामा ॥२६॥

इति श्रीमदेकाक्षरप्रकाशिका चतुर्विंशतिजिनस्तुतिः समाप्तमगमत् श्रीरस्तु। अथ काव्यफलं स्वरूपं च वच्मः॥

पद्येस्मिन् मयकाकृतां नुतिमिमां श्रीमच्चतुर्विंशति-
तीर्थेशां कलुषापहां च नितरां तावद्भिरथैर्वरैः।
प्रत्येकं किल वाच्य-वाचकवरैर्बोध्यांबुधैर्वृत्तितः
पूर्वाह्णादिषु यो ब्रवीति लभते स्थानं जगन्नाथतः ॥१॥
काव्येऽस्मिन्भुवि कोविदाः स्तुनिमये तीर्थंकराणां वरे।
सल्लभ्ये बुधचित्तचमत्कृतिकरे चित्तं दधीध्वं सदा।
वाक्याशुद्धवचोपि यद्भणिततः कुर्वीध्वम(?)त्रापि सत्(शं ?)
तस्माच्चि(न्त्य)तिमिदं समस्तसुखदं न ज्ञायते किं फलं ॥२॥
जननि भारति सज्जिनतुण्डजे सुमति लोकलतावन(?)तत्परे।
भव सरस्वति मे कलुषापहा तव पदांबुजभक्तियुजः सदा ॥३॥
इति श्रीचतुर्विंशतिजिन-स्तुतिः कविजगन्नाथकृता पूर्णा॥

५७. मौनव्रतकथा (गुणचन्द्र सूरि)

आदिभाग :—

सकलज्ञानसम्पूर्णान् नत्वा श्रीजिननायकान्।
मौनव्रतकथां वक्ष्ये भव्यानां हितसिद्धये ॥१॥

अन्तभाग :—

श्रीमूलसंघेऽघविघातिनीह प्रद्योतमानान्यमतानि नेशुः।
सारस्वतोगच्छ इहैव नंद्याम्नायमद्बलात्कारगणाभियुक्तः ॥२६॥
श्रीरत्नकीर्तिरभवज्जगतांवरेण्यश्चारित्ररत्ननिवहस्य बभार भारं।
तदन्वितो यतिवरः कृतिदेवकीर्तिः चारित्ररंजितजनोद्गदितासुकीर्तिः॥२७
तदग्रशि(तच्छि)ष्यो गुणचन्द्रसूरिरभवच्चारित्रचेतोहर-
स्तनेयं रचिता कथा व्रतवतां पुण्यांकुरोत्पादिका।
श्रीमत्पंचमतीर्थचैत्यसदने सद्दागलेन्द्रंगके(?)
श्रीमौनव्रतसत्फलार्थकथका नन्दत्वियं भूतले ॥२८॥
इति मौनव्रतकथा समाप्ता।

५८. षट्चतुर्थ-वर्त्तमान-जिनार्चन (पं० शिवाभिराम)

आदिभाग :—

अथ षट्चतुर्थवर्तमानजिनार्चनं समुदीरयामः।

यशः समानंदति विष्टपत्रयं यदुग्रतेजः प्रसरत्प्रभाभिरं।
नरेंडिव प्रस्खलिताहितद्युतेर्जिनेशिनस्तं हृदयेऽनिशं दधे ॥१॥

अन्तभाग :—

अभवदजितविष्णो मन्मथारातिभक्तो नृपनिकरशिरोरुमौलिरत्नप्रभार्च्यः।
पुषदवनिपसूनुर्यः शिवारामनाम्ना व्यरचि जिनवरार्चात्रृस्तरत्नप्रभार्कैः॥११॥
परमसुखविचित्रं शुद्धसद्भावजातं गुणगणितविनाशं कर्मकांतारदावं।
विभय-विभवसारं शुद्धजीवावतारं जिनवरपदभक्तेर्यातु भक्त्यास्पदं भोः॥१२॥
भवतु विभवभूरिर्मुक्तिकांतार्चकानां भवतु विभवभूरिस्तद्रतानंदितानां।
भवतु विभवभूरिः सद्गुरूणां जनानां भवतु विभवभूरिः सर्वजीवात्मकानां॥१३॥
विशदविजयसारमालवाख्याख्ययाख्ये द्विजनगरदुर्गेभाति देवालयो वा
जिनवर-पद-भक्तिर्विघ्नते यज्जनानां न तु कुमतकुवृत्तिग्रंथपंथात्मकानां ॥१४॥
अरिकुलवनदाहो यत्र सामंतसेनः स्वकुलगतमुवृत्तिस्कंधसालंबभूतः।
हरितनुजतनूजो वानुरुद्धः पृथिव्यामिव कविकुलपालो राज्यरामां बभार॥१५
तदखिलवरराज्यप्राज्यसाहाय्यमाने रघुपतिरिति नाभाभून्महेज्यो महात्मा।
तदखिलकुलभूपस्तत्सुतो धन्यराजो मम परममुभक्तो सोत्र साहाय्यकोभूत्॥१६॥
रहितविभवभूपास्त्यक्ततारम्यदेशा जिनवरपदभक्तिमात्रसम्यग्धनाढ्याः।
शिवगतजिनभूमेर्वंदनासक्तचित्ताः मुचिरतरविहारं कुर्महे धर्मसिद्ध्यै ॥१७॥
नवशि(?)च नयनाख्ये कर्मयुक्तेन चंद्रे गतिवति सति जंतौ विक्रमस्यैव काले।
निपतदतितुषारे माघचंद्रावतारे जिनवरपदचर्चासिद्धये संप्रसिद्धा ॥१८॥

गुणभद्रभदंतोक्त्या स्वयंसिद्धान्तरै‥कैः।
जातेयं वीतरागार्चा नमस्कर्तव्यमत्र वै ॥१९॥

यावत्सज्जनचित्तनिश्चलधरा यावज्जलश्रीधरा
यावच्चक्रधरा सुरेश्वरधरा पातालपाताधरा ।
यावच्चन्द्रदिवाकरपृथुधरा यावच्च धर्मस्थिति-
स्तावच्छ्रीजिनराजचंद्रचरणपूजा समानंदतु ॥२०॥
शिवाभिरामाय शिवाभिरामं शिवाभिरामात्र शिवाभिरामैः ।
शिवाभिरामप्रदकं भज त्वं मुहुर्मुहुर्भो वद किं वदामि ॥२१॥

इति श्रीषट्चतुर्थवर्तमानजिनार्चा शिवाभिरामावनिपसूनुक्तताऽद्भुततरेयं समाप्ता ।

५६. पार्श्वपुराण (भ० चन्द्रकीर्ति)

आदिभाग :—

मुक्तिस्त्रीहृदयाश्लिष्टं केवलश्रीविभूषणं ।
श्रीसर्वज्ञमहं वन्दे प्राप्तानंतचतुष्टयम् ॥१॥

× × ×

स जीयाद्रामसेनाख्यः काष्ठांबरनभोंशुमान् ।
भट्टारकः सदाश्रेष्टः शब्दशास्त्राब्धिपारगः ॥३०॥
महापुराणसत्काव्य-कीर्तनान्निचितं यशः ।
भूतले यस्य जीयात्स जिनसेनो यतीश्वरः ॥३१॥
यदुत्तरपुराणस्य कर्ता नैयायिकः सुधीः ।
सूरिः श्रीगुणभद्राख्यो भू(जी)याद्भूमंडले कविः ॥३२॥

अन्तभाग :—

स्वस्ति श्रीमति काष्ठसंघतिलके गच्छे सुनन्दीतटे
वादीन्द्रोरुसुपण्डितेन्द्रकविसच्चन्द्रावलीभूषिते ।
आसीदन्वयमण्डितो गुणनिधिर्विद्यागणाधीश्वरः
सूरिः श्रीयुतरामसेन इह वै विद्यानवद्यः सदा ॥६५॥

यस्मिन्निवासं विदधे प्रसिद्धा स्याद्वादविद्या सततं मनोज्ञा ।
वृत्तं प्रवृत्तं विशदं च यत्र विजृंभते तस्य कथं न कीर्तिः ॥६६॥
तदन्वयेऽभूत्किल धर्मसेनः सूरिस्तपोभूषितधर्मसेनः ।
नमत्पदाम्भोजसुरेन्द्रसेनः स्याद्वादविनिर्जितवादिसेनः ॥६७॥
विशदपाद[सु]पंकजभास्करः सकलशास्त्रसुपीतरसोत्करः ।
अखिलसूरिवरस्तपसां निधिर्विमलसेनमुनिः समभूत्सुधीः॥६८॥
तत्पट्टपूर्वाचलचण्डरोचिः सूरीश्वरोऽभूत्सुविशालकीर्तिः ।
यद्देशनाकर्णनतः प्रहृष्टा बुधा न मुह्यन्ति सुधारसेऽपि ॥६९॥
तत्पट्टवारांनिधिशीतरोचिर्भट्टारकोऽभूत्किल दिव्यरोचिः ।
बभूव गच्छेश्वरविश्वसेनः स्वदेशनारंजितसद्रसेनः ॥७०॥
काष्ठासंघे गच्छनन्दीतटीयः श्रीमद्विद्याभूषणाख्यश्च सूरिः ।
आसीत्पट्टे तस्य कामान्तकारी विद्यापात्रं दिव्यचारित्रधारी ॥७१॥
तत्पट्टाम्बरभूषणैकतरणिः स्याद्वादविद्याचिणो(?)
विद्वद्वृन्दकुलाभिमानशिखरीप्रध्वंसतीव्राशनिः ।
सच्चारित्रतपोनिधिर्मतिवरो विद्वत्सु शिष्यैर्युतः ।
श्रीश्रीभूषणसूरिराट् विजयते श्रीकाष्ठसंघाग्रणीः ॥७२॥
यदग्रतो नैति गुरुर्गुरुत्वं श्लाघ्यं न गच्छत्युशनोऽपि बुद्धया ।
भारत्यपि नैति माहात्म्यमुग्रं श्रीभूषणः सूरिवरः स पायात् ॥७३॥
वाणी यस्योत्कृष्टपीयूषजेत्री रूपं यस्यानन्तसौन्दर्यहारी ।
धत्ते वृत्ताद्यो गणे शोभमानं श्रीश्रीभूषाख्यश्च सूरिः स जीयात् ॥७४॥
तस्य श्रीजयवच्छिष्यो जाड्यपात्रं समस्यलं(?) ।
आचार्यश्रीचन्द्रकीर्त्याख्यो रोलंचोऽर्हत्पदाम्बुजे ॥७५॥
श्रीपार्श्वनाथस्य पुराणमुत्तमं सन्तोषकृत्तेन सतां तदुत्तमम् ।
विनिर्मितं भाववतो न भूरिणा श्रीचन्द्रकीर्त्याख्यकवीन्द्रसूरिणा ॥
भूरिशास्त्रनिपुणा विमत्सराः शोधयन्तु सुधियश्च सन्नराः ।
कूटमत्र भणितं च यन्मया पार्श्वनाथसुपुराणसागरे ॥७७॥

× × × ×

श्रीमद्देवगिरौ मनोहरपुरे श्रीपार्श्वनाथालये
वर्षेऽब्धीषुरसैकमेय(१६५४) इह वै श्रीविक्रमांकेस(श्व)रे।
सप्तम्यां गुरुवासरे श्रवणभे वैशाखमासे सिते
पार्श्वाधीशपुराणमुत्तममिदं पर्याप्तमेवोत्तरम् ॥
यावद्धरामेरुकुलाचलेन्द्रमन्दाकिनीमुख्यपदार्थवर्गाः।
तिष्ठंतु तावत्परमं पुराणं नन्द्यादिदं पार्श्वजिनेश्वरस्य ॥
द्वेसहस्रे तथा सप्तशतीपंचदशोत्तरे(२७१५)।
अस्यैव ग्रन्थराजस्य मानमुक्तं कवीशिनः ॥

इति श्रीत्रिजगदेकचूडामणिश्रीपार्श्वनाथपुराणे श्रीचन्द्रकीर्त्याचार्य-प्रणीते भगवन्निर्वाणकल्याणकव्यावर्णनो नाम पंचदशः सर्गः।

समाप्तश्चायं ग्रन्थः।

६०. छन्दोनुशासन (जयकीर्ति)

आदिभाग :—

श्रीवर्धमानमानम्य छन्दसां पूर्वमक्षरं।
लक्ष्यलक्षणमावीक्ष्य वक्ष्ये छन्दोनुशासनं ॥१॥
छन्दःशास्त्रं वहित्रं तद्विवक्षोः काव्यसागरं।
छन्दो भाग्याश्रयं सर्वं न किंचिच्छन्दसो विना ॥२॥

अन्तभाग :—

माण्डव्य-पिंगल-जनाश्रय-सैतवाख्य-
श्रीपूज्यपाद-जयदेव-बुधादिकानाम्।
छन्दांसि वीक्ष्य विविधानपि सत्प्रयोगान्
छन्दोऽनुशासनमिदं जयकीर्तिनोक्तं ॥

इति जयकीर्तिकृतौ छन्दोनुशासन········ सम्वत् ११६२ असाढ-सुदि १० शनौ लिखितमिदमिति। [जैसलमेर प्रति

६१. प्रद्युम्नचरित (महासेन सूरि)

आदिभाग :—

श्रीमन्तमानम्य जिनेन्द्रनेमिं ध्यानाग्निदग्धाखिलघातिकक्षम् ।
व्यापारयामास न यत्र बाणान् जगद्विजेता मकरध्वजोऽपि ॥१॥
बाल्येपि यस्याप्रतिमं सुरेन्द्रो विलोक्य रूपं पुनरीक्षते स्म ।
चक्षुः सहस्रं युगपद्विधाय नत्वा च तं वीरजिनं विरागम् ॥२॥
जिनेन्द्रवक्त्राम्बुजराजहंसीं प्रणम्य शुक्लामथ भारतीं च ।
उपेन्द्रसूनोश्चरितं प्रवक्ष्ये यथागमं पावनमात्मशक्त्या ॥३॥
कवीन्द्र-सीमानमितैर्यदुक्तं गणेश्वराद्यैरपि विस्तरेण ।
तत्पादपद्मद्वयभक्तिशक्त्या संक्षिप्य तद्वक्तुमयं श्रमो नः ॥४॥

अन्तभाग :—

श्रीलाटवर्गटनभस्तलपूर्णचन्द्रः शास्त्रार्णवान्तगसुधीस्तपसां निवासः ।
कांता(कंतोः) कलावपि न यस्य शरैर्विभिन्नं स्वान्तं बभूव स मुनिर्जयसेननामा॥
तीर्णागमाम्बुधिरजायत तस्य शिष्यः श्रीमद्गुणाकर-गुणाकरसेनसूरिः ।
यो वृत्त-बोध-तपसा यशसा च नूनं प्रापत्परामनुपमामुपमां मुनीनां ॥२॥

तच्छिष्यो विदिताखिलोरुसमयो वादी च वाग्मी कविः
शब्दब्रह्म विचित्रधामयशसां मान्यां सतामग्रणीः ।
आसीत् श्रीमहसेनसूरिरनघः श्रीमुंजराजार्चितः
सीमा दर्शनबोधवृत्ततपसां भव्याब्जनी-बांधवः ॥३॥
श्रीसिन्धुराजस्य महत्तमेन श्रीपर्पटेनार्चितपादपद्मः ।
चकार तेनाभिहितः प्रबन्धं स पावनं निष्ठितमङ्गजस्य ॥४॥

श्रीमत्काममहानरस्य चरितं संसारविच्छेदनः
श्रद्धाभक्तिपराः प्रबुद्धमनसाः शृण्वन्ति ये सत्तमाः ।
संवेगात्कथयन्ति ये प्रतिदिनं योऽधीयते संततं
भूयासुः सकलास्त्रिलोकमहिताः श्रीवल्लभेन्दुश्रियः ॥५॥

श्रीभूपतेरनुचरो मघनो विवेकी शृङ्गारभावघनसागरसागसारं ।
काव्यं विचित्रपरमाद्भुतवर्ण-गुम्फं संलेख्य कोविदजनाय ददौ सुवृत्तं ॥६॥
श्रे० माणिक्येन लिखितं । सं० १५६६ वर्षे फाल्गुणसुदि ६ गुरौ ।
[कारंजा प्रति

६२. त्रिपंचाशत्क्रियाव्रतोद्यापन (भ० देवेन्द्रकीर्ति)

आदिभाग :—

श्रीदेवेन्द्रफणीन्द्रवृन्दविनुतं नत्वा जिनं सन्मतिं
हारासारतुषारगौरतनुभां श्रीशारदां शारदाम् ।
वंदित्वा गुणधारिणो मुनिगणान् श्रीगौतमादीन् ब्रुवे
त्रिःपंचाशदभिक्रियाव्रतविशिष्टोद्यापनार्चाविधिः ॥
चन्द्रोपकैः शोभितपुष्पमालाजालं लसत्तोरणमुत्पताकं ।
यो वारकाद्यैः सहितं हिताय विधाय जैनालयमंडपं सत् ॥
पूजोपचारं प्रचुरं पवित्रं पवित्रचित्तः श्रितनीतिवित्तः ।
लात्वा गृही वाऽथ महोत्सवेन भव्यैर्युतश्चैत्यगृहं समेति ॥
× × × ×
साहं बीजपयोजमध्यममलं कृत्वा शुभं मंडलं ।
त्रिःपंचाशदभीष्टकोष्टकयुतं सत्पंचवर्णैर्वरैः ॥
चूर्णैः रत्नभवै रर(?) कमलसच्छुभ्रवासो युगैः
सुस्नातार्चितभूषितैर्जिनमहः प्रारभ्यते पंडितैः ।

अन्तभाग :—

भव्याऽग्रवालसुकुलोत्पलपूर्णचन्द्र-श्रीराजमान्य-सुमहत्तरनाथनाम्नः ।
श्राद्धक्रियामहविधिः सदनुग्रहेण देवेन्द्रनामकविना विहितः श्रियैः स्यात् ॥
पद्मावद्धरणीधराढयविभवः श्रीविक्रम-स्वीकृतः ।
भ्राजत्सम्भवविप्रराजविबुधो देवेन्द्रपूज्यस्य(श्र)यः ॥

त्रि:पंचाशदभिक्रियाव्रतविधिः पूजाक्रमोऽसौ चतु-
श्चत्वारिंशदिशेव(?)षोडशशतेऽब्दे(१६४४) निर्मितो नन्दतु ॥५॥

× × × ×

जिनाभिषेकस्य विधिं विहाय प्रपठ्य शान्त्यै किल शान्तिपाठं।
विसर्ज पुष्पाक्षतकैस्तदीशान् प्रपूज्य संघं सुखमेधतां सः ॥

इति त्रिपंचाशत् क्रियाव्रतोद्यापनं समाप्तं।

६३. बृहत्षोडशकारणपूजा (सुमतिसागर)

आदिभाग :—

अनन्तसौख्यं सुपदं विशालं परंगुणोयं(णौघं?)जिनदेवसेव्यं।
अनादिकालप्रभवं व्रतेशं त्रिधाह्वये षोडशकारणं वै ॥१॥

अन्तभाग :—

अवन्तिकानामसुदेशमध्ये विशालशालेन विभाति भूतले।
सुशान्तिनाथोऽस्तु जयोऽस्तु नित्यमुज्जेनिकायां परदेव तत्र(?) ॥१॥
श्रीमूलसंघे विपुलेऽथ दूरे(?)ब्रह्मापगच्छे बलशालिने गणे।
तत्राऽस्ति यो गौतमनामधेयान्वये प्रशान्तो जिनचन्द्रसूरिः ॥२॥
श्रीपद्मनन्दिर्भवतापहारी देवेन्द्रकीर्ति .... ।
विद्यादिनंदिर्वरमल्लिभूषो लक्ष्मादिचन्द्रोऽभयचन्द्रदेवः ॥३॥

तत्पट्टेऽभयनन्दीशो रत्नकीर्तिगुणाग्रणीः।
जीयाद्भट्टारके लोके रत्नकीर्तिर्जगोत्तमः ॥४॥
सुमतिसागरो देवश्चक्रे पूजामघापहां।
खण्डेलवालान्वये सेयः प्रल्हादोल्हादवान् सुधीः ॥५॥
कर्त्तोपरोधपूजाय (?) मूलसंघविदाग्रणीः।
सुमतिसागरं देवं श्रद्धाकं षोडशकारणं ॥६॥

इति श्रीषोडशकारणोद्यापनपूजा समाप्ता।

६४. पंचकल्याणकोद्यापनविधि (ब्र० गोपाल)

आदिभाग :—

श्रीवीरनाथं प्रणिपत्य मूर्ध्ना वक्ष्ये जिनानां भुवि पंचकं च ।
कल्याणकानां ································ ॥

अन्तभाग :—

श्रीहेमचन्द्रसुगुरोः परमप्रसादात्सारा स्तुतिः सकललोकमनोमेयं(हरेयं ?) ।
नंद्यादनूरपि(?)च कौचविरं जिनानां (?) एकांतमासगणनाविधिरत्र मुख्यः॥१॥

गोपालवर्णिनाकारीपुकल्याणकवर्णनं ।
यदि शुद्धमशुद्धं वा शोधयंतु बहुश्रुताः ॥२॥

इति श्रीब्रह्मभीमाग्रहाद्ब्रह्मगोपालकृत-श्रीचतुर्विंशतिजिनपंचकल्याणक समुच्चयोद्यापनविधिरयं संपूर्णः ॥

६५. सिद्धचक्र-कथा (शुभचन्द्र)

आदिभाग :—

प्रणम्य परमात्मानं जगदानन्ददायकं ।
सिद्धचक्रकथां वक्ष्ये भव्यानां शुभहेतवे ॥१॥

अन्तभाग :—

श्रीपद्मनंदीमुनिराजपट्टे शुभोपदेशी शुभचन्द्रदेवः ।
श्रीसिद्धचक्रस्य कथाऽवतारं चकार भव्यांबुजभानुमाली ॥१॥
सम्यग्दृष्टिविशुद्धात्मा जिनधर्मे च वत्सलः ।
जालाकः कारयामास कथां कल्याणकारिणीं ॥२॥

६६. अंजनापवनंजय-नाटक (कवि हस्तिमल्ल)

आदिभाग :—

आदौ यस्य पुरश्चराचरगुरोरारब्धसंगीतक-
श्चक्रे नाट्यरसान् क्रमादभिनयन्नाखंडलस्तांडवं ।
यस्मादाविरभूदचिंत्यमहिमा वागीश्वराद्भारती
स श्रीमान् मुनिसुव्रतो दिशतु वः श्रेयः पुराणः कविः ॥१॥

नाद्यंते सूत्रधारः । अलमतिप्रसंगेन मारिष । इतस्तावत्प्रविश्य पारिपार्श्वकः । भाव अयम् । सूत्रधारः—आज्ञापितोऽस्मि परिषदा । यथा । अद्य त्वया तत्र भवतः सरस्वतीस्वयंवृतपतेर्भट्टारगोविन्दस्वामिनः सूनुना, श्रीकुमार-सत्यवाक्य-देवरवल्लभोदयभूषणनामार्यमिश्राणामनुजेन कवेर्वर्धमानस्याग्रजेन कविना हस्तिमल्लेन विरचितं विद्याधरनिबंधन-। ंजनापवनंजयनामनाटकं यथावत्प्रयोगेन नाटयितव्यमिति ।

अन्तभाग :—

श्रीमत्पांड्यमहीश्वरे निजभुजादंडावलंबीकृते ।
कर्णा[टा]वनिमंडलं पदनतानेकावनीसेवति(?) ।
तत्प्रीत्यानुसरन् स्वबन्धुनिवहैर्विद्वद्भिराप्तैः समं ।
जैनागारसमेत··गमे श्रीहस्तिमल्लो वसन् ॥ निष्क्रान्ताः सर्वे।

इति श्रीगोविन्दभट्टारस्वामिनः सूनुना श्रीकुमार-सत्यवाक्य-देवरवल्लभोदय-भूषणनामार्यमिश्राणामनुजेन कवेर्वर्धमानस्याग्रजेन कविना हस्तिमल्लेन विरचिते अंजनापवनंजयंनामनाटके सप्तमोऽङ्कः । समाप्तं चेदमंजनापवनंजयं नाम नाटकं । कृतिरियं हस्तिमल्लस्य ।

६७. शृङ्गारमंजरी (अजितसेनाचार्य)

आदिभाग :—

श्रीमदादीश्वरं नत्वा सोमवंशभवार्थितः ।
रायाख्य-जैनभूपने(पार्थे?) वक्ष्ये शृङ्गारमंजरीम् ॥१॥

अष्टाविंशं शतं तस्याः प्रमाणं श्लोकपद्यतः ।
अनुष्टुप्संख्यया पंचचत्वारिंशं शतं मतं ॥२॥
विदोषं सगुणं रीतिरसालंकारगं मुदे ।
काव्यं कुर्वीत शब्दार्थरचनानिपुणः कविः ॥३॥
× × × ×

अन्तभाग :—

राज्ञी विट्ठलदेवीति ख्याता शीलविभूषणा ।
तत्पुत्रः कामिरायाख्यो 'राय' इत्येव विश्रुतः ॥४६॥
तद्भूमिपालपाठार्थमुदितेयमलं-क्रिया ।
संक्षेपेण बुधैर्ह्येषा यद्यत्रास्ति(?) विशोध्यताम् ॥४७॥

इति श्रीमदजितसेनाचार्य-विरचिते शृङ्गारमंजरीनामालंकारे तृतीयः परिच्छेदः ॥

(दूसरी प्रतिमें[1]) श्रीसेनगणाग्रगण्यतपोलक्ष्मीविराजिताजितसेनदेव-यतीश्वरविरचितः शृङ्गारमंजरी नामालंकारोऽयम् ॥

६८. शङ्खदेवाष्टक (भानुकीर्ति)

आदिभाग :—

शतमखशतवन्द्यो मोक्षकान्ताभिनन्द्यो
दलितमदनचापः प्राप्तकैवल्यरूपः ।
कुमतवनकुठारः शङ्खरत्नावतारः
त्रिभुवननुतदेवः पातु मां शङ्खदेवः ॥१॥

अन्तभाग :—

जिनपदकमलालिर्जैनभूतेपि कालि-
र्मुनिपतिमुनिचन्द्रः शिष्यराजेन्द्रचन्द्रः ।

---

१ दोनों प्रति ऐ०प० सरस्वतीभवन बम्बईमें हैं। अगस्त सन् १६२८ में उन्हीं परसे यह प्रशस्ति ली गई थी।

सकलविमलसूक्तिर्भानुकीर्तिप्रयुक्ति-
स्त्रिभुवननुतदेवः पातु मां शङ्खदेवः ॥८॥

६६. तत्वार्थसूत्र-सुखबोधवृत्ति (भ० योगदेव)

आदिभाग :—

विनष्टसर्वकर्माणं मोक्षमार्गोपदेशकं ।
तद्गुणोद्भूतिलाभाय सर्वज्ञं जगतो गुरुं ॥१॥
आलंबनं भवांभोधौ पततां प्राणिनां परं ।
प्रणिपत्य **महावीरं** लब्धानंतचतुष्टयं ॥२॥
संक्षेपितागमन्यासां मुग्धबुद्धिप्रबोधिकां ।
सुखबोधाभिधां वक्ष्ये वृत्तिं तत्त्वार्थगोचरां ॥३॥

पादपूज्य(पूज्यपाद)विद्यानन्दाभ्यां यद्वृत्तिद्वयमुक्तं तत्केवलं · · तर्का-गमयोः पाठकैरबलाबालादिभिर्ज्ञातुं न शक्यते ततः संस्कृतप्राकृतपाठकानां सुखज्ञानकारणवृत्तिरियमभिधीयते ।

(इसके बाद '**मोक्षमार्गस्य नेतारं**' इत्यादि मंगल पद्य देकर उसकी व्याख्या की है और उसे सूत्रकारकृत सूचित किया है ।)

अन्तभाग :—

शुद्धेद्धतपःप्रभावपवित्रपादपद्मरजः किंजल्कपुंजस्य मनःकोणैक-देशक्रोडीकृताऽखिलशास्त्रार्थाम्बरस्य पंडितश्रीबन्धुदेवस्य गुणप्रबन्धाऽनु-स्मरणाज्जातानुग्रहेण प्रमाणनयनिर्णीताखिलपदार्थप्रपंचेन श्रीमद्भुजबल-**भीमभूपाल**-मार्तंडसभायामनेकधालब्धतर्क्क-चक्रांकत्वेनाबलाब(बा)लादीना-मात्मनश्चोपकारार्थे न पांडित्यमदविलासात्सुखबोधाऽभिधां वृत्तिं कृतां महा-**भट्टारकेण कुम्भनगर**वास्तव्येन पंडितश्री**योगदेवेन** प्रकटयंतु संशोध्य बुधा यदत्रायुक्तमुक्तं किंचिन्मतिविभ्रमसंभवादिति ॥

[इति] श्रीप्रचंडपंडितमंडली-मौनव्रतदीक्षागुरोर्योगदेवविदुषः कृतौ सुख-बोधाभिधानतत्वार्थवृत्तौ दशमोऽध्यायः समाप्तः ।

७०. विषापहार-टीका (नागचन्द्रसूरि)

आदिभाग :—

वंदित्वा सद्गुरून् पंचज्ञानभूषणहेतवः ।
व्याख्या विषापहारस्य नागचन्द्रेण कथ्यते ॥१॥

अथातः स्याद्वादविद्यापूर्वकुत्कीलकोटांकिरणमालिना गृहस्थाचार्यकुंजरेण धनंजयसूरिणा सामायिकमनुतिष्ठता तदानीमेव स्वकीयपुत्रस्य सर्पदष्टत्वमाकर्ण्यापि ततोऽचलता भगवद्गुणग्रामदत्तचित्तेनाचालमेव स्तुवता कृतस्य स्तवस्य प्रभावनिःकाशिततद्गतविषनिषेकांद्रेकस्य तत एव विषापहार इति व्यपदेशभाजोऽतिगहनगंभीरस्य सुखावबोधार्थं बागड़देशमंडलाचार्यज्ञानभूषणदेवैर्मुहुर्मुहुरुपरुद्धः कार्णाटादिराजसभे प्रसिद्धः प्रवादिगजकेशरीविरुदकविमदविदारी सद्दर्शनज्ञानधारी नागचंद्रसूरिर्धनंजयसूर्यभिहितार्थं व्यक्तीकर्तुमशक्नुवन्नपि गुरुवचनमलंघनीयमिति न्यायेन तदभिप्रायं विवरीतुं प्रतिजानीते ।

अन्तभाग :—

इयमर्हन्मतक्षीरपारावारपार्वणशशांकस्य मूलसंघदेशीगणपुस्तकगच्छ-पनशोकावलीतिलकालंकारस्य तौलवदेशविदेश-पवित्रीकरणप्रवणश्रीमल्ललितकीर्तिभट्टारकस्याग्रशिष्य - गुणवद्गणपोषण-सकलशास्त्राध्ययनप्रतिष्ठायात्राद्युपदेशानूनधर्मप्रभावनाधुरीण - देवचंद्रमुनीन्द्रचरणनखकिरणचंद्रिकाचकोरायमाणेन कर्णाय (?) विप्रकुलोत्तंस-श्रीवत्सगोत्रपवित्रपार्श्वनाथगुमटाम्बातनूजेन प्रवादिगजकेशरिणा नागचंद्रसूरिणा विषापहारस्तोत्रस्य कृतव्याख्या कल्पान्तं तत्त्वबोधायेति भद्रम् ।

इति विषापहारस्तोत्र-टीका समाप्ताः ।

७१. पाण्डवपुराण (श्रीभूषणकृत)

आदिभाग :—

प्रणम्य श्रीजिनं देवं सर्वज्ञं संभवं शिवं ।
कुर्वे हि पाण्डवानां हि चरित्रं चित्तरंजनम् ॥१॥

(प्रथम पद्यके बाद वृषभ, चंद्रनाथ, शान्ति, नेमि और महावीर भगवानकी स्तुति करके तदन्तर ब्राह्मीवाणी, गौतमगणधर, युधिष्ठिर, भीम, अर्जुन, नकुल और सहदेवकी स्तुति की गई है।)

भद्रबाहुर्मुनिर्जीयात् महाज्ञानी महादमी।
येन कृत्स्नं श्रुतं ज्ञातं पंचमो श्रुतकेवली ॥१२॥
विशाखाचार्यो मां पातु विशाखा भूतलेऽखिले।
अद्यापि वर्तते शुद्धा देवेन्द्रैरपि संस्तुतः ॥१३॥
स जीयाद्**रामसेनो**ऽपि प्रतिबोधनपंडितः।
दिग्वासा शुद्धचेतस्को निमित्तज्ञानभास्करः ॥१४॥
समंतभद्रो भद्रार्थो भानुभाभागभूषितः।
येन देवागमस्तोत्रं कृतं व्यक्तमिहावनौ ॥१५॥
अमित्यादिगतिर्यष्ट(?) शब्दव्याकरणार्णवः।
पुनातु पावनामूर्तिर्यस्य संवर्तते क्षितौ ॥१६॥
अकलंकश्चिरं जीयादकलंकोऽवनिश्रुतः।
पादेन ताडिता येन **मायादेवी** घटस्थिता ॥१७॥
त्रिषष्टिपुरुषाणां वै पुराणं येन निर्मितम्।
स जीयाज्**जिनसेन**श्च संदेहध्वांतभास्करः ॥१८॥
गुणादिभद्रपर्यंता सूरयो भांतु भूतले।
पुराणपूर्णसन्मार्गदर्शका रवयो यथा ॥१९॥
तं पुराणं समालोक्य **गौणभद्रं** विशारदं।
पुराणं पांडवानां हि ब्रुवे सूत्रानुसारतः ॥२०॥
नेमिसेनश्चिरं जीयाद्वियच्चारिः भवेद्बलात्।
पद्मावत्यपरं तीर्थमकरो**च्चारणर्द्धि**वत् ॥२१॥
रत्नकीर्तिः भवेद्रत्नरोहणाचलवत् सदा।
बाल्येपि येन निष्कामकामोपि कृतवान्मुनिः ॥२२॥
अन्वर्थो **धर्मसेनो**ऽभूद्धर्मसेनो गुणाग्रणीः।

वैराग्यरसवारीशो दिक्चेलो दमसंयुतः ॥२३॥
विमलसेनको सूरिः रविरिव विराजते ।
नानावस्तुकदंबानां द्योतको भुवनोदरे ॥२४॥
विश्वसेनमुनिर्जीयाद्विशालः सर्वकीर्तिकः ।
स्वन्यायचक्रचक्रेण जितं येनारिमंडलम् ॥२५॥
भाति भूवलये भूरिशोभाभरविभूषितः ।
विद्याभूषणसूरीन्द्रो ग्रंथानां ग्रंथने क्षमः ॥२६॥
ग्रंथार्णवसुगंभीरः क्वाऽत्र मे बुद्धिलाघवी ।
अतोऽहं साहसं मेने सर्वेषां हास्यदायकम् ॥२७॥
बहवः कवयोऽभूवन् जिनसेनादिका वराः ।
तत्पदांभोजनमनात्करिष्ये तत्पुराणकम् ॥२८॥
विवक्षन् हास्यतां याति यथा मूको तथाप्यहं ।
हास्यस्य भाजनं शास्त्रं विवित्सुर्ज्ञानलेशतः ॥२९॥
पंगुर्जिगमिषुर्मेरुमस्तकं निखिलैर्जनैः ।
विहस्यतेऽप्यहं शास्त्रं चिकीर्षुरंजसा तथा ॥३०॥
शास्त्रं कर्तुमशक्तोहं यद्यपि सादरो यतः ।
मंदा धेनुर्यथा वत्सं रक्षति क्षीरदानतः ॥३१॥
पूर्वाचार्यकृते ग्रन्थे मार्गसंदर्शनाल्लघु ।
क्रियते पावनं शास्त्रं मया स्वज्ञानशुद्धये ॥३२॥
सूर्यप्रकाशितो मार्गः दीपः किं न प्रकाशयेत् ।
पूर्वाचार्यैः कृतो ग्रंथो मया किं न करिष्यते ॥३३॥

× × × ×

(आगे दुर्जनादिका तथा कथा, वक्ता, श्रोताका स्वरूप वर्णित है ।)

अन्तभाग :—

छंदांस्यलंकारगणान्न वेद्मि अनेकशास्त्राणि विवेकजानि ।
जैनेन्द्रमुख्यानि सुलक्षणानि काव्यानि न्यायानि प्रबोधकानि ॥६३॥

गोमट्टसाराणि महार्णवानि त्रैलोक्यसाराणि सुतर्कंकाणि ।
मो विद्मयहं चाष्टसहस्त्रकानि नानाप्रकाशोद्गमकानि सद्यः ॥९४॥
ईदृग्विधोऽहं सततं विबुध्य भोः साधुवर्गाः प्रविमुच्य कोपं ।
विशोध्यतां मे कृतिमेव बुध्या बाले जने को हि हितं न कुर्यात् ॥९५॥
काष्ठासंघाख्यगच्छे जगति सुविदितः सारनंदीतटांको
धर्माधारोऽस्ति शस्तो मुनिगणसहितस्तत्र विद्यागणोऽपि ।
पूज्याः श्रीरामसेना गुरव इह बभूवुः पुरा पौरमान्याः
शाब्दांतोक्तोपपत्त्या चरणमनुपमं ये चरंते शरण्याः ॥९६॥
वशे तेषां प्रशस्येऽजनिषत् गुरवो धर्मसेनाभिधाना-
स्तत्पट्टे लब्धवर्णाः सुविमलपदतः सेनसंज्ञाः मुनींद्राः ।
सूरीशास्तत्पदेपि प्रचुरगुणयुताः श्रीविशालास्सुकीर्ति-
संज्ञा विज्ञातशास्त्रास्तृणमणिसुजनाऽमित्रतुल्यस्वभावाः ॥९७॥
तेषां पट्टे सुदक्षाः मुनिजनमहिता विश्वसेनाभिधानाः
सूरींदा वै वितंद्रा स्व(त ?)रणिसममहोद्योतिताशा बभूवुः ।
सूरिस्तेषां हि पट्टे सकलगुणगणाः प्रौढविद्याविभूषाः ॥९८॥
जीयात्तेषां हि पट्टे सकलगुणनिधिश्चारुचारित्रभूषः
श्रीमच्छ्रीभूषणाख्यो विबुधजननुतो जैनतत्त्वार्थवेदी ।
ज्ञाता दाता सुवक्ता परम[न]सकलान् वेत्ति विज्ञानदक्षः
तत्त्वातत्त्वप्रणेता विमलतरगुणश्चारुचारित्रयुक्तः ॥९९॥
शृण्वंति ये भावधिया पठंति चारित्रमेवं प्रवरं विशालं ।
लिख्यापयंत्यादरतो नितांतं भजंति ते सौख्यपरंपरां च ॥१००॥

(आगे दो पद्योंमें आशीर्वाद है ।)

विद्याविभूषोत्तमपट्टधारी शास्त्रस्य वेत्ता वरदिव्यवाणी ।
जीयात्पृथिव्यां जिनधर्मदाता श्रीभूषणोऽसौ यतिराट् नितांतं ॥१०३॥
कृतं चरित्रं शुभपांडवानां भटोत्तमानां प्रवरं सुपुण्यं ।
सुश्र्यादिभूषेण विशुद्धबोधात् पुरातनं वीक्ष्य पुराणमेव ॥१०४॥

श्रीगूर्जरे सौर्यपुरे विशाले वर्णाश्रये वर्णविवर्णनीये।
इदं चरित्रं कृतमेव भक्त्या श्रीचंद्रनाथालयमाश्रुलभ्या(?) ॥१०५॥
काष्ठासंघमहाल्लोके भाति भूवलये सदा।
श्रीनंदीतटनामांको विद्यागणगुणांबुधिः ॥१०६॥
तद्गच्छे रामसेनोभून्नेमिसेनो महामुनिः।
तथा श्रीलक्ष्मसेनश्च धर्मसेनो महायतिः ॥१०७॥
विमलसेनसूरिश्च विशालकीर्तिः कीर्तिभृत्।
विश्वसेनसूरींद्रोभूद्विद्याभूषणनामभाक् ॥१०८॥
तत्पट्टयोधने भानुः श्रीभूषणसूरीश्वरः।
जीयाज्जैनरतो धीमान् चारित्राचरणे रतः ॥१०९॥
श्रीविक्रमार्कसमयागतषोडशार्के सत्संदराकृतिवरे शुभवत्सरे वै।
वर्षे कृतं सुखकरं सुपुराणमेतत् पंचाशदुत्तरसुसप्तयुते(१६५७) वरेण्ये ॥११०
पौषमासे तथा शुक्ले पक्षे च तृतिया-दिने।
रविवारे शुभे योगे चरितं निर्मितं मया ॥१११॥
अस्य ग्रंथस्य विज्ञेयाः श्लोकाः पिंडीकृतास्तथा।
षट्सहस्रयुताः सर्वे वराः सप्तशतान्विताः (६७००) ॥११२॥
श्लोककाव्यान्यपि सर्वे ज्ञेयानि लेखकैस्तथा।
अत्र भ्रांतिर्न कर्तव्या ग्रन्थाग्रे च विचक्षणैः ॥११३॥
श्रीभूषणेन शुद्धेन निर्मितं चरितं वरं।
पांडवानां सुपुण्यानां सदा मांगल्यकारिणाम् ॥११४॥
पांडवानां पुराणं हि नानाशब्दार्थपूरितं।
जगत्यस्मिन् चिरंजीयात् पवित्रं सौख्यकारकं ॥११५॥

इति श्रीपांडवपुराणे भारतनाम्नि भट्टारक-श्रीविद्याभूषण-तत्पट्टाभरण-सूरिश्रीश्रीभूषणविरचिते पांडवोपसर्ग-केवलोत्पत्ति-मुक्तिगमन-सर्वार्थसिद्धिगमन-नेमिनाथमुक्तिगमन-वर्णनं नाम पंचविंशतिपर्व ॥

७२. अजितपुराण (पं० अरुणमणि)

आदिभाग :—

सर्वज्ञाय नमो नित्यं निरावरण-चक्षुषे ।
यद्बोधविशदादर्शे भुवनं भु(भ ?)वनायते ॥१॥

× × ×

सुभद्रं च यशोभद्रं लोहाचार्यं महामुनिं ।
जिनसेनं जितानंगं सर्वसंयतसेवितं ॥३०॥
पुराणं गदितं येन त्रिषष्टिपुरुषाश्रितं ।
वंदेऽहं गुणभद्रं च महागुणगणैर्वृतम् ॥३१॥
सूरिः श्रीश्रुतकीर्त्याख्यः सर्वशास्त्रार्थकोविदः ।
तनोतु भवतां भावं भवभ्रमणनाशनम् ॥३२॥
तेषां वाणीं नमाम्युच्चैः त्रैलोक्यार्थप्रदीपिकां ।
त्रिजगन्मंगलकरीं मुनीन्द्रैः सेवितां सदा ॥३३॥

अन्तभाग :—

श्रीमच्छ्रीकाष्ठसंघे मुनिगणनातीतदिग्वस्त्रयु(जु)ष्टे
तस्मिंश्रीमाथुराख्ये वृषभ-वृषयुते गच्छश्रेष्ठाधिपूज्ये ।
तन्मध्ये सर्वश्रेष्ठे परमपदप्रदे पुष्कराख्ये गणे च
लोहाचार्यान्वये च विगतकलुषितसंयतानेकजाताः ॥११॥
काष्ठसंघगणनाथकवीरं धर्मसाधनविधानपटीरं ।
राजते सकलसंघसमेतं धर्मसेनगुरुरेष विदेतं ॥१२॥
धर्मोद्धारविधिप्रवीणमतिकः सिद्धांतपारगमी
शीलादिव्रतधारकः शम-दम-क्षांति-प्रभा-भासुराः ।
वैभारादिकतीर्थराजरचितः प्राज्यप्रतिष्ठोदयः
तत्पट्टाब्जविकाशनैकतरणिः श्रीभावसेनो गुरुः ॥१३॥

कर्मग्रंथ-विचारसारसरिणी रत्नत्रयस्याकरः
श्रद्धावंधुरलोकलोकनलिनी-नाथोपमः सांप्रतम् ।
तत्पट्टेऽचलचूलिकासुतरणिः कीर्त्यादिविश्वंभरे
नित्यं भाति **सहस्रकीर्तियतिपः** ख्यातोऽसि(स्ति) दैगंबरः॥१४॥
श्रीमांस्तस्य **सहस्रकीर्तियतिनः** पट्टे विकष्टेऽभवत्
क्षीणांगो गुणकीर्तिसाधुरनघो विद्वज्जनानंदितः ।
मायामानमदादिभूधरपवी राद्धान्तवेदी गणी ।
हेयाहेयविचारचारुधिषणः कामेभकंठीरवः ॥१५॥
जीयाच्छ्रीगुणकीर्तिसाधुरसिकश्चारित्रदृग्ज्ञानभाक्
श्रीमन्माथुरसंघपुष्करशशी निर्मुक्तदंभारवः ।
तत्पट्टे व्रतशीलसंयमनदीनाथो **यशःकीर्तिराट्**
दुर्दंडैककुदर्पकाममथनो निर्ग्रन्थमुद्रावरः ॥१६॥
निःपापे जिनपादपंकजधरं विष्णुष्टचेतोगृहः(?) ।
शास्त्रारंभसुतुंडतांडवकरः स्याद्वादसंप्रेक्षणः ॥१७॥
तत्पट्टे श्रीजिनचंद्रसूरिर्वाणी जिनस्येव बभौ बुधेषु ।
विद्यात्रयी कंठविराजमानः तस्य त्रयीरत्नपवित्रगात्रः ॥१८॥
तच्छिष्यजातः **श्रुतकीर्तिसाधुः** श्रुतेषु सर्वेषु विशालकीर्तिः ।
तपोमयी ज्ञानमयी च कीर्तिर्यस्यर्षिसंघेषु बभौ शशीव ॥१९॥
तच्छिष्यजातो **बुधराघवाख्यो** **गोपाचले** कारितजैनधामा ।
तपोधनश्रीश्रुतसर्वकोविदः नरेश्वरैर्वंदितपादपद्मः ॥२०॥
तच्छिष्यज्येष्ठो बुधरत्नपालो द्वितीयकः श्री **वनमालिनामा** ।
तृतीयकः **कान्हरसिंघसंज्ञः** तस्यात्मजो **लालमणिः** प्रवीणः ॥२१॥
स्वशक्तिभाजा मणिना सुभक्तिना धियाल्पयोक्ता **रविवंशपद्धतिः** ।
यदत्र किंचिद्रचितं प्रमादतः परस्परव्याहतिदोषदूषितं ॥२२॥
तदप्रमादास्तु पुराणकोविदाः सृजंतु जंतुस्थितिशांतिवेदिनः ।
प्रशस्तवंशो **रविवंशपर्वतः** क्व मे मतिः क्वाल्पतराल्पशक्तिका ॥२३॥

व्युत्सृष्टापरसंघसंततिबृहल्लीकाष्टसंघान्वये
संप्रा[प्ता]रुणरत्ननामकविना लाभाय बोधे पुनः।
दृष्टोऽयं रविवंशपुण्यचरितः श्रीपार्वतः सर्वतो
व्याप्ताशामुखमंडलः स्थिरतरः स्थेयात्पृथिव्यां चिरं ॥३९॥
रस-वृष-यति-चंद्रे ख्यातसंवत्सरे(१७१६)ऽस्मिन्
नियमितसितवारे वैजयंती-दशम्यां ।
अजितजिनचरित्रं बोधपात्रं बुधानां
रचितममलवाग्मि-रत्नरत्नेन तेन ॥४०॥
मुद्गले भूभुजां श्रेष्ठे राज्येऽवरंगसाहिके।
जहानावाद-नगरे पार्श्वनाथजिनालये ॥४१॥

[सरसावा-मन्दिर-प्रति

७३. आदिनाथ-फाग (भ० ज्ञानभूषण)

आदिभाग :—

यो वृन्दारक-वृन्द-वन्दित-पदो जातो युगादौ जयी
हत्वा दुर्जय-मोहनीयमखिलं शेषश्च घातित्रयम्।
लब्ध्वा केवल-बोधनं जगदिदं संबोध्य मुक्तिं गत-
स्तत्कल्याणक-पञ्चकं सुरकृतं व्यावर्णयामि स्फुटं ॥१॥

अन्तभाग :—

सर्व्वानेव नवोनषट्शतमितान्(५९१)श्लोकान्विबुध्याऽत्र वै
शुद्धं ये सुधियः पठन्ति सततं ते पाठयन्त्वादरात्।
ये केचिन्निपुणा लिखन्ति लिखने ते शुद्धवर्णैः स्वय-
मन्यार्थे किल लेखयन्तु च पुरोः कल्याण-व्यावर्णनम् ॥
विख्यातो भुवनादिकीर्तिमुनिपः श्रीमूलसंघेऽभवत्
तत्पट्टेऽजनि बोधभूषणमुनिः स्वात्मस्वरूपे रतः।
जाता प्रीतिरतीव तस्य महता कल्याणकेषु प्रभो-
स्तेनेदं विहितं ततो जिनपतेराद्यस्य तद्वर्णनम् ॥

७४. भक्तामरस्तोत्र-वृत्तिः (ब्र० रायमल्ल)

आदिभाग :—

श्रीवर्धमानं प्रणिपत्य मूर्ध्ना दोषैर्व्यपेतं ह्यविरुद्धवाचं ।
वक्ष्ये फलं तद्वृषभस्तवस्य सूरीश्वरैर्यत्कथितं क्रमेण ॥१॥

अन्तभाग :—

सकलेन्द्रोर्गुरोर्भ्रातुर्जेसेति वर्णिनः सतः ।
पादस्नेहेन सिद्धेयं वृत्तिः सारसमुच्चया ॥३॥

(इसके पश्चात् दो श्लोकोंमें काव्योंका फल वर्णन किया है)

श्रीमद्हूंबडवंशमंडणमणिर्मह्येति नामा वणिक् ।
तद्भार्यागुणमंडिता व्रतयुता चम्पामितीताभिधा(?)॥६॥
तत्पुत्रो जिनपादकंजमधुपो रायादिमल्लो व्रती ।
चक्रे वृत्तिमिमां स्तवस्य नितरां नत्वा श्री(सु ?)वादींदुकं ॥७॥
सप्तषष्ठ्यंकिते वर्षे षोडशाख्ये हि संवते(१६६७) ।
आषाढश्वेतपक्षस्य पंचम्यां बुधवारके ॥८॥
ग्रीवापुरे महासिन्धोस्तटभागं समाश्रिते ।
प्रोत्तुंग-दुर्ग-संयुक्ते श्रीचन्द्रप्रभ-सद्मनि ॥९॥
वर्णिनः कर्मसीनाम्नः वचनात् मयकाऽरचि ।
भक्तामरस्य सद्वृत्तिः रायमल्लेन वर्णिना ॥१०॥

इति श्रीब्रह्मरायमल्ल-विरचिता भक्तामरस्तोत्रवृत्तिः समाप्ता ।

[रोहतक-मन्दिर-प्रति

७५. हरिवंशपुराण (ब्रह्म जिनदास)

आदिभाग :—

सिद्धं सम्पूर्ण-भव्यार्थं सिद्धेः कारणमुत्तमं ।
प्रशस्त-दर्शज्ञान-चारित्र-प्रतिपादनम् ॥१॥

सुरेन्द्र-मुकटाश्लिष्ट-पादपद्मांशुकेशरं ।
प्रणमामि महावीरं लोकत्रितय-मंगलम् ॥२॥*
वन्दे नेमीश्वरं भक्त्या त्रिदशाधिप-वंदितं ।
त्रिजगत्पूज्यपादाब्जं समस्ताऽघविनाशनं ॥३॥

× × ×

श्रीवीरजिननाथोक्तो गौतमं गणनायकं ।
सोऽर्थः प्राप्तः सुधर्म्मं च श्रीजम्बूस्वामिनं ततः ॥४६॥
विद्युच्चरं ततः कीर्तिमनुत्तरविदं क्रमात् ।
रविषेणाभिधाचार्यं जिनसेनगुरुं ततः ॥४७॥
तद्वाक्यरचनां प्राप्य मयाऽत्र क्रियते स्फुटं ।
ग्रन्थं सुखेन मनुजा यथा जानंति सत्कथां ॥४८॥
भद्रबाहुं प्रणम्याथ यतिसंघनमस्कृतं ।
श्रीकुन्दकुन्दाचार्यादीन् मुनीन् रत्नत्रयांकितान् ॥४९॥
गुरुसकलकीर्तिं च श्रुतांभोधिं महामुनिं ।
भक्त्या भुवनकीर्तिं च चंचत्कीर्तिं तपोनिधिं ॥५०॥
निर्ग्रंथान् शुद्धचारित्रानित्याद्यानपरानपि ।
अनुक्रमात्संगमुक्तान् रागद्वेषातिगान् सदा ॥५१॥
तन्मया जिनदासेन संक्षेपादुच्यतेऽधुना ।
हरिवंशस्य चरितं भव्य-श्रुति-सुखाकरं ॥५२॥

अन्तभाग :—

श्रीमन्नेमिचरित्रमुत्तममिदं नानाकथापूरितं
पापध्वान्त-विनाशनैक-तरणिः कारुण्यवल्लीवनं ।

* ये दोनों श्लोक मूलतः श्रीरविषेणाचार्यकृत पद्मचरितके हैं। अन्य पद्योंकी तरह इन्हें भी ग्रन्थमें उद्धृत किया गया है।

भव्यश्रेणिमनःप्रमोदसदनं भक्त्याऽनघं कीर्तनं
नानासत्पुरुषालिचेष्टितयुतं पुण्यं शुभं पावनं ॥३२॥
श्रीवर्द्धमानेन जिनेश्वरेण त्रैलोक्यवंद्येन [यदुक्त]मादौ ।
ततः परं गौतमसंज्ञकेन गणेश्वरेण प्रथितं जनानां ॥३३॥
ततः क्रमाच्छ्रीजिनसेननाम्नाचार्येण जैनागम-कोविदेन ।
सत्काव्यकेलीसदनेन पृथ्व्यां नीतं प्रसिद्धं चरितं हरेश्च ॥३४॥
श्रीकुन्दकुन्दान्वयभूषणोऽथ बभूव विद्वान् किल पद्मनन्दी ।
मुनीश्वरो वादिगजेन्द्रसिंहः प्रतापवान् भूवलये प्रसिद्धः ॥३५॥
तत्पट्टपंकेजविकाशभास्वान् बभूव निर्ग्रन्थवरः प्रतापी ।
महाकवित्वादिकलाप्रवीणस्तपोनिधिः श्रीसकलादिकीर्तिः ॥३६॥
पट्टे तदीये गुणवान्मनीषी क्षमानिधानो भुवनादिकीर्तिः ।
जीयाच्चिरं भव्यसमूहवंद्यो नानायतिव्रातनिषेवणीयः ॥३७॥
जगति भुवनकीर्तिः भूतले ख्यातकीर्तिः श्रुतजलनिधिवेत्ताऽनंगमानप्रभेत्ता ।
विमलगुणनिवासश्छिन्नसंसारपाशः स जयति जिनराजः साधुराजीसमाजः॥३८
सद्ब्रह्मचारी गुरुपूर्वकोऽस्य भ्राता गुणज्ञोऽस्ति विशुद्धचित्तः ।
जिनस्य दासो जिनदासनामा कामारिजेता विदितो धरित्र्यां ॥३९॥
श्रीनेमिनाथस्य चारित्रमेतदनेन नीत्वा रविषेण(जिनसेन)सूरेः ।
समुद्धृतं स्वान्यसुखप्रबोधहेतोश्चिरं नंदतु भूमिपीठे ॥४०॥

इति श्रीहरिवंशपुराणे भट्टारक सकलकीर्तिशिष्यब्रह्मजिनदास-विरचिते श्रीनेमिनाथ-निर्वाणवर्णनो नामैकोनचत्वारिंशत्तमः सर्गः ।

७६. सिद्धान्तसार (नरेन्द्रसेनाचार्य)

आदिभाग :—

भूर्भुवःस्वस्त्रयीनाथं त्रिगुणात्मत्रयात्मकं ।
त्रिभिः प्राप्तपरंधाम वन्दे विध्वस्तकल्मषं ॥१॥

नित्याद्येकान्त-विध्वंसि मतं मतिमतां मतं ।
यस्य सः श्रीजिनः श्रेयान् श्रेयांसि वितनोतु नः ॥२॥
श्रीमच्छ्रीजिनचन्द्रस्य वर्द्धमानस्य शासनं ।
देवैर्दीप्तगुणैर्दृष्टमिष्टमत्राऽभिनन्दतु ॥३॥
जैनीं द्विसप्ततिं नत्वाऽतीतानागतवर्तिनीं ।
तत्त्वार्थसंग्रहं वक्ष्ये दृष्ट्वागमपरम्परां ॥४॥

अन्तभाग :—

श्रीवर्द्धमानस्य जिनस्य जातो मेदार्यनामा दशमो गणेशः ।
श्रीपूर्णतल्लांकि(छि)त-देह-संस्थो यत्राभवत्स्वर्गसमा धरित्री ॥८३॥
कल्पोर्वी(र्वी)रुहतुल्याश्च हारकेयूरमण्डिताः ।
जाता ज्ञाय(त)स्ततो ज्ञाता संघोऽसौ ग्याटवागडः ॥८४॥
जातस्तत्र सतां मित्रः पद्मसेनो महामुनिः ।
यच्छिष्यकिरणाः सर्वे संप्रतप्यन्ति दुस्सहाः ॥८५॥
श्रीधर्मसेनोऽजनि तत्र संघे दिगम्बरः श्वेततरैर्गुणैः स्वैः ।
व्याख्या सुदन्तांशुभिरुल्लसद्भिर्वस्त्रावृतो यः प्रतिभासते स्य(स्म)॥८६॥
भंजन्वादीन्द्रमानं पुरि पुरि नितरां प्राप्नुवन्नुद्यमानं
तन्वन् शास्त्रार्थदानं रुचि रुचि रुचिरं सर्वथानिर्निदानं ।
विद्यादर्शोपमानं दिशि दिशि विकिरिन् स्वयं(स्वं) यशो योऽसमानं
तस्माच्छ्रीशान्तिषेणः समजनि सुगुरुः पाप-धूली-समीरः ॥८७॥
यत्रास्पदं विदधती परमागमश्रीरत्मन्यमन्यतसतीत्वमिदं तु चित्रं ।
वृद्धा च संततमनेकजनोपभोग्या श्रीगोपसेनगुरुराविरभूत्स तस्मात् ॥८८॥
उत्पत्तिस्तपसां पदं च यशसामन्यो रविस्तेजसा-
माद्रिः सद्वचसां विधिः सुतरसामासीन्निधिः श्रेयसां ।
आवासो गुणिनां पिता च शमिनां माता च धर्मात्मनां
न ज्ञातः कलिना जगत्सुकलिना श्रीभावसेनस्ततः ॥८९॥

ख्यातस्ततः श्रीजयसेननामा जातस्तपःश्रीत्तुतदुःकृतौघः ।
सत्तर्कविद्यार्णव-पारदृष्वा विश्वासगेहं करुणास्पदानाम् ॥६०॥
आचार्यः प्रशमैकपात्रमसमः प्रज्ञादिभिस्वैर्गुणैः
पट्टे श्रीजयसेननामसुगुरोः श्रीब्रह्मसेनो यतिः ।
सज्जल्पाम्बुधिमध्यमग्नवपुषः शश्वद्विकल्पोर्मितः(भिः?)
जल्पाका परवादिनोऽत्र विकलाः के के न जाता क्षितौ ॥६१॥
तस्मादजायत गणी गुणिनां गरिष्ठो भव्याम्बुजप्रतिविकाशन-पद्मबन्धुः ।
कंदर्पदर्पदलने भुवनैकमल्लो विख्यातकीर्तिरवनौ कविवीरसेनः ॥६२॥
श्रीवीरसेनस्य गुणादिसेनो जातः सुशिष्यो गुणिनां विशेषः ।
शिष्यस्तदीयोऽजनि चारुचित्तः सद्दृष्टिवन्तो(वान)त्र नरेन्द्रसेनः ॥६३॥
गुणसेनोदयसेनौ जयसेनो सम्बभूवुराचार्याः ।
तेषां श्रीगुणसेनः सूरिर्जातः कलाभूरिः ॥६४॥
अतिदुःषमानिकटवर्तिनि कालयोगे नष्टे जिनेन्द्रशिववर्त्मनि यो बभूव ।
आचार्यनामनिरतोऽत्र नरेन्द्रसेनस्तेनेदमागमवचो विशदं निबद्धम् ॥६५॥

इति श्रीसिद्धान्तसार(तत्त्वार्थ)संग्रहे आचार्यश्रीनरेन्द्रसेन-विरचिते द्वादशमः परिच्छेदः ॥१२॥

७७. द्रौपदी-प्रबंध (जिनसेन सूरि)

आदिभाग :—

स्रष्ट्रे (सृष्टेः) षोडशतीर्थाय कृतनामेति शान्तये ।
चक्रेशाय जिनेशाय नमः शान्ताय शान्तये ॥१॥
येन सप्तदशं तीर्थं प्रावर्त्त पृथुकीर्त्तिना ।
तस्मै कुन्थुजिनेन्द्राय नमः प्राक्चक्रवर्त्तिने ॥२॥
नमोऽष्टादशतीर्थेन प्राणिनामिष्टकारिणे ।
चक्रपाणिजिनाऽराय निरस्तदुरितारये ॥३॥

भास्वते हरिवंशाद्रिश्रीशिखामणये नमः ।
द्वाविंशत्तीर्थसच्चक्रनेमयेऽरिष्टनेमये ॥४॥
त्रिहीननवकोटीनां मुनीनां पादपंकजान् ।
स्मरामि स्मरजेतृणां तातृणां भववारिधौ ॥५॥
गौतमः श्रीसुधर्मा च जंब्वाख्यो मुनिपुङ्गवाः ।
त्रयः केवलिनः पूज्या नित्यं नः सन्तु सिद्धये ॥६॥
सृष्टिः(ष्टेः) **समयसारस्य** कर्ता सूरिपदेश्वरः ।
श्रीमते(?) **कुंदकुंदाख्यस्त**नुते मे दुरांमतिः(?) ॥७॥
समन्तभद्रो भद्रार्थो भातु भारतभूषणः ।
देवागमेन येनाऽत्र व्यक्तो देवागमः कृतः ॥८॥*
यथा मूको विवक्तुः सन् याति हास्यं जगत्रये ।
तथा शास्त्रं विवक्तुः सन् लोकेऽहं हास्यभाजनम् ॥९॥
यथा जिगिमिषुः पंगुः मेरुमूर्द्धानमुन्नतं ।
विहस्यते जनैः शास्त्रं चिकीर्षुश्चाहमंजसा ॥१०॥

अन्तभाग :—

द्वाविंशतिसमुद्रायुः अप्रवीचारसत्सुखं ।
कथिता **जिनसेनेन** द्रौपदीयप्रन्बधके ॥६४॥
वक्ता श्रोता प्रबन्धो शीलसंयुक्तभाग्यः
जिनकथितसुमार्गः क्रियते(?) भव्यराशिः । (...)
द्रौपद्याल्पचरित्रमेतर्दामिहं(ह) पिंडीकृतामासनैः(?)
चतुर्विंशति पंचशतानि गदिता सूरिस्य(?)जिनसेनवा(?) ॥६५॥

* भ० शुभचन्द्रके पाण्डवपुराण की प्रशस्तिमें भी यही श्लोक पाया जाता है (पृ० ४८)। और इस ग्रन्थके कर्ता जिनसेन कौनसे जिनसेन हैं तथा कब हुए हैं, यह अभी निर्णीत नहीं। आदिपुराण तथा हरिवंशपुराण-के कर्ता जिनसेनकी तो यह कृति मालूम नहीं होती।

७८. यशोधर-चरित (भ० सोमकीर्ति)

आदिभाग :—

प्रणम्य शंकरं देवं सर्वज्ञं जितमन्मथं ।
रागादिसर्वदोषघ्नं मोहनिद्रा-विवर्जितं ॥१॥
अर्हतः परमाभक्त्या सिद्धान्सूरीश्वरांस्तथा ।
पाठकान् साधव(कां)श्चेति नत्वा परमया मुदा ॥२॥
यशोधरनरेन्द्रस्य जनन्या सहितस्य हि ।
पवित्रं चरितं वक्ष्ये समासेन यथागमं ॥३॥
जिनेन्द्रवदनोद्भूतां नमामि शारदां परां ।
श्रीगुरुभ्यः प्रमोदेन श्रेयसे प्रणमाम्यहम् ॥४॥
यत्प्रोक्तं हरिषेणाद्यैः पुष्पदंतपुरस्सरैः ।
श्रीमद्वासवसेनाद्यैः शास्त्रस्यार्णवपारगैः ॥५॥
तच्चरितं मया नूनं बालेन शक्यते कथं ।
बाहुभ्यां सागरं घोरं केनापि तरितुं यथा ॥६॥
तेषां हि क्रमयोर्द्वंद्वं नमस्कृत्यातिभक्तितः ।
समुपार्ज्य महत्पुण्यं कुर्वे दूरेण पातकं ॥७॥

अन्तभाग :—

नंदीतटाख्यगच्छे वंशे श्रीरामसेनदेवस्य ।
जातो गुणार्णवैकश्च(वश्चैकः) श्रीमांश्च(मान्) श्रीभीमसेनेति॥६०॥
निर्मितं तस्य शिष्येण श्रीयशोधरसंज्ञकं ।
श्रीसोमकीर्तिमुनिना विशोध्याऽधीयतां बुधाः ॥६१॥
वर्षे षट्त्रिंशसंख्ये तिथिपरगणनायुक्तसंवत्सरे(१५३६) वै ।
पंचम्यां पौषकृष्णे दिनकरदिवसे चोत्तरास्ये(स्थे) हि चंद्रे ।
गोंढिल्यां मेदपाटे जिनवरभवने शीतलेन्द्रस्य रम्ये
सोमादिकीर्तिनेदं नृपवरचरितं निर्मितं शुद्धभक्त्या ॥६२॥

ग्रन्थाग्रं तु सहस्रैकमष्टादशसमन्वितं(१०१८) ।
चरितेदं चिरं जीयात्पवित्रं पापनाशनं ॥६३॥

इति श्रीयशोधरचरिते श्रीसोमकीर्त्याचार्य-विरचिते अभयरुचिभट्टारक-स्वर्गगमनो नाम अष्टमः सर्गः ॥८॥ ग्रन्थाग्रन्थ १०१८ ॥

इति श्रीयशोधरचरितं समाप्तं ।

७६. वर्धमानचरित (कवि असग)

आदिभाग :—

श्रियं त्रिलोकीतिलकायमानामात्यन्तकीं ज्ञातसमस्ततत्त्वम् ।
उपागतं सन्मतिमुज्ज्वलोक्तिं वंदे जिनेन्द्रं हतमोहतंद्रम् ॥१॥

अन्तभाग :—

(प्रथम प्रशस्ति)

मुनिचरणरजोभिः सर्वदा भू(पू)तधात्र्यां, प्रणतिसमयलग्नैः पावनीभूतमूर्धा ।
उपशमइवमूर्त्तः शुद्धसम्यक्त्वयुक्तः पटुमतिरितिनाम्ना विश्रुतः श्रावकोऽभूत्॥१
तनुमपि तनुतां यः सर्वपर्वोपवासैस्तनुमनुमप(पम?)र्धाः स प्रापयन्संचिनोति ।
सततमपि विभूतिं भूयसीमन्नदान-प्रभृतिभिरुरुपुण्यं कुन्दशुभ्रं यशश्च ॥२॥
भक्तिं परामविरतां समपक्षपातामातन्वती मुनिनिकायचतुष्टयेऽपि ।
वेरित्तिरित्यनुपमा भुवि तस्य भार्या सम्यक्त्वशुद्धिरिव मूर्तिमती सदाऽभूत्॥३
पुत्रस्तयोरसग इत्यवदातकीर्त्योरासीन्मनीषिनिवहप्रमुखस्य शिष्यः ।
चन्द्रांशुशुभ्रयशसो भुवि नागनंद्याचार्यस्य शब्दसमयार्णवपारगस्य ॥४॥

सद्वृत्तं दधता स्वभावमृदुना निःश्रेयसप्रार्थिना
साधूनां हृदयोपमेन शुचिना संप्रेरितः प्रेयसा ।
एतत्सादरमाऽऽर्यनंदिगुरुणा सिद्ध्यै व्यधत्ताऽसगः
कीर्त्युत्कीर्तनमात्रचारुचरितं श्रीसन्मतेः सन्मतेः ॥५॥

इति वर्धमानचरित्रं समाप्तम् ॥*

* यह प्रशस्ति पिटर्सन साहबकी चौथी रिपोर्टमें प्रकाशित हुई थी

(द्वितीय प्रशस्ति)

कृतं महावीरचरित्रमेतन्मया पर-स्व-प्रतिबोधनार्थं ।
सप्ताधिकं त्रिंशभवप्रबंधं पुरूरवाद्यन्तिमवीरनाथं ॥१०३॥

वर्द्धमानचरित्रं यः प्रव्याख्याति शृणोति च ।
तस्येह परलोकेऽपि सौख्यं संजायते तराम् ॥१०४॥

संवत्सरे दशनवोत्तरवर्षयुक्ते(६१०) भावादिकीर्तिमुनिनायकपादमूले ।
मौद्गल्यपर्वतनिवासव्रतस्थसंपत्सच्छ्रावकप्रजनिते सति निर्ममत्वे ॥१०५॥

विद्या मया प्रपठितेत्यसगाह्वकेन श्रीनाथराज्यमखिलं-जनतोपकारि ।
प्राप्ये च चौडविषये वरलानगर्यां ग्रन्थाष्टकं च समकारि जिनोपदिष्टं ॥१०६॥

इत्यसगकृते वर्द्धमानचरिते महाकाव्ये महापुराणोपनिषदि भगवन्निर्वाणगमनो नामाष्टादशः सर्गः* ॥

नोट—इन दोनों प्रशस्तियोंका विशेष ऊहापोह सम्पादक-द्वारा जैनहितैषी भाग ११ के अन्तर्गत 'पुरानी बातोंकी खोज' शीर्षक लेखमालामें किया गया है (देखो, उक्तलेखमालाका 'असगकृत वर्द्धमानचरित्रकी दो विभिन्न प्रशस्तियाँ' नामका ६ वाँ लेख, पृ० ३३६ से ३४३)।

और उन्होंने इसे संवत् १६७६ आश्विनमासकी लिखी उस प्रतिपरसे लिया था जो किसी समय मूलसंघी हर्षकीर्त्ति मुनिकी थी (देखो, रायल एशियाटिक सोसाइटी बम्बई ब्रांचके जर्नलका ऐक्स्ट्रा नम्बर, सन् १८६४)।

* यह प्रशस्ति आरा जैनसिद्धान्तभवनकी एक ताडपत्रीय प्रतिपरसे ली गई है, जिसका प्रथम-सर्गात्मक आदिभाग खण्डित है। बम्बई के मन्दिरकी प्रतिमें भी यह प्रशस्ति साधारणसे पाठभेद तथा कुछ अशुद्धियों-के साथ पाई जाती है।

८०. शान्तिनाथ-पुराण (कवि असग)

आदिभाग :—

श्रियं समग्रलोकानां पायिनीमनपायिनीं ।
बिभ्रतेऽपि नमस्तुभ्यं वीतरागाय शान्तये ॥१॥
अशेषभव्यसत्वानां संसारार्णवतारणं ।
भक्त्या रत्नत्रयं नौमि विमुक्तिसुखकारणं ॥२॥
लीलोत्तीर्णाखिलामेयविपुलज्ञेयसागरान् ।
इन्द्राभ्यर्च्यान् यतीन् वन्दे शुद्धान् गणधरादिकान् ॥३॥
सुमेधोभिः पुरा गीतं पुराणं यन्महात्मभिः ।
तन्मया शान्तिनाथस्य यथाशक्ति प्रवक्ष्यते ॥४॥

अन्तभाग :—

मुनिचरणरजोभिः सर्वदाभू(पू ?)तधात्र्यां प्रणतिसमयलग्नैः पावनीभूतमूर्द्धा
उपशम इव मूर्तः शुद्धसम्यक्त्वयुक्तः पटुमतिरिति नाम्ना विश्रुतः श्रावकोभूत् ।
तनुमपि तनुतां यः सर्वपर्वोपवासैस्तनुमनुपमधीः स प्रापयन् संचिनोति
सततमपि विभूतिं भूयसीमन्नदानप्रभृतिभिरुरुपुण्यं कुंदशुभ्रं यशश्च ॥२४३॥
भक्तिं परामविरतां समपक्षपातामानन्वती मुनिनिकायचतुष्टयेऽपि ।
वैरेतिरित्यनुपमा भुवि तस्य भार्या सम्यक्त्वशुद्धिरिव मूर्तिमती पराऽभूत्॥२४४
पुत्रस्तयोरसग इत्यवदातकीर्त्योरासीन्मनीषिनिवहप्रमुखस्य शिष्यः ।
चंद्रांशुशुभ्रयशसो भुवि नागनंद्याचार्यस्य शब्दसमयार्णवपारगस्य ॥२४५॥
तस्याऽभवद्भव्यजनस्य सेव्यः सखा जिनाप्यो जिनधर्मसक्तः ।
ख्यातोऽपि शौर्यात्परलोकभीरुर्द्विजातिनाथोऽपि विपक्षपातः ॥२४६॥
व्याख्यानशीलत्वमवेक्ष्य तस्य श्रद्धां पुराणेषु च पुण्यबुद्धेः ।
औचित्यहीनोऽपि गुरौ निबंधे तस्मिन्नहासीदसगः प्रबन्धम् ॥२४७॥
चरितं विरचय्य सन्मतीयं सदलंकारविचित्रवृत्तबंधं ।
स पुराणमिदं व्यधत्त शान्तेरसगः साधुजनप्रमोद-शान्त्यै ॥२४८॥

इत्यसग-कृतौ शान्तिपुराणे भगवतो निर्वाणगमनो नाम षोडशः सर्गः ॥१६॥ [जयपुर प्रति

८१. जिनेन्द्र-कल्याणाभ्युदय (अय्यपार्य)

आदिभाग :—

लक्ष्मीं दिशतु वो यस्य ज्ञानादर्शे जगत्रयं ।
व्यदीपि स जिनः श्रीमान् नाभेयो नौरिवाम्बुधौ ॥१॥
मांगल्यमुत्तमं जीयाच्छरण्यं यद्रजोहरं ।
नि(नी)रहस्यमरिघ्नन्तत्पंचब्रह्मात्मकं महः ॥२॥
दोषसंतापशमनी वाग्ज्योत्स्ना जिनचन्द्रजा ।
वर्धयन्ती श्रुताम्भोधिं स्वान्तध्वान्तं धुनोतु नः ॥३॥
मोक्षलक्ष्म्या कृतं कंठहार-नायक-रत्नतां ।
रत्नत्रयं नुमः सम्यग्दृग्ज्ञानाचारलक्षणं ॥४॥
स्याद्वादाकाशपूर्णेन्दुर्भव्याम्भोरुहभानुमान् ।
दयागुणसुधाम्भोधिर्धर्मः पायादिहार्हतां ॥५॥
अहिंसा-सूनृत-स्तेय-ब्रह्मचर्याऽपरिग्रहं ।
सर्वपापप्रशमनं वर्धतां जिनशासनं ॥६॥
पंचकल्याणसम्पूर्णः पंचमज्ञानभासुरः ।
वः पंचगुरुवः पान्तु पंचमीगतिसाधकाः ॥७॥
वृषभादीनहं वर्धमानान्तान् जिनपुंगवान् ।
चतुर्विंशतितीर्थेशान् स्तुवे त्रैलोक्यपूजितान् ॥८॥
वन्दे वृषभसेनादीन् गणिनो गौतमान्तिमा(का)न् ।
श्रुतकेवलिनः सूरीन् मूलोत्तरगुणान्वितान् ॥९॥
अनुयोगचतुष्कादिजिनागमविशारदान् ।
जातरूपधरान्स्तोष्ये कविवृन्दारकान् गुरून् ॥१०॥

अर्हदादीनभीष्टार्थसिद्धयै शुद्धित्रयान्वितः ।
स्तुत्यानन्तगुणोपेतान् ध्यात्वा स्तुत्वा प्रणम्य च ॥११॥
श्रीमत्समंतभद्रादिगुरुपर्वक्रमागतः ।
शास्त्रावतारसम्बन्धः प्रथमं प्रतिपाद्यते ॥१२॥
पुरा वृषभसेनेन गणिना वृषभार्हतः ।
अवधार्याऽभ्यधाय्येतद्भरतेश्वरचक्रिणे ॥१३॥
ततोऽजितजिनेन्द्रादितीर्थकृद्भयोऽवधार्य गां ।
तत्तद्गणधरा लोके धार्मिकाणामिहाऽब्रुवन् ॥१४॥
ततः श्रीवर्द्धमानार्हद्गिरमाकर्ण्य गौतमः ।
राज्ञे लोकोपकारार्थं श्रेणिकायाऽब्रवीद्गणिः ॥१५॥
तस्माद्गणभृदाचार्याद्यनुक्रमसमागतः ।
नाम्ना जिनेन्द्रकल्याणाभ्युदयोऽयमिहोच्यते ॥१६॥
सेन-वीर-सुवीर्य-भद्र-समाख्यया मुनिपुंगवाः
नन्दि-चंद्र-सुकीर्ति-भूषण-संज्ञया मुनिसत्तमाः ।
सिंह-सागर-कुंभ-आस्रवनामभिर्यतिनायकाः
देव-नाग-सुदत्त-तुंग-समाह्वयैर्मुनयोऽभवन् ॥१७॥
तेभ्यो नमस्कृत्य मया मुनिभ्यः शास्त्रोदधिसूक्तिमणींश्च लब्ध्वा ।
हारं विरच्यार्यजनोपयोग्यं जिनेन्द्रकल्याणविधिर्व्यधायि ॥१८॥
वीराचार्य-सुपूज्यपाद-जिनसेनाचार्य-संभाषितो
यः पूर्वं गुणभद्रसूरि-वसुनन्दीन्द्रादिनन्द्यूर्जितः ।
यश्चाशाधर-हस्तिमल्ल-कथितो यश्चैकसंधिस्ततः ।
तेभ्यः स्वाहृतसारमध्यरचितः स्याज्जैनपूजाक्रमः ॥१९॥
तर्क-व्याकरणागमादि-लहरीपूर्ण-श्रुताम्भोनिधेः
स्याद्वादाम्बरभास्करस्य धरसेनाचार्यवर्यस्य च ।
शिष्येणाऽय्यपकोविदेन रचितः कौमारसेनेमुनेः-
ग्रंथोऽयं जयताज्जगत्त्रयगुरोर्बिम्बप्रतिष्ठाविधिः ॥२०॥

पूर्वस्माद् परमागमात्समुचितान्यादाय पद्यान्यहं
तत्र प्रस्तुतसिद्धयेऽत्र विलिखाम्येतन्न दोषाय तत् ।
कल्याणेषु विभूषणानि धनिकादानीय निष्किंचनः
शोभार्थं स्वतनुं न भूषयति किं साराजते नाऽस्य तैः ॥२१॥

जिनेन्द्र-वाणी-मुनिसंघ-भक्त्या जिनेन्द्रकल्याणनुतिं पठित्वा ।
जिनेन्द्रपूजां रचयन्ति तेऽमी जिनेन्द्रसिद्धश्रियमाश्रयन्ति ॥२२॥

इति विद्यानुवादांगविश्रुतजिनसंहिताश्रयोपासकाध्ययनेऽर्हत्प्रतिष्ठासार-संग्रहे जिनेन्द्रकल्याभ्युदये शास्त्रावतारसम्बन्धो नाम प्रथमाऽभ्युदयः ॥१॥

अन्तभाग :—

नमस्कृत्य जिनं वीरं नृसुरासुर-पूजितं ।
गुरूणामन्वयं वक्ष्ये प्रशस्तगुणशालिनाम् ॥१॥
श्रीमूलसंघव्योम्नेन्दुर्भारते भावितीर्थकृद् ।
देशे समन्तभद्रार्यो जीयात्प्राप्तपदर्द्धिकः ॥२॥
तत्त्वार्थसूत्रव्याख्यान-गंधहस्ति-विधायकः ।
स्वामी समन्तभद्रोऽभूद्देवागमनिदेश(दर्श)कः ॥३॥
अवटुतटमटति झटिति स्फुटपटुवाचाटधूर्जटेर्जिह्वा ।
वादिनि समन्तभद्रे स्थितिर्वति का कथाऽन्येषाम् ॥४॥
शिष्यौ तदीयौ शिवकोटिनामा शिवायनः शास्त्रविदां वरेण्यौ ।
कृत्स्नश्रुतं श्रीगुरुपादमूले ह्यधीतवन्तौ भवतः कृतार्थौ ॥५॥
तदन्वयेऽभूद्विदुषांवरिष्ठः स्याद्वादनिष्ठः सकलागमज्ञः ।
श्रीवीरसेनोऽजनि तार्किकश्रीर्विध्वस्तरागादिसमस्तदोषः ॥६॥
यस्य वाचा प्रसादेन ह्यमेयं भुवनत्रयं ।
आसीदष्टांगरूपेण गणितेन प्रमाणितं(नैमित्तज्ञानरूपं विदां वरं) ॥७॥
तच्छिष्यप्रवरो जातो जिनसेनमुनीश्वरः ।
यद्वाग्मयं पुरोरासीत्पुराणं प्रथमं भुवि ॥८॥

तदीयप्रियशिष्योऽभूत **गुणभद्रः** मुनीश्वरः ।
शलाकापुरुषा यस्य सूक्तिभिर्भूषिताः सदा ॥९॥
गुणभद्रगुरोस्तस्य माहात्म्यं केन वर्ण्यते ।
यस्य वाक्सुधया भूमावभिषिक्ता जिनेश्वराः ॥१०॥
तच्छिष्यानुक्रमे याते संख्येये विश्रुतो भुवि ।
गोविन्दभट्ट इत्यासीद्विद्वान्मिथ्यात्ववर्जितः ॥११॥
देवागमनसूत्रस्य श्रुत्या सद्दर्शनान्वितः ।
अनेकान्तमतं तत्त्वं बहुमेने विदांवरः ॥१२॥
नन्दनास्तस्य संजाता वर्धिताखिलकोविदः ।
दाक्षिणात्याटयन् तत्र स्वर्णयक्षीप्रसादतः ॥१३॥
श्रीकुमारकविस्सत्यवाक्यो **देवरवल्लभः** ।
उद्यद्भूषनामा च **हस्तिमल्ला**भिधानकः ॥१४॥
वर्धमानकविश्चेति षडभूवन् कवीश्वराः ।
सम्यक्त्वं स परीक्षितुं मदगजे मुक्ते सरण्यापुरे-
श्चास्याः पाण्ड्यमहीश्वरेण कपटाद्धन्तुं स्वमभ्यागते ।
शैलूषं जिनमुद्रधारिणमपास्यासौ मदध्वंसिना
श्लोकेनापि **मदेभमल्ल** इति यः प्रख्यातवान् सूरिभिः ॥१५॥

तद्यथाः—तिर्य्यक् पश्यति पृष्ठतोपसरति स्तब्धे करोति श्रुती
शिक्षां न क्षमते शिरो विधुनते घंटास्वनादिर्ष्यति ।
संदिग्धप्रतिहस्तिनं निजमदस्याघ्राय गंधं स्वयं
क्षामां हन्ति करेण याति न वशः क्रोधोद्धुरः सिन्धुरः ॥१६॥

सोऽयं समस्तजगदूर्जितचारुकीर्तिः स्याद्वादशासनरमाश्रितशुद्धकीर्तिः ।
जीयादशेषकविराजकचक्रवर्ती **श्रीहस्तिमल्ल** इति विश्रुतपुण्यमूर्तिः ॥१७॥

तस्यान्वये वरगुणो गुणवीरसूरिः ।
साक्षात्तपोबल-विनिर्जित-सम्बरारिः ॥१८॥

धर्मामृताम्बुभृत्सूक्तनरो विहारी ।
जैनो मुनिर्जयतु भव्यजनोपकारी ॥१६॥
आसीत्तत्प्रियशिष्यः कामक्रोधादिदोषरिपुविजयी ।
श्रीपुष्पसेननामा मुनीश्वरः कोविदैकगुरुः ॥२०॥
श्रीमूलसंघ-भव्याब्ज-भानुमान् विदुषां पतिः ।
पुष्पसेनार्यवर्योऽभूत्परमागमपारगः ॥२१॥

यश्चार्वाकानजैषीत् सुगत-कणभुजोर्वाक्यगंभीरभाक्षी-
दक्ष्येपीदक्षपादोदितमतमतनीतपारमर्षापकर्षं(?) ।
शोभां प्राभाकरीं तामपहृतविमतां भाट्ट-विद्यां मनीषी
देवोऽसौ पुष्पसेनो जगति विजयते वर्धिताहंन्मतश्रीः ॥२२॥
तच्छिष्योऽन्यमतान्धकारमथनः स्याद्वादतेजोनिधिः
साक्षाद्राधवपाण्डवीयकविताकान्तारमूढात्मनाम् ।
व्याख्यानांशुचयैः प्रकाशितपदन्यासो विनेयात्मनां
स्वान्ताम्भोजविकाशको विजयते श्रीपुष्पसेनार्यमान् ॥२३॥

श्रीमद्धर्मे गुणानां गणमिह दयया सम्यगारोप्य रूढो
बाह्यान्तस्सत्तपोऽश्वं व्रतनियमरथं मार्गणौघैर्गुणांकैः ।
लक्ष्मीकुर्वन् न लक्ष्यं मनसिजमजयन् मोक्षसंदानचित्त-
स्त्रैलोक्यं शासितारं जयति जिनमुनिः पुष्पसेनः सधर्मा ॥२४॥
पुष्पसेनमुनिर्भाति भीमसेनइवाऽपरः ।
बृहत्त्याग-दया-युक्तो दुःशासनमदापहः ॥२५॥
वाणस्तपो धनुर्धर्मो गुणा नामावलिर्गुणाः ।
पुष्पसेनमुनिर्धन्वी शरव्यं पुष्पकेतनः ॥२६॥
तं पुष्पसेनदेवं कलिकालगणेश्वरं सदा वन्दे।
यस्य पदपद्मसेवा विबुधानां भवति कामदुघा ॥२७॥

तदीयशिष्योऽजनि दाक्षिणात्यः श्रीमान्द्विजन्मा भिषजांवरिष्ठः ।
जिनेन्द्रपादाम्बुरुहैकभक्तः सागारधर्मः कल्याणकराख्यः ॥२८॥

तस्यैव पत्नी कुलदेवतेव पतिव्रतालंकृतपुण्यलक्ष्मीः ।
यदर्कमाम्बा जगति प्रतीता चारित्रमूर्तिर्जिनशासनोत्का ॥२९॥
तयोरासीत्सूनुस्सदमलगुणाढ्यः सविनयो
जिनेन्द्र-श्रीपादाम्बुरुह-युगलाराधनपरः ॥
अधीतिः शास्त्राणामखिलमणिमन्त्रौषधवतां ।
विपश्चिन्निर्णेता नयविनयवानाऽऽर्यं इति यः ॥३०॥
श्रीमूलसङ्घकथिताखिलसन्मुनीनां श्रीपादपद्मसरसीरुहराजहंसः ।
स्यादय्यपार्य इति काश्यपगोत्रवर्यो जैनालपाकवरवंशसमुद्रचन्द्रः ॥३१॥
प्रसन्नकविरावृतैः प्रवचनांगविद्यामृतैः परमतत्त्वधर्मामृतैः सुधाकर इवाऽपरो-
ऽखिलकराभिरामः सदा चकास्ति सुकृतोदयः कुवलयोत्सवः श्रीयुतः ॥३२॥
कवितानाम काप्यन्या सा विदग्धेषु रज्यते ।
केपि कामयमानास्तां क्लिश्यंते हन्त बालिशाः ॥३३॥
स्वस्त्यस्तु सज्जनेभ्यो येषां हृदयानि दर्पणसमानानि ।
दुर्वचन-भस्म-संगादधिकतरं यान्ति निर्मलताम् ॥३४॥
स्वस्त्यस्तु दुर्जनेभ्यो यदीयभीत्या कविव्रजाः सर्वे ।
रचयन्ति सरससूक्तिं कवित्वरचनासु ये कृतिषु ॥३५॥
असतां संगपंकेन यदंगं मलिनीकृतं ।
तदहं धौतुमिच्छामि साधुसंगतिवारिणा ॥३६॥
सुस्वरत्वं सुव्रतत्वं साहित्यं भाग्यसंभवं ।
बलात्कारेण यन्नीतं स्वाधीनं नैव जायते ॥३७॥
शब्दशास्त्रमपि काव्यलक्षणं छंदसः स्थितिमजानता धृ(कृ?)तिः ।
अय्यपार्य-विदुषा विनिर्मिता कृतवरप्रसादतः(?)॥३८॥
शाकाब्दे विधुवाधिनेत्रहिमगो(१२४१)सिद्धार्थसम्वत्सरे
माघे मासि विशुद्धपक्षदशमी-पुष्यर्क्षवारेऽहनि ।
ग्रंथो रुद्रकुमारराज्यविषये जैनेन्द्रकल्याणभाक्
संपूर्णोऽभवदेकशैलनगरे श्रीपालवन्द्य(नन्द्य वा बन्धु?)र्जितः ॥३९॥

इति सकलतार्किक-चक्रवर्ति-समन्तभद्र-मुनीश्वर-प्रमुख-कविवृन्दारक-वृन्द-मानस-सरोवर-राजहंसायमानर्हत्प्रतिमाभिषेक-विशेष-विशिष्ट-गंधोदक-पवित्रीकृतोत्तमाङ्गेन अय्यपार्येन श्रीपुष्पसेनार्योपदेशक्रमेण सम्यग्विचार्य पूर्वशास्त्रेभ्यः सारमुद्धृत्य विरचितः श्रीमज्जिनेद्रकल्याणाभ्युदयापरनामधेयोऽयं त्रिंशदभ्युदयो ग्रंथः समाप्तः ॥ (ग्रन्थ-श्लोकसंख्या ३५६०)

[श्रवणबेल्गोल-दौर्बलिशास्त्रि-प्रति

८२. धन्यकुमार-चरित्र (भ० गुणभद्र)

आदिभाग :—

स्वयंभुवं महावीरं लब्धाऽनंतचतुष्टयं ।
शतेन्द्रप्रणतं वन्दे मोक्षाय शरणं सताम् ॥१॥
प्रणमामि गुरूंश्चैव सर्वसत्वाऽभयंकरान् ।
रत्नत्रयेण संयुक्तान्संसारार्णवतारकान् ॥२॥
दिश्यात्सरस्वती बुद्धिं मम मन्दधियो दृढां ।
भक्त्यानुरंजिता जैनी मातेव पुत्रवत्सला ॥३॥
स्याद्वादवाक्यसंदर्भं प्रणम्य परमागमम् ।
श्रुतार्थभावनां वक्ष्ये कृतपुण्येन भाविताम् ॥४॥
क्षमंतु सज्जनाः सर्वे ये समंजस-बुद्धयः ।
शोधयंतु पदं दुष्टं विशुद्धं स्थापयन्तु ते ॥५॥

× × ×

अन्तभाग :—

इति धन्यकुमारचरिते तत्त्वार्थभावनाफलदर्शके आचार्यश्रीगुणभद्र-कृते भव्य-वल्लहण-नामांकिते धन्यकुमार-शालिभद्रयति-सर्वार्थसिद्धिगमनो नाम सप्तमः परिच्छेदः ॥७॥

यः संसारमसारमुन्नतमतिर्ज्ञात्वा विरक्तोऽभव-
द्धत्वा मोहमहाभटं शुभमना रागांधकारं तथा ।

आदायेति महाव्रतं भवहरं माणिक्यसेनो मुनि-
र्नैर्ग्रन्थ्यं सुखदं चकार हृदये रत्नत्रयं मण्डनं ॥१॥

शिष्योऽभूत्पदपंकजैकभ्रमरः श्रीनेमिसेनो विभु-
स्तस्य श्रीगुरुपुंगवस्य सुतपाश्चारित्रभूषान्वितः।
कामक्रोधमदान्ध-गन्धकरिणो ध्वंसे मृगाणांपतिः
सम्यग्दर्शन-बोध-साम्य-निचितो भव्यांऽबुजानां रविः ॥२॥

आचारं समितीर्दधौ दशविधं धर्मं तपः संयमम्
सिद्धान्तस्य गणाधिपस्य गुणिनः शिष्यो हि मान्योऽभवत्।
सैद्धान्तो गुणभद्रनाममुनिपो मिथ्यात्व-कामान्तकृत्
स्याद्वादामलरत्नभूषणधरो मिथ्यानयध्वंसकः ॥३॥

तस्येयं निरलंकारा ग्रन्थाकृतिरसुन्दरा।
अलंकारवता दूष्या सालंकाराकृता न हि ॥४॥

शास्त्रमिदं कृतं राज्ये राज्ञो श्रीपरमार्दिनः।
पुरे विलासपूर्वे च जिनालयैर्विराजिते ॥५॥

यः पाठयति पठत्येव पठन्तमनुमोदयेत्।
स स्वर्गं लभते भव्यः सर्वाक्षसुखदायकं ॥६॥

लम्बकंचुकगोत्रोऽभूच्छुभचन्द्रो महामनाः।
साधुः सुशीलवान् शान्तः श्रावको धर्मवत्सलः ॥७॥

तस्य पुत्रो बभूवाऽत्र बल्हणो दानवान्वशी।
परोपकारचेतस्को न्यायेनार्जित-सद्धनः ॥८॥

धर्मानुरागिणा तेन धर्मकथा-निबन्धनं।
चरितं कारितं पुण्यं शिवायेति शिवार्थिनः ॥९॥

इति धन्यकुमारचरित्रं पूर्णं जातं ॥

[देहली-पंचायती-मन्दिर प्रति

८३. सिद्धिविनिश्चय-टीका (आचार्य अनन्तवीर्य)

आदिभाग :—

अकलङ्कं जिनं भक्त्या गुरुं देवीं सरस्वतीं ।
नत्वा टीकां प्रवक्ष्यामि शुद्धां सिद्धिविनिश्चये ॥१॥
अकलंकं वचःकाले कलौ न कलयाऽपि यत् ।
नृषु लभ्यं क्वचिल्लब्ध्वा तत्रैवाऽस्तु मतिर्मम ॥२॥
देवस्याऽनन्तवीर्योऽपि पदं व्यक्तुं तु सर्वतः ।
न जानीतेऽकलंकस्य चित्रमेतत्परं भुवि ॥३॥
अकलंकवचोऽम्भोधेः सूक्तरत्नानि यद्यपि ।
गृह्यन्ते बहुभिः स्वैरं सद्रत्नाकर एव सः ॥४॥
सर्वधर्म[स्य] नैरात्म्यं कथयन्नपि सर्वथा ।
धर्मकीर्तिः पदं गच्छेदाकलंकं कथं ननु ॥५॥

शास्त्रस्यादौ तदविघ्नप्रसिद्धिप्रथनादिकं
फलमभिसमीक्ष्य सर्वज्ञमित्यादिमंगलमाह । तस्यायमर्थः ।

(इसके बाद "सर्वज्ञं सर्वतत्त्वार्थ-स्याद्वादन्यायदेशिनं । श्रीवर्द्धमानमभ्यर्च्य वक्ष्ये सिद्धिविनिश्चयम्" मूलके इस मंगलपद्यका अर्थ तथा व्याख्यान है और फिर प्रथम प्रस्तावके अन्यपद्योंकी टीका है) ।

इति श्रीरविभद्रपादोपजीव्यनन्तवीर्य-विरचितायां सिद्धिविनिश्चय-टीकायां प्रत्यक्षसिद्धिः प्रथमः प्रस्तावः ॥१॥

अन्तभाग :—

"यथेन्द्र इत्यादि निदर्शनमत्रैवेत्थं भूतस्येत्यादिना शास्त्रार्थमुपसंहरन्नाह—तदेवमित्यादि शास्त्रान्ते मंगलमाह—जीयादित्यादि ॥

इति सिद्धिविनिश्चयटीकायामनन्तवीर्यविरचितायां निक्षेपसिद्धिर्द्वादशमः प्रस्तावः समाप्तः ॥

(इसके आगे ग्रन्थदान-प्रशस्ति है । टीकाकारकी कोई प्रशस्ति नहीं) ।

[कच्छदेशस्थ कोडायग्रामकी प्रति परसे पुरातत्वमन्दिर अहदाबादमें कराई गई प्रति

८४. प्रायश्चित्तसमुच्चय-सचूलिक-वृत्ति (श्रीनन्दिगुरु)

आदिभाग :—

शुद्धात्मरूपमापन्नं प्रणिपत्य गुरोर्गुरुं ।
निबन्धनं विधास्येऽहं प्रायश्चित्तसमुच्चये ॥१॥
× × × ×
प्रणम्य परमात्मानं केवलं केवलेक्षणं ।
मयाऽभिधास्यते किंचिच्चूलिकाविनिबन्धनम् ॥२॥

अन्तभाग :—

यः श्रीगुरूपदेशेन प्रायश्चित्तस्य संग्रहः ।
दासेन श्रीगुरोर्दब्धो भव्याशय-विशुद्धये ॥१॥
तस्यैषानूदितावृत्तिः श्रीनंदिगुरुणा हि सा ।
विरुद्धं यदभूदत्र तत्क्षाम्यतु सरस्वती ॥२॥
प्रवरगुरुगिरीन्द्र-प्रोद्गता वृत्तिरेषा सकलमलकलंकक्षालनी सज्जनानां ।
सुरसरिदिव शश्वत्सेव्यमाना द्विजेन्द्रैः प्रभवतु जननूना यावदाचन्द्रतारं ॥३॥
समाप्तोऽयंग्रन्थः । (वृत्तिसंख्या प्रायः २००० श्लोकपरिमाण है)

८५. योगसंग्रहसार (श्रीनन्दिगुरु)

आदिभाग :—

भद्रं भूरिभवाम्भोधि-शोषिणे दोषमोषिणे ।
जिनेशशासनायाऽलं कुशासनविशासिने ॥१॥
संयमोद्दामभारामश्रीगुरोः पादपंकजम् ।
वंदे देवेन्द्र-वृन्दोद्यन्मौलिमालाकरार्चितम् ॥२॥
योगीन्द्रो रुन्द्रयोगाग्नि-दग्धकर्मेन्धनोऽङ्गिनाम् ।
विश्वज्ञो विश्वदृश्वाऽस्तु मंगलं मंगलार्थिनाम् ॥३॥

सद्वाग्वृत्त पदन्यास-वर्णालंकारहारिणी।
सन्मार्गाङ्गि सदैवाऽस्तु प्रसन्ना नः सरस्वती ॥४॥
यस्माद्ध्यानं बुधैरिष्टं साक्षान्मोक्षस्य साधनम्।
अतो मोक्षार्थिभव्येभ्यस्तदेवाऽस्माभिरुच्यते ॥५॥

अन्तभाग :—

विपुल-वाङ्मय-वारिधि-तत्वसन्मणि-मयूख-लवांशकलाकृतः।
स्मरणमात्रमिदं गदितं मया किमिह दृष्टमहो न महात्मभिः ॥१७६॥
नानोपदेशकोशोऽयं सरस्वत्या मदर्पितः।
भव्यैराधीयमानोऽपि सर्वदास्त्वक्षयस्थितिः ॥१७७॥
श्रीनन्दनन्दिवत्सः श्रीनन्दीगुरुपदाब्जषट्चरणः।
श्रीगुरुदासो नन्द्यान्मुग्धमतिश्रीसरस्वतीसूनुः ॥१७८॥
इति श्रीनन्दिगुरुकृतः योगसंग्रहसारः समाप्तः।

८६. भावशतक (कवि नागराज)

आदिभाग :—

शुभ्रं क्वचित्क्वचिदतीवसितेतराभं क्वापि प्रफुल्लनवपल्लवसन्निकाशं।
तप्तं क्वचित्क्वचन शीतलमस्तु वस्तु कैवल्यसंसृतिपथानुगतं मुदे वः ॥१॥
नागराजशतग्रंथं नागराजेन तन्वता।
अकारि गतवक(क्र)श्रीर्नागराजो गिरांगुरुः ॥२॥
वसंतकाले चकिता नतांगी विशाय चक्रीकृतचापदंडं।
मनोभवं सौरभशौभमानैरपूरयत् पाणियुगं प्रसूनैः ॥३॥

अन्तभाग :—

आसीत्कार्पटिगोत्रसागर-सुधाधामो मुनिः श्रीधनः
श्रीविद्याधरइत्यशेषभुवन-प्रख्यातनामामृतः।

य: केदार-पदारविंद-युगल-प्रत्यग्रपूजाविधि:
प्राप्ताशेषपवित्रभव्यविभवैः सार्थीकृतार्थी(र्थि?)श्रमः ॥६७॥
तत्पुत्रः सर्वमित्रं सुरसकविकुलश्रूयमाणानुकीर्तिः ।
प्रख्यातोद्यालपादो जगति विजयते शङ्करेशारतंसः ॥
विष्णुर्दैत्येन्द्रयुद्धवितिकरसफलवृत्तकुतरता(?) स्वभार्यां
लक्ष्मीं निक्षिप्य यस्मिन् विरहति दनशः(?)स्वेच्छया स्वस्थचित्तः॥६८॥
तस्माजातसुजातो निजगुणमणिभिः प्रीणताशेषलोकः
केकाहंकारिकारिस्मितमहिप्रसुखेष्टंकवंशावतंसः ।
भात श्रीनागराजो परनृपतिशिरो दर्शितोद्यत्प्रतापो
राजेतेयं(?)समेते विगलितकलहे वाद्युपद्मालया(?) च ॥६९॥
भारत्ययदिपूस्त्वामामरतरुजाते(?) विवादोस्ति चेत्
सांगत्वं यदिमन्मथे सकलता नित्यं शशांके यदि ।
सिंहे चेन्नरता जितारियशसो भावचचूडामणे(?)
स्तस्तस्तद्गुणतोपमानघटनागराजप्रभो(?) ॥१००॥
यस्तीक्ष्णायधीर(?) दुर्द्धरमहाकौक्षेयकाक्षेपणा(?)
क्षुभ्यत्क्षापति वल्लवोदरदरोनिशिन्नगर्भायते(?) ।
सोऽयं दुर्जयदाभुयंगनियत(?)प्रौढप्रता[पा]नल-
ज्वालाज्वालखिलीकृतानागरः(?) श्रीनागराजो जयी ॥१०१॥
इतिश्रीनागराजकृतं भावशतकं सम्पूर्णं ॥

[बम्बई ऐ०प०स० प्रति

नोट—यह प्रति बहुत ही अशुद्ध लिखी हुई है तथा त्रुटियोंसे पूर्ण है ।

८७. तत्त्वसार-टीका (भ० कमलकीर्ति)

आदिभाग :—

यद्ज्ञानं विश्व-भावार्थ-दीपकं संशयादि-हन् ।
तं वन्दे तत्त्वसारज्ञं देवं सर्वविदांवरं ॥१॥

सर्वविद्-हिमवदुक्त-सरो-द्वार-विनिर्गता ।
वाग्गंगा हि भवत्वेषा मे मनोमलहारिणी ॥२॥
गुरूणां पादपद्मं च मुक्तिलक्ष्मीनिकेतनं ।
मे हृत्सरसि सानंदं क्रीडतामन्तरायहृत् ॥३॥
पुनः श्रीगौतमादीनां स्मृत्वा चरणपंकजे ।
वक्ष्ये श्रीतत्वसारस्य वृत्तिं संक्षेपतो मुदा ॥४॥

स्वस्ति । अथ श्रीनेमीश्वरमहातीर्थादियात्राविहारकर्म्मविधाय द्व्याद्य (?) च श्रीय(प ?)थपुरमागत्य महामहोत्सवपूर्वकं धर्मोपदेशं कुर्वतः स सतो मे यथा भेदेतररत्नत्रयात्मकमोक्षमार्ग्ग-भावनां भावय तथैत्वदान्न (?) क्षमीकृतपरमार्थतरपलक्षणेन ठ० अं(सं)तोषतनयेन सतिमयेन ठ० श्रीलषूनामधेयेनेदं वचः प्रोक्तं—भो कृपावारिसागर चतुर्गतिसंसारांबुधियान भट्टारकश्रीकमलकीर्तिदेव चतुर्विधसंघकृतसेव संसारशरीरभोगनिर्म्ममो मदीयो सामोऽयं तत्त्वाऽतत्त्व-हेयोपादेय-परिज्ञानलालसः ठ० श्रीअमरसिंहो वरीवर्तितस्तत्त्वोपदेशेन बोध्यते चेत्तदा चरमिताकर्ण्याकुलीभूतमानसे[न]मुहुर्विमृश्याल्पमतिनाऽपि मया चिंतितमिति। सर्व्वविद्योक्ततत्त्वोपदेशे पुण्यं भविष्यति । पुण्येन तत्तत्त्वोसारोपदेशाख्यं शास्त्रं सम्पूर्णं भविष्यतीति मत्वा तत्त्वसारविस्तराऽवतारं भावनाग्रंथं कर्त्तुं समुद्यतोऽहमभव ॥छ॥ अथासन्नीकृतोपारसंसारतीरेण अन्तर्भावित-सकलविमलकेवलज्ञानमूर्ति-सर्व्वविन्महावीरेण समाविष्कृतसमयसार-चारित्रसार-पंचास्तिकायसार-सिद्धान्तसारादिसारेण समूरीकृतबाह्याभ्यंतरदुर्द्धरद्वादशविधतपोभारेण समभ्यसितसम्यक्त्वाद्यष्टगुणालंकृतपरमात्मस्वभावेन तिरस्कृतासंसारायाताज्ञानोद्भव-लोकमात्रसंकल्पविकल्पात्मकविभावेन भस्मीकृतद्रव्यकर्म-भावकर्म-नोकर्ममलकलंकानां सिद्धानां द्रव्यभावरूपं स्तुतिं कर्त्तुकामेण भेदोऽभेदरत्नत्रयानुभवोद्भवसम्यग्ज्ञानमहाधामेन आसंसारप्रधावित-मोहमहाराजशीघ्रगामितं मसंग्निलित(?) पदमायमानादिमिथ्यादर्शनाज्ञानाविरतिभावादिविषयकषायठकपेटकदुर्ज्जयनिर्शायसर्वविद्वीतरागोपदिष्टागमाध्यात्मसिद्धांतशास्त्राऽवतारितोपयोगेन समीप्सितसाक्षादुपे-

यसंसिद्धिशिष्टाचार-प्रपालन-नास्तिक[ता]परिहार-निर्विघ्नपरिसमत्ती(माप्ती) ति फलचतुष्टयेन स्वगततत्त्वपरगततत्त्वभेदभिन्नं तत्त्वसाराख्यं ग्रन्थमहं प्रवक्ष्यामीति कृतप्रतिज्ञेन परमाराध्यपरमपूज्यभट्टारकश्रीदेवसेनदेवेन सूत्रमिदं संवर्ण्यते ॥

इति श्रीतत्त्वसारविस्तरावतारेऽत्यासन्न-भव्यजनानंदकरे भट्टारकश्री-कमलकीर्तिदेव-विरचिते कायस्थमाथुरान्वयशिरोमणीभूतभव्यवरपुण्डरीकाऽमरसिंहमानसारविन्द-दिनकरे स्वगतपरगततत्त्वलक्षणवर्णनं नाम प्रथमं पर्वं ।

अन्तभाग :—

ग्रन्थेऽस्मिन् भावनारूपे पुनरुक्तस्य दूषणं ।
भ(भा)वविद्भिर्नतद्ग्राह्यं ज्ञानवैराग्य-भूषणं ॥१॥
इति तत्त्वं स्वपरगतं प्रोक्तं संक्षेपमात्रतोऽपि मया
सम्यग्यदि विस्तरतो ब्रूते जिनसन्मतिः सत्यं ॥२॥

इति कतिपयवर्णैर्वर्णिताऽध्यात्मसारा परमसुखसहाया तत्त्वसारस्य टी[का]।
अवगतपरमार्थाः शोध्य चैनां पठंतु सुरमृगपतिकंठे हारभूतां सुरम्यां ॥३॥

यावन्मेरु-मही-स्वर्ग-कुलाद्रि-गगणाऽपगाः ।
तत्त्वसारस्य टीकेयं तावन्नंद[तु]भूतले ॥४॥

इति तत्त्वसारविस्तारावतारेऽत्यासन्नभव्यजनानंदकरे भट्टारकश्री-कमलकीर्तिदेव-विरचिते कायस्थ-माथुरान्वय-शिरोमणीभूत-भव्यवरपुंडरीका-ऽमरसिंह-मानसारविन्द-दिनकरे सिद्धस्वरूपवर्णनं षष्ठं पर्वं ॥६॥

सिद्धाः सिद्ध(द्धि)प्रदास्ते स्युः प्रसिद्धाष्टगुणैर्युताः ।
भोऽमर्त्यसिंह भो(?)शुद्धाः प्रसिद्धा जगतां त्रयैः(ये) ॥६॥ आशीर्वादः

श्रीमन्माथुरगच्छपुष्करगणे श्रीकाष्ठसंघे मुनिः
संभूतो यतिसंघनायकमणिः श्रीक्षेमकीर्तिर्महान् ।
तत्पट्टाम्बरचंद्रमा गुणगणी श्रीहेमकीर्तिर्गुरुः
श्रीमत्संयमकीर्तिपूरितदिशापूरो गरीयानभूत् ॥१॥

अभवदमलकीर्तिस्तत्पदांभोजभानुर्मुनिगणनुतकीर्तिर्विश्वविख्यातकीर्तिः।
शम-यम-दम-मूर्तिः खंडितारातिकीर्तिर्जगति कमलकीर्तिः प्रार्थितज्ञानमूर्तिः॥२॥

[देहली-पंचायती-मंदिर प्रति

नोट—यह ग्रन्थ प्रति बहुत कुछ अशुद्ध है। और इस प्रतिके शुरू तथा अन्त आदिमें कितने ही पत्र बादको प्रतिलिपि करके जोड़े गये हैं।

८८. यशोधर-महाकाव्य-पंजिका (पं० श्रीदेव)

आदिभाग :—

यशोधर-महाकाव्ये सोमदेवैर्विनिर्मिते।
श्रीदेवेनोच्यते पंजी नत्वा देवं जिनेश्वरं॥१॥
छंद-शब्द-निघंटूवलंकृति-कला-सिद्धांत-सामुद्रक-
ज्योतिर्वैद्यक-वेद-वाद-भरताऽनंग-द्विपाऽश्वायुध-।
तर्काख्यानक-मंत्र-नीति-शुकुन-द्रुमारुह-पुराण-स्मृति-
श्रेयोऽध्यात्मजगत्स्थितिप्रवचनी-व्युत्पत्तिरत्रोच्यते॥२॥
अहं वा काव्यकर्ता वा द्वावेवेश्वराविह।
विधु-ब्रध्नातिरेकेण को नामान्यस्तमोपहः॥३॥
किंच कवेरपि विदग्धोऽहमेतत्सूक्तिसमर्थने।
यत्सौभाग्यविधौ स्त्रीणां पतिवन्न पिता प्रभुः॥४॥
प्रयोगास्तमयाच्छब्देष्वप्रसिद्धिमयं तमः।
तत्प्रयोगोदयार्को हि निरस्यत्यसमंजसं॥५॥
रुष्यत्याकर्षकायाऽन्धः स्वदोषेण यथा स्खलन्।
स्वयमशक्तस्तथा लोकः प्रयोक्तारं विनिंदति॥६॥
नाऽप्रयुक्तं प्रयुंजीतेत्येतन्मार्गानुसारिभिः।
निघंटु-शब्दशास्त्रेभ्यो नूनं दत्तो जलांजलिः॥७॥
ऊहे-पेलवयोन्याद्यान् शब्दांस्तेऽत्र प्रयुंजतां।
नाऽप्रयुक्तं प्रयुंजीतेत्येष येषां नयो हृदि॥८॥

नाऽप्रयुक्तं प्रयोक्तव्यं प्रयुक्तं वाऽप्रयुज्यते ।
इत्येकांतस्ततो नास्ति वागर्थौचित्यवेदिनां ॥९॥
साग्रा दशशतीवाचामपूर्व्वा समभूदिह ।
कवेर्वागर्थसर्वंशाद्व्यंकत्रिशती तथा ॥१०॥

सुमुखः समाहितमतिरुदङ्मुखः प्राङ्मुखो वा कविः सकलैहिकामुत्रिक-व्यवहारव्युत्पत्तिकारणं काव्यमिदं चिकीर्षुः पुण्यावाप्ति-प्रत्यूह-व्यूह-व(व्यु)दासो नास्तिकतापरिहारः शिष्टाचारप्रतिपालनं परंपरया परकृतोपकाराद्य विस्मरणं वेति पंचविधं फलं । आशीर्न्नमस्क्रियावस्तुनिर्द्देशो वा ऽपि तन्मुखमिति वा मनसि निधाय श्रियमित्यादिकान् श्लोकानाह ॥छ॥ कुवलयमुत्पलं भूमंडलं च । संदर्शनमवलोकनं सम्यग्दर्शनं च । कंतुः कामः। निकेतनं गृहं ।

इति श्रीसोम(श्री)देवसूरि-विरचितायां यशोधर-पंजिकायां प्रथम आश्वासः ॥१॥ [देहली-पंचायती-मन्दिर प्रति

नोट १—इस ग्रन्थ-प्रतिकी सब संधियोंमें श्रीदेव की जगह मूलग्रन्थकार सोमदेवका ही नाम दे दिया है, जो लिपिकारकृत-अशुद्धिका परिणाम जान पड़ता है।

नोट २—इस ग्रन्थप्रतिके अन्तमें पंजिकाके कर्ताकी कोई प्रशस्ति नहीं है। यह प्रति संवत् १५३६ फाल्गुण सुदि ८ रविवारके दिन लिखा-कर मूलसंघी मुनि रत्नकीर्तिके उपदेशसे एक खंडेलवाल कुटुम्बकी ओरसे ब्रह्म होला को दान की गई है।

८९. पुरुषार्थानुशासन (पं० गोविन्द)

आदिभाग :—

श्रियं कुर्यात्स वः कश्चिद्देवो देवेन्द्रवन्दितः ।
दृग्ज्ञानसुखवीर्याणि यस्याऽनंतान्यनन्तवत् ॥१॥
स्वभूर्विष्णुः शिवो भास्वान् शीतगुः सुगतो गुरुः ।

धर्म्मराजश्च देवेन्द्रो जिनेन्द्रः स्वस्तिदोऽस्तु नः ॥२॥
शक्तिव्यक्तिकृताऽनन्तगुणाय परमात्मने ।
भक्त्यात्मनः सतां शक्त्या गुणानां व्यक्तये नमः ॥३॥
तां नमामि गिरं ब्राह्मीं गुरूंश्च ददतेऽङ्गिनां ।
हेयादेयोपदेशेन सेविता ये हितं पदं ॥४॥

अथ मां श्रीपथान्नामपुरीन्नाकिपुरीमिव ।
स्वां श्रियं मर्त्यलोकेऽस्मिन्नाविःकर्तुमितां स्थितं ॥५॥
श्रीमतो नरसिंहस्याऽमरसिंहस्य सन्नयः ।
तनयो विनयोपेत इतिश्रीलक्ष्मणोऽभणत् ॥६॥ (द्वयं)

द्वे लोकद्वयशुद्धयर्थं यशःश्रेयश्च धीमतां ।
स्वर्जनीयं भवेतां भोः काव्येनैवाऽत्र ते भृशं ॥७॥
काव्यं विधीयतां किंचित्पुरुषार्थोपदेशितं ।
स्वार्थकृत्ये न धीमंतो भवंति यदनुद्यताः ॥८॥

श्रुत्वा तस्येति सुश्लिष्टरचनं वचनं मया ।
इति सोऽभाणि भो युक्तं त्वयोक्तं किंत्वितः शृणु ॥९॥
योगक्षेमौ सुराजाद्वा जायेते ते सुकाव्यतः ।
कुराजादिव तावेव नश्यतस्तु कुकाव्यतः ॥१०॥

काव्यं निराहुराचार्या भावं वा कर्म वा कवेः ।
तन्नष्टाऽशेषदोषं स्यात्सुकाव्यं परथा परं ॥११॥
अशक्त्वाद्वा प्रमादाद्वा शब्दादौ स्खलनं कवेः ।
दोषः स्यात्ते तु शब्दाद्याः प्रभूताः काव्यहेतवः ॥१२॥

तत्तां स्ते जानंते केचिदप्रमत्ताः सुमेधसः ।
विश्ववाङ्मयवाराशेः पारेयैरुद्यतैर्गतं ॥१३॥
तादृशां मादृशां येषां नाभूद्योगोपि तेपि चेत् ।
सुकाव्यायोद्यमं कुर्य्यु धृष्टत्वं विमतः परं ॥१४॥

किञ्च— भगवन्समन्तभद्रः श्रीमद्भट्टाकलङ्क इत्याद्याः ।
चक्रुस्तर्कग्रन्थान्कुतर्कविक्षेपदक्षांस्तान् ॥१५॥
श्रीपूज्यपादभगवत्प्रमुखाः विमुखा कुमार्गतो कुर्वन् ।
व्याकरणानि नृणां वाञ्मल[म?]व्याकरणनिपुणानि ॥१६॥
जिनसेनो गुणभद्रो रविषेणश्चैवमादिकविराजाः ।
महतां निहतांहांसि व्यधुः पुराणानि पुरुषाणां ॥१७॥
श्रीभट्ट-वट्टकेरादयो दुरंताघपाशशस्त्राणि ।
सुमधुरगिरो व्यरचयननगाराचारशास्त्राणि ॥१८॥
श्रीशिवकोटिमुनीश्वरपुरोगमाः स्ववगतागमा नृणां ।
ज्ञानतपश्चारित्रं सदर्शनं दर्शयामासुः ॥१९॥
श्रीकुन्दकुन्दसूरिः श्रीमदुमास्वातिदेव इत्याद्याः ।
साधु व्यदधुस्तत्त्वग्रन्थानुद्दिष्टपरमार्थान् ॥२०॥
श्रीसोमदेवपूर्वा अकुर्वताऽपूर्वशब्दसर्वस्वाः ।
निरवद्यगद्यपद्यश्चम्पूःकृतबुधशिरःकम्पाः ॥२१॥
श्रीवीरनन्दिदेवो धनञ्जयश्चाऽसगो हरिश्चन्द्रः ।
व्यधुरित्याद्याः कवयः काव्यानि सदुक्तियुक्तीनि ॥२२॥
श्रीजयसेनाचार्योऽमितगतियतिरेवमादयः सदयाः ।
ग्रन्थीकृत्य सदर्थानगारिणामूचुराचारान् ॥२३॥
इत्याद्यागमभेदान्विहितमनोवाग्वपुःमलच्छेदान् ।
सर्वानपि जितदुर्णयचक्राः कविचक्रिणश्चक्रुः ॥२४॥
इत्यादिपौरस्त्यमहाकवीनां रुग्भी रत्नीनामिव यत्र वाग्भिः ।
प्रकाश्यते विश्वपदार्थजातं न तत्र भात्यन्यवचः प्रदीपः ॥२५॥
अन्यच्च—भूवाच्यते कलौ जाताः प्रभूताः सांप्रतं खलाः ।
कुर्वंतोऽपकृतीरेव नृणामाराधिताश्च ये ॥२६॥
वंद्यानामपि निन्दन्ति ये गिराविमलाः खलाः ।
मादृशां किन्नते गोघ्नाः कृपां कुर्य्युरजासु किं ॥२७॥

तथा च—

द्वित्रा एवात्र ते सन्तो मणयो वा सुजातयः ।
नयंति सुषमाभास्य सुवर्णमपि ये स्वयं ॥२८॥
तावन्त एव ते मन्येऽणवः स्रष्टाः ससर्ज यैः ।
सन्तोऽसतोऽन्यथा मृज्यान्न स नास्ति विधिर्विधीः ॥२६॥

तत्किं काव्यावधानेन यशः श्रेयोऽर्थिभिर्नृभिः ।
कार्यः सदा सदाचारो लभ्येते लघु ते यतः ॥३०॥
सुमनोगतमाख्याय मयीत्युपरते सति ।
सस्मितं स ततोऽवोचल्लक्ष्मणः सुविचक्षणः ॥३१॥

नृभिर्विपश्चितां वाच्या न पुरः प्रचुरा गिरः ।
कथ्यतेऽदस्ततस्तथ्यं संक्षेपेण मया वचः ॥३२॥
भवन्मानसजं काव्यवारिजं निजकर्णयोः ।
वतंसीकर्तुमिच्छामि विधेयस्तदनुग्रहः ॥३३॥

साहाय्यं स्वांघ्रिभक्तानां शारदा वो विधास्यति ।
काव्यसिद्धौ सतां सैव मातेव हितकारिणी ॥३४॥
तस्येत्यावश्यकं वाक्यं निशम्याऽहं स्वमानसे ।
वाग्देवीं प्रणमंस्तस्याः प्रसादायेत्यचिंतयं ॥३५॥

वाढमर्हति मे भक्तिर्वाग्देवी तन्मुखोद्भवा ।
काव्यं मे कुर्वतः किन्न सा सहायी भविष्यति ॥३६॥
कुर्वे मंदोऽपि तत्काव्यमहं शोचामि किं बहुः ।
सहायं सबलं प्राप्य किं न हीनोपि वल्गति ॥३७॥

काव्यसंस्कारकर्तारः संति वा गुरवो मम ।
शाततद्धेतवः संतश्चिन्तया मम किं तया ॥३८॥
निश्चित्येति क्षणं पश्चादिति चिंतामुपागमं ।
विचित्रा रुचयः पुंसामनुशास्मि तदत्र किं ॥३९॥

इच्छंत्याक्षेपिणीं श्रोतुं केचिद्विक्षेपिणीं परे ।
संवेगिनीं कथां केचित्परे निर्वेदिनीं जनाः ॥४०॥
केचिद्धर्मार्थिनः केचिदर्थकामार्थिनोऽङ्गिनः ।
मुमुक्षवोऽन्ये तत्सर्वान्के रंजयितुमीशते ॥४१॥
प्रायः सर्व्वप्रियं यद्वा पुरुषार्थानुशासनं ।
कुर्वेऽहं तत्तथा स्वस्मिन् जिते रंजितं जगत् ॥४२॥
इति स्वगतमालोच्य शास्त्रमन्वर्थसंज्ञकं ।
मया प्रसूयते नाम्ना पुरुषार्थानुशासनम् ॥४३॥
पुरुषार्थश्चतुर्वर्गं उपदेशोऽनुशासनं ।
चतुर्वर्गश्च धर्मोऽर्थ-काम-मोक्षः प्रकीर्तितः ॥४४॥
चतुर्वर्गोपि मानुष्यैः कैश्चिदद्भुतचेष्टितैः ।
प्राप्य कालादिसामग्रीं साध्यते कृतसत्क्रियैः ॥४५॥
विना मोक्षं चतुर्वर्गस्त्रिवर्गः सद्भिरुच्यते ।
स एव साध्यते कैश्चिदलब्ध्वाऽखिललब्धिभिः ॥४६॥
जन्मसाफल्यकृत्पुंसां स्यात्त्रिवर्गोपि साधितः ।
परस्पराविरोधेन सुखश्रेयस्करो यतः ॥४७॥
विरोधयेन्न वा धर्म्मं साधयन्शुद्धधीः परौ ।
परौ तु साधयन्धर्म्मं न हि जातु विरोधयेत् ॥४८॥
नृणां विरोधितावर्थकामौ किं किल कुर्व्वतः ।
धर्मस्तु हंति तावत्रामुत्र चेषद्विराधितः ॥४९॥
धर्मादेव प्रसूयेते अर्थकामौ नृणामिह ।
सम्यक्त्वादिव सुज्ञानचरित्रे सुखसाधने ॥५०॥
एक एव क्षमो धर्म्मः सर्वकल्याण-योजने ।
एक एव न किं भानुरलं सर्वार्थदर्शने ॥५१॥
उत्कल्लोपि वारांशिर्बाहुभ्यां जातु तीर्यते ।
न सर्वं धर्ममाहात्म्यं वक्तुं केनापि पार्यते ॥५२॥

त्रिवर्गसाधने तस्माद्धर्ममुख्यतया नृभिः ।
यतितव्यं सदा जन्मसाफल्यं नेतुमात्मनः ॥५३॥
दुरापं प्राप्य मानुष्यं यैस्त्रिवर्गो न साधितः ।
केवलं नेह लोकस्तैः परलोकोऽपि बाधितः ॥५४॥
विना त्रिवर्गसंसिद्ध्या मानुषस्य पशोरपि ।
केवलं खुरशृंगादिकृतो भेदोऽभिवेदितः ॥५५॥
मानुष्येऽपि न यः स्वार्थसाधनायोद्यतोऽधमः ।
तं तिरश्चां गतिं कांचित्प्राप्तं को बोधयिष्यति ॥५६॥
स्वार्थसिद्धिर्भवेद्यत्र तिर्यक्त्वमपि तद्वरं ।
मानुष्यमपि तन्निंद्यं स्वार्थभ्रंशो भवेद्यतः ॥५७॥
यथाऽनर्थकमाप्तत्वं विनाऽनन्तचतुष्टयं ।
पुरुषार्थं विना नृणां पुरुषत्वं तथा वृथा ॥५८॥
पुमर्थसाधनोपायमवबुध्य ततः सुधीः ।
साधयेत्तं तथा नृत्वं कृतार्थं जायते यथा ॥५९॥
इति कतिचिदुदीर्याऽनिंद्यपद्यानि लोक-
द्वितयगतसुखार्थी श्रोतृशुश्रूषुतायै ।
जिनपतिमतसूत्रात् कथ्यतेऽथाप्त्युपायः
कृतसकलसमृद्धेः सच्चतुर्वर्गसिद्धेः ॥६०॥

इति पंडितश्रीगोविन्द-विरचिते पुरुषार्थानुशासने कायस्थमाथुर-वंशाऽवतंस-श्रीलक्ष्मणनामांकिते कथामुखाऽभिधानोऽयं प्रथमोऽवसरः ॥१॥ अत्राशीर्वादः —

भोगींद्रो भोगिवर्गैः कथमपि विदितः प्रस्फुरद्भोगरत्नै-
श्चन्द्रोर्केनोडुवृन्दैरपि सुरनिकरैर्दृक्सहस्रेण चेन्द्रः ।
कीर्त्या यस्य त्रिलोक्यामिव सुरसरिताश्चेतितायां स्वसंगा-
च्छ्रीमान्सोऽमर्त्यसिंहश्चिरमुरुचरितो नन्दतान्नंदनाभ्यां ॥१०॥

(इसी तरह हर एक अगले अध्यायके शुरूमें भी आशीर्वादात्मक-पद्य दिये हैं जिनमें प्रायः 'लक्ष्मण'को आशीर्वाद देते हुए उसके गुणोंका भी कुछ वर्णन किया है।)

अन्तभागः—

श्रीसद्महासः कुमुदाऽखिलाशस्तमोविनाशः सुपथप्रकाशः ।
यत्रोदितेऽत्र प्रभवन्ति लोके नमाम्यहं श्रीजिनभास्करं ते ॥१॥
दोषाऽप्रकाशः कमलाऽवकाशस्तापस्य नाशः प्रसरश्च भासः ।
यत्र प्रसन्नेऽत्र जने भवति श्रीमज्जिनेन्द्रं तमहं नमामि ॥२॥
कुर्वंतु धीकैरविणीसमृद्धिं विवेकवार्द्धेश्च जनेऽत्र वृद्धिं ।
श्रीमूलसंघाकर-चन्द्रपादा भट्टारकश्रीजिनचन्द्रपादाः ॥३॥

विमलसदमलकाष्ठासंघपट्टोदयाऽद्रावुदितउरुवचोंशुध्वस्तदोषांधकारः ।
बुधजनजलजानामुल्लासं ददानो जयति मलयकीर्तिर्भानुसाम्यं दधानः॥४॥

काष्ठासंघेऽनघयतिभिर्यः कान्तो भात्याकाशे स्फुरदुडुभिर्वा चन्द्रः ।
सत्प्रज्ञानां भवति न केषां तुल्यः कांत्याऽऽचारः स कमलकीर्त्याचार्यः ॥५॥

परे च परमाचारा जिनसंघमुनीश्वराः ।
प्रसन्नमेतत्कुर्वंतु मयि सर्वेपि मानसं ॥६॥

कायस्थानामस्त्यथो माथुराणां वंशो लब्ध्वाऽमर्त्यसंमतप्रशंसः ।
तत्राप श्रीखेतलो बन्धुलोकैः खे तारौघैरुत्प्रकाशं शशीव ॥७॥

सुरगिरिरिव धीरो वारिधिर्वा गभीरो विधुरिव हततापः सूर्यवत्सुप्रतापः ।
नरपतिरिव मान्यः कर्णवद्यो वदान्यः समजनि रतिपालस्तत्सुतः साऽरिकालः॥८॥

दुःशासनाऽपायपरो नराग्रणीः सदोद्यतो धर्मसुतार्थसाधने ।
ततः सुतोऽभूत्स गदाधरोपि यो न भीमतां क्वापि दधौ सुदर्शनः ॥९॥

स तस्मात्सत्पुत्रो जनितजनितासंयदजनि
द्विलौ ख्यातः श्रीमानमरहरिरित्यस्तकुनयः ।

गुणा यस्मिंस्ते श्री-नय-विनय-तेजःप्रभृतयः
समस्ता ये व्यस्ता अपि न सुलभाः क्वाऽपि परतः ॥१०॥
महम्मदेशेन महामहीभुजा निजाधिकारिष्वखिलेष्वपीह यः।
सम्मान्य नीतोपि सुधीः प्रधानतां न गर्वमप्यल्पमधत्त सत्तमः ॥११॥
सर्वैरहंपूर्विकया गुणैर्वृतं निरीक्ष्य दोषा निखिला यमत्यजन्।
स्थाने हि तद्भूरिभिराश्रितेऽरिभिः स्थाने वसंतीह जना न केचन ॥१२॥
श्रुतशताये विनयेन धीमता तया नयस्तेन च येन संपदा।
तया च धर्मो गुणवन्नियुक्तया सुखंकरं तेन समस्तमीहितं ॥१३॥
सत्योक्तित्वमजातशत्रुरखिलक्ष्मोद्धारसारं नयं
रामः काममुदाररूपममलं शीलं च गंगांगजः।
कर्णश्चारुवदान्यतां चतुरतां भोजश्च यस्मायिति
स्वं स्वं पूर्वनृपा वितीर्य्य सुगुणं लोकेऽत्र जग्मुः परं ॥१४॥
धनं धनार्थिनो यस्मान्मानं मानार्थिनो जनाः।
प्राप्यासन् सुखिनः सर्वे तद्द्वयं तद्द्वयार्थिनः ॥१५॥
निशीनोः कौमुदस्येष्टो नाब्जानामन्यथा रवेः।
यस्योदयस्तु सर्वेषां सर्वदैवेह वल्लभः ॥१६॥
स्त्रीकुलीनाऽकुलीना श्रीः स्थिरा धीः कीर्तिरस्थिरा।
यत्र चित्रं विरोधिन्योऽप्यऽमूर्तेनुः सहस्थितिं ॥१७॥
तस्यानेकगुणस्य शस्यधिष्ण्यस्याऽमर्त्यसिंहस्य स।
ख्यातः सूनुरभूत्प्रतापवसतिः श्रीलक्ष्मणाख्यः क्षितौ।
यो वीक्ष्येति वितर्क्यते सुकविभिर्नीत्वा तनुं मानवीं
धर्मोऽयं नु नयोऽथवाऽथ विनयः प्राप्तः प्रजापुण्यतः ॥१८॥
यशो यैल्लक्ष्मणस्यैणलक्ष्मणाऽत्रोपमीयते।
शंके न तत्र तैः साक्षाद्विलाक्षैलक्ष्मलक्षितं ॥१९॥
श्रीमान्सुमित्रोन्नतिहेतुजन्मा सल्लक्षणः सन्नपि लक्ष्मणाख्यः।
रामातिरिक्तो न कदाचनासीदधाच्च यो रावणसोदरत्वं ॥२०॥

स नयविनयोपेतैर्वाक्यैर्मुहुः कविमानसं
सुकृतसुकृताऽपेक्षो दक्षो विधाय समुद्यतं ।
श्रवणयुगलस्यात्मीयस्यावतंसकृते कृती-
स्तु विशदमिदं शास्त्रांभोजं सुबुद्धिरकारयत् ॥२१॥

अथास्त्यग्रोतकानां सा पृथ्वी पृथ्वीव संततिः ।
सच्छायाः सफलाः यस्यां जायंते नरभूरुहाः ॥२२॥

गोत्रं गार्ग्यमलंचकार यं इह श्रीचन्द्रमाश्चन्द्रमो
बिम्बास्यस्तनयोऽस्य धीर इति तत्पुत्रश्च हींगाऽभिधः ।
दोहे लब्धनिजोद्भवेन सुधियः पद्मश्रियस्तत्स्त्रियो
नव्यं काव्यमिदं व्यधायि कविनाऽर्हत्पादपद्मालिना ॥२३॥

पादादिवर्णसंज्ञेनेति शेषः ॥

शब्दार्थोभयदुष्टं यद्व्यधाय्यत्र मया पदं ।
सद्भिस्ततस्तदुत्सार्य्य निधेयं तत्र सुन्दरं ॥२४॥

जीयाच्छ्रीजिनशासनं सुमतयः स्युः क्ष्माभुजोर्हन्नता-
स्सर्वोप्यस्तु निरामयः सुखमयो लोकः सुभिक्ष्यादिभिः ।
संतः सन्तु चिरायुषोऽमलधियो विज्ञातकाव्यश्रमाः
शास्त्रं चेदममी पठन्तु सततं यावत्त्रिलोकीस्थितिः ॥२५॥

यदेतच्छास्त्रनिर्माणे मयात्यल्पधिया कृतं ।
क्षंतव्यमपरागैर्मे तदागः सर्वसाधुभिः ॥२६॥

इति प्रशस्तिः ॥ समाप्तं चेदं पुरुषार्थानुशासननाम शास्त्रमिति ॥

[बम्बई ऐ० प० स० भ० प्रति

नोट—यह ग्रन्थप्रति अच्छी साफ और शुद्ध लिखी हुई है और किसी किसी स्थानपर टिप्पणको भी लिये हुए है ।

६०. नागकुमार-चरित (मल्लिषेण सूरि)

आदिभाग :—

श्रीनेमिं जिनमानम्य सर्वसत्वहितप्रदम् ।
वक्ष्ये **नागकुमारस्य** चरितं दुरितापहं ॥१॥
कविभिर्जयदेवाद्यैर्गद्यैर्पद्यैर्विनिर्मितम् ।
यत्तदेवास्ति चेदत्र विषमं मन्दमेधसाम् ॥२॥
प्रसिद्धैः संस्कृतैर्वाक्यैर्विद्वज्जन-मनोहरम् ।
तन्मया पद्यबन्धेन **मल्लिषेणेन** रच्यते ॥३॥

अन्तभाग :—

श्रुत्वा **नागकुमार**-चारुचरितं **श्रीगौतमेनोदितं** ।
भव्यानां सुखदायकं भवहरं पुण्यास्रवोत्पादकं ।
नत्वा तं **मगधाधिपो** गणधरं भक्त्या पुरं प्रागम्-
च्छ्रीमद्राजगृहं पुरंदरपुराकारं विभूत्या समं ॥६१॥

इत्युभयभाषाकविचक्रवर्ति-श्रीमल्लिषेणसूरि-विरचितायां श्रीनागकुमार-पंचमीकथायां नागकुमार-मुनीश्वर-निर्वाणगमनो नाम पंचमः सर्गः ।

* जितकषायरिपुर्गुणवारिधिर्नियतचारुचरित्रतपोनिधिः ।
जयतु भूपतिरीटविघट्टितक्रमयुगोऽ**जितसेन**मुनीश्वरः ॥१॥
अजनि तस्य मुनेर्वरदीक्षितो विगतमानमदो दुरितांतकः ।
कनकसेनमुनिर्मुनिपुंगवो वरचरित्रमहाव्रतपालकः ॥२॥
गतमदोऽजनि तस्य महामुनेः प्रथितवान् **जिनसेनमुनीश्वरः** ।
सकलशिष्यवरो हतमन्मथो भवमहोदधितारतरं[ड]कः ॥३॥
तस्याऽनुजश्चारुचरित्रवृत्तिः प्रख्यातकीर्तिर्भुवि पुण्यमूर्तिः ।
नरेन्द्रसेनो जितवादिसेनो विज्ञाततत्त्वो जितकामसूत्रः ॥४॥
तच्छिष्यो विबुधाग्रणीर्गुणनिधिः **श्रीमल्लिषेणाह्वयः**
संजातः सकलागमेषु निपुणो वाग्देवतालंकृतः ।

तेनैषा कविचक्रिणा विरचिता श्रीपंचमीसत्कथा
भव्यानां दुरितौघनाशनकरी संसारविच्छेदिनी ॥५॥
स्पष्ट श्रीकविचक्रवर्त्तिगणिना भव्याब्जघर्मांशुना
ग्रंथी पंचशती मया विरचिता विद्वज्जनानां प्रिया।
तां भक्त्या विलिखंति चारुवचनैर्व्याचर्णयंत्यादरा
ये शृण्वंति मुदा सदा सहृदयास्ते यांति मुक्तिश्रियं ॥६॥*
इति नागकुमारचरित्रं समाप्तम्।

६१. ज्वालिनीकल्प (इन्द्रनन्दियोगीन्द्र)

आदिभाग :—

चन्द्रप्रभजिननाथं चन्द्रप्रभमिन्द्रनंदिमहिमानम्।
ज्वालामालिन्यर्चित-चरणसरोजद्वयं वंदे ॥१॥
कुमुदद्लधवलगात्रा महिषमहावाहनोज्वलाभरणा।
मां पातु वन्हिदेवी ज्वालामालाकरालांगी ॥२॥
जयताद्देवी ज्वालामालिन्युद्यत्त्रिशूल-पाश-झष-
कोदण्ड-काण्ड-फल-वरद-चक्रचिन्होज्वलाऽष्टभुजा ॥३॥
अर्हत्सिद्धाचार्योपाध्यायान् सकलसाधुमुनिमुख्यान्।
प्रणिपत्य मुहुर्मुहुरपि वक्ष्येऽहं ज्वालिनीकल्पं ॥४॥
दक्षिणदेशे मलये हेमग्रामे मुनिर्महात्मासीत्।
हेलाचार्यो नाम्ना द्रविडगणाधीश्वरो धीमान् ॥५॥
तच्छिष्या कमलश्रीः श्रुतदेवी वा समस्तशास्त्रज्ञा।
सा ब्रह्मराक्षसेन गृहिता रौद्रेण कर्मवशात् ॥६॥

— इन चिन्होंके अन्तर्गत यह षट्पद्यात्मक अन्तका भाग 'आरा-जैनसिद्धान्तभवन'की ताडपत्रीय दो प्रतियों परसे लिया गया है, अन्य कितनी ही प्रतियोंमें यह नहीं पाया जाता—छूटा हुआ है।

रोदिति हाहाकारैः स्फुटाऽट्टहासं करोति सन्ध्यायां ।
जपति पठत्यथ वेदान् हसति पुनः कहकह-ध्वनिना ॥७॥
कोसावास्ते मंत्री यो मोचयति स्वमंत्रशक्त्या मां ।
वक्तीति सावलेपं सविकारं जृम्भणं कुरुते ॥८॥
दृष्ट्वा तामतिदुष्टग्रहेण परिपीडितां मुनीन्द्रोऽसौ ।
व्याकुलितोऽभूत्तत्प्रतिविधानकर्तव्यतामूढः ॥९॥
तद्ग्रहविमोक्षणार्थं तद्ग्रामसमीपनीलगिरिशिखरे ।
विधिनैव वन्हिदेवीं स साधयामास मुनिमुख्यः ॥१०॥
दिनसप्तकेन देव्या प्रत्यक्षीभूतया पुरः स्थितया ।
मुनिरुक्तः किं कार्यं तवार्यं वद मुनिरुवाचेत्थम् ॥११॥
कामार्थाद्यैहिक-फलसिद्ध्यर्थं देवि नोपरुद्धासि ।
किन्तु मया कमलश्री-ग्रह-मोक्षायोपरुद्धासि ॥१२॥
तस्माद् ग्रहमोक्षं कुरु देव्येतावदेव मम कार्यं ।
तद्वचनं श्रुत्वा सा बभाण तदिदं कियन्मात्रम् ॥१३॥
मा मनसि कृथाः खेदं मंत्रेणानेन मोचयेत्युक्त्वा ।
मृदुतरमायसपत्रं विलिखितमंत्रं ददौ तस्मै ॥१४॥
तन्मंत्रविधिमजानन् पुनरपि मुनिपो बभाण तां देवीं ।
नास्मिन् वेद्मि किमप्यहमतो विवृत्यै तदभिधेहि ॥१५॥
तस्मै तया ततस्तद्व्याख्यातं सोपदेशमयतत्त्वं ।
पुनरपि तद्भक्ति-वशाददायि तत्सिद्धविद्येत्थम् ॥१६॥
साधनविधिना यस्मै त्वं दास्यसि होमजपविहीनोऽपि ।
भविता स सिद्धविद्यो नो दास्यसि यस्य सोऽत्र पुनः ॥१७॥
उद्यानवने रम्ये जिनभवने निम्नगातटे पुलिने ।
गिरिशिखरेऽन्यस्मिन् वा स्थित्वा निर्जन्तुके देशे ॥१८॥
हृदयोपहृदयमंत्रं प्रजाप्य नियुतं तथा युतं हुत्वा ।
प्रकरोतु पूर्वसेवां प्रणिगद्यैवं स्वधाम गता ॥१९॥

तत्र स्थित एव ततस्तमसौ दंदह्यमानमाध्याय ।
दहनाद्वहैरुदन्तं दुष्टं निर्द्धाटयामास ॥२०॥
निर्द्धाटितो ग्रहश्चेद् ध्यात्वैकं भूतदहनररररबीजं ।
शेषदशनिग्रहाणां किमस्त्यसाध्यो ग्रहः कोऽपि ॥२१॥
देव्यादेशाच्छास्त्रं तेन पुनर्ज्वालिनीमतं रचितम् ।
तच्छिष्यो गांगमुनिर्नीलग्रीवो बीजावाख्यः ॥२२॥
आर्या क्षांतिरसब्बा विरुवट्टः क्षुल्लकस्तथेत्यनया ।
गुरुपरिपाट्याविच्छिन्नसम्प्रदायेन चागच्छत् ॥२३॥
कन्दर्पेण ज्ञातं तेनापि स्वसुतनिर्विशेषाय ।
गुणनंदिश्रीमुनये व्याख्यातं सोपदेशं तत् ॥२४॥
पार्श्वे तयोर्द्वयोरपि तच्छास्त्रं ग्रंथतोऽर्थतश्चापि ।
मुनिनेन्द्रनन्दिनाम्ना सम्यगधीतं विशेषेण ॥२५॥
क्लिष्टग्रंथं प्राक्तनशास्त्रं तदिति स(स्व)चेतसि निधाय ।
तेनेन्द्रनन्दिमुनिना ललितार्यावृत्तगीताद्यैः ॥२६॥
हेलाचार्योक्तार्थं ग्रंथपरावर्तनेन रचितमिदं ।
सकलजगदेकविस्मयजननं जनहितंकरं शृणुत ॥२७॥
मंत्रि-ग्रह-सन्मुद्रा-मण्डल-कटुतैल-वश्ययंत्र-सुतंत्रं ।
स्नपनविधिर्नीराजनविधिरथ साधनविधिश्चेति ॥२८॥
अधिकाराणामेषां दशभेदानां स्वरूपनिर्देशं ।
वक्ष्येऽहं संक्षेपात् प्रकटं देव्या यथोद्दिष्टम् ॥२९॥
मौनी नियमितचित्तो मेधावी बीजधारणसमर्थः ।
मायामदनमदोनः सिद्ध्यति मंत्री न संदेहः ॥३०॥
सम्यग्दर्शनशुद्धो देव्यर्चनतत्परो व्रतसमेतः ।
मंत्रजपहोमनिरतोऽनालस्यो जायते मंत्री ॥३१॥
देवगुरुसमयभक्तः सविकल्पः सत्यवाग्विदग्धश्च ।
वाक्पटुरपगतशंकः शुचिरार्द्रमना भवेन्मंत्री ॥३२॥

देव्याः पदयुगभक्तो हेलाचार्यक्रमाब्जभक्तियुतः ।
स्वगुरूपदेशमार्गेण वर्तते यः स मंत्री स्यात ॥३३॥
विद्यागुरुभक्तियुते तुष्टिं पुष्टिं ददाति खलु देवी ।
विद्यागुरुभक्तिवियुक्तचेतसे द्वेष्टि नितरां सा ॥३४॥
सम्यग्दर्शनदूरो वाक्कठशश्छान्दसो भयसमेतः ।
शून्यहृदयः सलज्जः शास्त्रेऽस्मिन नो भवेन्मंत्री ॥३५॥

इति हेलाचार्यप्रणीतार्थे श्रीमदिन्द्रनन्दियोगीन्द्र-विरचित-ग्रंथसंदर्भे ज्वालिनीमते मंत्रिलक्षणनिरूपणाधिकारः प्रथमः ॥

अन्तभाग :—

द्रविडगणसमयमुख्यो जिनपतिमार्गोचितक्रियापूर्णः ।
व्रतसमितिगुप्तिगुप्तो हेलाचार्यो मुनिर्जयति ॥१६॥
यावत् क्षितिजलधिशशांकाम्बरतारकाकुलाचलास्तावत् ।
हेलाचार्योक्तार्थः स्थेयाच्छ्रीज्वालिनीकल्पः ॥२०॥

इति हेलाचार्यप्रणीतार्थे श्रीमदिन्द्रनन्दियोगीन्द्रविरचितग्रंथसन्दर्भे ज्वालिनीमते साधनविधिर्दशमः परिच्छेदः ॥

आसीदिन्द्रादिदेवस्तुतपदकमलश्रीन्द्रनंदिर्मुनीन्द्रो
नित्योत्सर्पच्चरित्रो जिनमतजलधिर्धौतपापोपलेपः ।
प्रज्ञानावामलोद्यत्प्रगुणगणभृतोत्कीर्णविस्तीर्णसिद्धा-
न्ताम्भोराशिस्त्रिलोक्यांबुजवनविचरत्सद्यशोराजहंसः ॥१॥
यद्वृत्तं दुरितारिसैन्यहनने चण्डासिधारायितम्
चित्तं यस्य शरत्सरसलिलवत् स्वच्छं सदा शीतलं ।
कीर्तिः शारदकौमुदी शशिभृतो ज्योत्स्नेव यस्याऽमला
स श्रीवासवनंदिसन्मुनिपतिः शिष्यस्तदीयो भवेत् ॥२॥
शिष्यस्तस्य महात्मा चतुरनियोगेषु चतुरमतिविभवः ।
श्रीवप्पनंदिगुरुरिति बुधमधुपनिषेवितपदाब्जः ॥३॥

लोके यस्य प्रसादादजनि मुनिजनस्तत्पुराणार्थवेदी
यस्याशास्तंभमूर्धान्यतिविमलयशः श्रीवितानो निबद्धः ।
कालास्तायेन पौराणिककविवृषभा द्योतितास्तत्पुराण-
व्याख्यानाद्बप्पनंदिप्रथितगुणगणस्तस्य किं वर्ण्यतेऽत्र ॥४॥
शिष्यस्तस्येन्द्रनंदिर्विमलगुणगणोद्दामधामाभिरामः
प्रज्ञा-तीक्ष्णास्त्रधारा-विदलितबहलाऽज्ञानवल्लीवितानः ।
जैने सिद्धान्तवार्धौ विमलितहृदयस्तेन सद्ग्रंथतोयं(ग्रंथतोऽयं)
हेलाचार्योदितार्थो व्यरचि निरूपमो ज्वालिनीमंत्रवादः ॥५॥
अष्टशतस्यैकषष्ठि(८६१)प्रमाणशकवत्सरेष्वतीतेषु ।
श्रीमान्यखेटकटके पर्वण्यक्ष[य]तृतीयायाम ॥६॥
शतदलसहितचतुःशतपरिमाणग्रंथरचनया युक्तं ।
श्रीकृष्णराजराज्ये समाप्तमेतन्मतं देव्याः ॥७॥

(नोट—अन्तका पद्य बम्बई सरस्वतीभवनकी प्रतिमें न होकर कारंजा-की प्रतिमें पाया जाता है ।)

६२. स्वर्णाचलमाहात्म्य (दीक्षित देवदत्त)

आदिभाग :—

श्रीमोक्षसिद्धि-समवाप्ति-निदानमेकं शैलान्वयाम्बुजवन-प्रतिबोध-भानुं ।
ध्यानात्समस्तकलुषांबुधिकुंभजातं वंदे सुवर्णमयमुच्चसुवर्णशैलं ॥१॥

अन्तभाग :—

श्रीमच्छ्रीमूलसंघेऽस्मिन् बलात्कारगणे तथा ।
कुन्दकुन्दाभिधाचार्यान्वये विश्वप्रदीपिते ॥४३॥
नन्द्याम्नाये बभूव श्रीभट्टारकपदस्थितः ।
जगद्भूषणदेवोऽभूज्जगद्भूषणमर्थतः ॥४४॥
यस्य वागमला नूनं धर्मशास्त्र-प्रकाशिका ।
गंगेव पठतां नूनं पुनाति मुखपंकजं ॥४५॥

भट्टारकोऽभूत्तत्पट्टे विश्वभूषणनामभृत् ।
सोऽपि विद्यावतां श्रेष्ठो विद्यावद्भिर्निषेवितः ॥४६॥
तत्पट्टदीपकः श्रीमानभूद्देवेन्द्रभूषणः ।
सोऽपि भट्टारको ज्ञेयो भट्टारकगुणैर्युतः ॥४७॥
सुरेन्द्रभूषणस्तद्वत्तत्पट्टे समशोभयत् ।
भट्टारकपदस्थायी सदा धर्मोपदेशकृत् ॥४८॥
एषां(षु) भट्टारको योऽभूद्विश्वभूषणसंज्ञकः ।
तच्छिष्यो ब्रह्मपदवी-स्थितो विनयसागरः ॥४९॥
तद्वदेव समाख्यातस्तच्छिष्यो हर्षसागरः ।
एतस्यैव गुरूभूतः पंडितो हरिकृष्णकः ॥५०॥
जीवनादिपदस्तस्य शिष्यो राम इति श्रुतः ।
तच्छिष्यः पंडितो हेमराजोऽभूद्बुद्धिमान् किल ॥५१॥
एषां मध्ये सूरिपुरे विश्वविख्यातसद्गुणे ।
पुण्यक्षेत्रे दर्शनाच्च वंदनाद्वा सतोऽथवा ॥५२॥
पूर्वोपार्जित-पापौघ-महासंहारकारिणी ।
श्रीनेमिनाथ-जनुषो भूमिभूते शुभावहे ॥५३॥
प्रतीचीमुखकालिंदी-प्रवाहपरिशोभिते ।
द्विजादिवर्ण-वसति-प्रदीप्ते क्षेत्रभूमिपे ॥५४॥
श्रीब्रह्महर्षसिंघोश्च तनूजो धर्मवित्तमः ।
जिनेन्द्रभूषणः श्रीमद्भट्टारकपदे स्थितः ॥५५॥
ज्ञानवान् गुणवांस्तद्वद्दयावानतिपुण्यवान् ।
विराजते सदाभव्यजनैः संपरिवारितः ॥५६॥
कालिंदीकूलबहुधावित्तव्ययबलात्किल ।
निर्माप्य चैत्यभवनं स्थितः सद्धर्मसंमुखः ॥५७॥
तदाशया इटेरस्थ-देवदत्त-कवीशिना ।
कान्यकुब्जकुलोद्भूत-दीक्षितेन सुबुद्धिना ॥५८॥

दयापरेण हिंसादिरहितेन हृदापि वै ।
जैनशासन-प्रामाण्य-करणोन्मुख-भाविना ॥५६॥
श्रीस्वर्णाचल-माहात्म्यं यथावद्रचितं मया ।
पठनीयं भव्यजीवैः श्रोतव्यं भक्तिभावतः ॥६०॥
सद्बुद्धिर्नवसत्पुराणकृतये काव्यंकरेषु स्थितः ।
श्रीमान्सैष जिनेन्द्रभूषणयतिर्भूमौ चिरं जीवतात् ॥६४॥
श्रीमज्जिनेन्द्रदेवोऽत्र जिनेन्द्रपरिवारितः ।
जिनेन्द्रभूषण-मनोवांछितं कुरुताद्ध्रुवं ॥६५॥

इत्याचारांगे(?) श्रीभगवत्कुन्दकुन्दाचार्यानुक्रमेण श्रीभट्टारकविश्वभूषण-पट्टाभरण-श्रीब्रह्महर्षसागरात्मज-श्रीभट्टारकजिनेन्द्रभूषणोपदेशात् श्रीमद्दीक्षि-देवदत्तकृते श्रीस्वर्णाचलमाहात्म्ये माहात्म्यफलसूचनो नाम षोडशो ऽध्यायः ॥१६॥ इति स्वर्णाचलमाहात्म्यं सम्पूर्णं ।

[देहली-पंचायती-मन्दिर प्रति

६३. धर्मचक्रपूजा (बुध वीर)

आदिभाग :—

प्रणिपत्य वर्द्धमानं विदिताखिलतत्त्व-संततेर्मानं ।
श्रीधर्मचक्रनाम्नः पूजायाः पीठिकां वक्ष्ये ॥१॥

अन्तभाग :—

चन्द्रबाणाष्टषष्ठांकैः(१५८६ ?) वर्तमानेषु सर्वतः ।
श्रीविक्रमनृपान्नूनं नयविक्रमशालिनः ॥८॥
पौषमासे सिते पक्षे षष्ठींदु-दिननामकैः(के) ।
रुहितासपुरे रम्ये पार्श्वनाथस्य मन्दिरे ॥६॥
तत्रासीद्विदुषां मान्यो पद्मावतिपुराह्वयः ।
सूरिः श्रीजिनदासाख्यः काष्टसंघाब्धिचन्द्रमाः ॥१०॥
तस्योपदेशतो श्रीमानग्रोतकसुवंशजः ।

तोतू-साधु-सुतः शान्तः वीरुनामा बुधः स्मृतः ॥११॥
श्रीधर्मचक्रयंत्रस्य पूजां पद्यैर्विरीययन् (व्यरीरचत)।
बृह[त]श्रीसिद्धचक्रस्य तथा नंदीश्वरस्य वैः ॥१२॥
ऋषिमंडलयंत्रस्य पूजापाठं च कारवैः(कः)।
श्रीचिन्तामणिपाश्र्वार्यश्लोकैर्बंधं व्यधादलं ॥१३॥
अग्रवालान्वयः श्रीमान लसद्गोयलगोत्रकः।
साधारण-सुतः साधुरणमल्लोऽभिनन्दनः ॥१४॥
तदंगजः समुत्पन्नो जिनशासनवत्सलः।
चिरंजीव्यालोकेस्मिन् मल्लिदासाऽभिधानतः ॥१५॥
धर्मचक्रस्य सत्पूजा बुधवीरेण निर्म्मिता।
नात्रा(म्ना ?) श्रीरणमल्लस्य संयता नंतदा(दता)द्भुवि ॥१६॥
श्रीहेमचन्द्रशिष्येण यत्कृतं वीरकेन वैः।
पूजाचतुष्कमालोक्य विस्तार्यं तद्विचक्षणैः ॥१७॥
यावन्मेरुगिरिः शश्वद् यावच्चन्द्रार्कतारकाः।
तावत् श्रीधर्मचक्रस्य सपर्याऽत्र प्रवर्ततें(तु ?) ॥१८॥

भव्यः शुद्धमतिः सदैव निरतः सद्दानपुण्यार्घनैः(सद्ध्यानपुण्यार्जने ?)
मात्ताद्धर्मकथा-विचारचतुरस्तत्वार्थवेदी गुणी।
श्रीसाधारणसाधुवंशतिलकः सम्यकत्वरत्नांकितः
श्रीमान् श्रीरणमल्लसाधुरखिलं सौख्यं समालिंगतु ॥१९॥
सार्द्धं अष्टशती (८५०) संख्या प्रथाग्रस्य बभूव च।
शुद्धश्लोकप्रमाणेन गणिता गणकोत्तमैः ॥२०॥

इति श्रीधर्मचक्रपूजा [बुध वीर] विरचिता साधुसाधारणांगज-साधुरण-मल्लनामांकिता समाप्ता।

[देहली-पंचायती मन्दिर प्रति

नोट—यह ग्रन्थ प्रति बेहद अशुद्ध है और रघुनाथ शर्मा नामके किसी अनाड़ी लेखककी संवत् १६०० की लिखी हुई है।

६४. शब्दाम्भोजभास्कर=जैनेंद्र-महान्यास (प्रभाचन्द्राचार्य)

आदिभाग :—

श्रीपूज्यपादमकलंकमनंतबोधं
शब्दार्थसंशयहरं निखिलेषु बोधं ।
सच्छब्दलक्षणमशेषमतः प्रसिद्धं
वक्ष्ये परिस्फुटमलं प्रनि(णि ?)पत्य सिद्धं ॥१॥

सविस्तरं यद्गुरुभिः प्रकाशितं महामतीनामभिधानलक्षणं ।
मनोहरैः स्वल्पपदैः प्रकाश्यते महद्भिरुपदिष्ट······ ॥२॥

याति सर्वापि मार्गे··· ··········
नदुक्त-कृतशिक्षश्लाघ्यमेतद्धितस्य ।
विमुक्तमखिलज्ञैर्भाषमाणो गणेन्द्रैः
विविक्तमाखिलार्थे श्लाघ्येतेऽतो मुनींद्रैः ॥३॥

शब्दानामनुशासनानि निखिलान्याध्यायताहर्निशं
यो यः सारतरो विचारचतुरस्तल्लक्षणांशो गतः ।
तं स्वीकृत्य तिलोत्तमेव विदुषां चेतश्चमत्कारक-
सुव्यक्तैरसमैः प्रसन्नवचनैर्न्यासः समारभ्यते ॥४॥

श्रीपूज्यपादस्वामिविनेयानां शब्दसाधुत्वाऽसाधुत्वविवेक-प्रतिपत्त्यर्थं शब्दलक्षण-प्रणयनं कुर्वाणो निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकफलमभिलषन्निष्टदेवतास्तुतिविषयं नमस्कुर्वन्नाह ॥छ॥ लक्ष्मीरात्यंतकी यस्य इत्यादि ।

अन्तभाग :—

त्रिमयं । चतुर्मयं निमेयसंबंधे आभिहित्यनिमानसंबंधे ता इति ॥छ॥

इति श्रीप्रभाचन्द्रविरचिते शब्दांभोजभास्करे जैनेंद्र-महान्यासे तृतीयाऽध्यायस्य चतुर्थः पादः समाप्तः ॥

सन्मार्ग-प्रतिबोधको बुधजनैः संस्तूयमानो हठा-
दज्ञानांधतमोपहः क्षितितले श्रीपूज्यपादो महान् ।

सार्वः संतत-सन्निसंधिनियतः पूर्वापरानुक्रमः
शब्दांभोजदिवाकरोऽस्तु सहसा नः श्रेयसे यं(?)च वै ॥१॥
नमः श्रीवर्द्धमानाय महते देवनन्दिने ।
प्रभाचन्द्राय गुरवे तस्मै चाऽभयनन्दिने ॥२॥

६५. प्राकृतशब्दानुशासन, स्वोपज्ञवृत्तिसहित (कवि त्रिविक्रम)

आदिभाग :—

श्रीवीरं प्राच्याचल-समुदितमखिलप्रकाशकं वन्दे ।
दिव्यध्वनिपटुदीधितिमहमक्षरपद्धतिप्राप्त्यै ॥१॥
श्रुतभर्तुरर्हन्नन्दि-त्रैविद्यमुनेः पदाम्बुजभ्रमरः ।
श्रीवाणसकुलकमलद्युमणेरादित्यशर्मणः पौत्रः ॥२॥
श्रीमल्लिनाथ-पुत्रो लक्ष्मीगर्भामृताम्बुधिसुधांशुः ।
सोमस्य वृत्त-विद्या-धाम्नो भ्राता त्रिविक्रमस्तु कविः ॥३॥
श्रीवीरसेन-जिनसेनार्यादिवचः पयोधिपूरात्कतिचित् ।
प्राकृतपदरत्नानि प्राकृतकृति-सुकृति-भूषणाय चिनोति ॥४॥
अनल्पार्थ-सुखोच्चारश्शब्दसाहित्यजीवितम् ।
स च प्राकृतमेवेति मतं सूक्तानुवर्तिनाम् ॥५॥
प्राकृतं तत्समं देश्यं तद्भवं चेत्यदस्त्रिधा ।
तत्समं संस्कृतसमं नेयं संस्कृतलक्षणात् ॥६॥
देश्यमार्षं च रूढत्वात्स्वतंत्रत्वाच्च भूयसा ।
लक्ष्म नापेक्षते तस्य सम्प्रदायो हि बोधकः ॥७॥
प्रकृतेस्संस्कृतात्साध्यमानात्सिद्धाच्च यद्भवेत् ।
प्राकृतस्याऽस्य लक्ष्यानुरोधिलक्ष्म प्रचक्ष्महे ॥८॥
प्राकृतपदार्थसार्थप्राप्त्यै निजसूत्रमार्गमनुजिगमिषताम् ।
वृत्तिर्यथार्थसिद्ध्यै त्रिविक्रमेणागमक्रमेण क्रियते ॥९॥

तत्सम-तद्भव-देश्य-प्राकृतरूपाणि पश्यतां विदुषां ।
दर्पणति येयमवनौ वृत्तिस्त्रैविक्रमी जयति ॥१०॥
प्राकृतरूपाणि यथा प्राग्यैराहेमचन्द्रमाचार्यैः ।
विवृतानि तथा तानि प्रतिबिम्बन्तीह सर्वाणि ॥११॥
सिद्धिर्लोकाच्च ॥१॥ (प्रथमसूत्र)

इति श्रीमदर्हनन्दित्रैविद्यदेवश्रुतधर-श्रीपादप्रसादासादितसमस्तविद्याप्रभाव-श्रीमत्त्रिविक्रमदेवविरचितप्राकृतव्याकरणवृत्तौ प्रथमाध्यायस्य प्रथमः पादः ।

[नोट—इस ग्रन्थमें चार अध्याय हैं और प्रत्येक अध्यायमें पाणिनीय व्याकरणकी तरह चार पाद हैं । यह ग्रन्थ साङ्ग सिद्धशब्दानुशासनके कर्ता हेमचन्द्राचार्यसे बादका और कालिदासके शाकुन्तलादि नाटकत्रयके व्याख्याता काटयवेमसे पहलेका बना हुआ है; क्योंकि इसमें हेमचन्द्रके उक्त ग्रन्थवाक्योंका उल्लेखपूर्वक खण्डन है और काटयवेमके व्याख्या-ग्रन्थोंमें इस ग्रन्थके सूत्रोंका ही प्राकृतविषयमें प्रमाणत्वरूपसे निर्देश पाया जाता है, ऐसा श्रीवेंकटरंगनाथ शर्माने इस ग्रन्थके प्रथम अध्यायकी भूमिकामें प्रकट किया, जो सन् १८९६ में आर्षप्रेस विजिगापट्टमसे छपकर प्रकाशित हुआ है । ग्रन्थका अन्तभाग पासमें न होनेसे नहीं दिया जा सका ।]

९९. जिनसहस्रनाम-टीका (अमरकीर्तिसूरि)

अन्तभाग :—

नत्वा जिनसेनाचार्यं विद्यानं[दं] समंतभद्रमर्हंतं ।
श्रीमत्सहस्रनाम्ना ·················च्मि संसिद्धयै ॥१॥

अथ श्रीमज्जिनसेनाचार्यः चातुर्वर्ण्यसंघसमुद्धरेण धीरः सकललोक-नरोचनाकातः(?) खंडितापाखंडिमंडलाहंकारः शुचिवचनवीचीविरचित-चित्तचमत्कारः स्वर्गापवर्गपुरमार्गस्पंदनः चारुचारित्रचमत्कृतसक्रंदनः सकलजगज्जयजातदर्प्पकंदर्प्पनिष्कंदनः शुभोपदेशवचनशैत्यगुणावगणित-

हरिचन्दनः श्रीमद्गीर्वाणभाषारचितश्रीमहापुराणः जिनयज्ञादिसकलशास्त्र-प्रवीणः श्रीमद्गुणभद्राचार्यवर्यसेवितपादांभोजः प्रज्ञापुंजः इति विरुदावली विराजमानः जिनसहस्रनामस्तवनं संचिकीर्षुः प्रसिद्धाष्टसहस्रेद्धलक्षण-मित्यादिस्त्राभिप्रायमं[सू]चूनपरः श्लोकमित्याह—

× × × ×

इति सूरिश्रीमदमरकीर्तिविरचितायां जिनसहस्रनामटीकायां प्रथमोध्यायः॥१॥

अन्तभाग :—

अथ प्रशस्तिः। स्वस्तिस्यात्कारकोत्तमाय श्रीमदनेकांतशासनाय।

सद्वृतो···लोकमहितः·························

····························य।

रत्नाना···············सुमनाः स्याद्वादचंद्रोदयः

साक्षात्सोऽत्र सनातनो विजयते श्रीमूलसंघोदधिः ॥१॥

आसाद्यद्युसदा(?) सहायमसमं गत्वा विदेहं जवा-

दद्राक्षीत् किल केवलेक्षणमिनं द्योतक्षमध्यक्षतः।

स्वामी साम्यपदादिरूढ़धिषणः श्रीनंदिसंघाश्रयो

मान्यः सोऽस्तु शिवाय शांतमनसा श्रीकुन्दकुन्दाऽभिधः ॥२॥

श्रीपद्मनंदिविद्वन् विख्याता त्रिभुवनेऽपि कीर्त्तिस्ते।

हारति हीरति हंसति हरति हरोत्तंसमनुहरति ॥३॥

श्रीपद्मनंदिपरमात्मपरः पवित्रो देवेन्द्रकीर्तिरथ साधुजनाऽभिवंद्यः।

विद्यादिनंदिवरसूरिरनल्पबोधः श्रीमल्लिभूषण इतोऽस्तु च मंगलं वे ॥४॥

प्रायो व्याकरणं येन धातुपाठेऽवतारितं।

स जीयात् शब्दमाणिक्यनिवासः श्रुतसागरः ॥५॥

मल्लिभूषणशिष्येण भारत्या नंदनेन च।

सहस्रनामटीकेयं रचिताऽमरकीर्तिना ॥६॥

इति श्रीसूरिश्रीमदमरकीर्त्तिविरचितायां भट्टारकश्रीविश्वसेनाऽनुमोदितायां संघाधिपति-सुधाचन्द्र-चन्द्रिका जिनसहस्रनामटीका सम्पूर्णा ॥

९७. सरस्वती(भारती)कल्प (मल्लिषेणसूरि)

आदिभाग :—

जगदीशजिनं देवमभिवन्द्याभिनन्दनं(शंकरं) ।
वक्ष्ये सरस्वतीकल्पं समासाद(सेना)ल्पमेधसान्(म्) ॥१॥
अभयज्ञानमुद्राक्षमालापुस्तकधारिणी ।
त्रिनेत्रा पातु मां वाणी जटाबालेन्दुमण्डिता ॥२॥
लब्धवाणीप्रसादेन मल्लिषेणेन सूरिणा ।
रच्यते भारतीकल्पः स्वल्पजाप्य-फलप्रदः ॥३॥

अन्तभाग :—

वाक्पतेर्वादिवेतालादभयेन्दोश्च पद्मलात् ।
श्रीमल्लिषेणयोगींद्रादेशाद्विद्या समागता ॥६५॥
कृतिना मल्लिषेणेन श्रीषेणस्य च सूनुना ।
रचितो भारतीकल्पः शिष्टलोकमनोहरः ॥६६॥
सूर्याचन्द्रमसौ यावन्मेदिनी भूधरार्णवाः ।
तावत्सरस्वतीकल्पः स्थेयाच्चेतसि धीमताम् ॥६७॥

इत्युभयभाषाकविशेखर-श्रीमल्लिषेणसूरिविरचितः श्रीभारतीकल्पः समाप्तः ।

९८. कामचाण्डालीकल्प (मल्लिषेणसूरि)

आदिभाग :—

श्रीवीरं जिनमानम्य खंडित-स्मर-सायकम् ।
वक्ष्येहं कामचाण्डालीकल्पमिष्टफलप्रदम् ॥१॥
भूषिताभरणैः सर्वैर्मुक्तकेशा निरम्बरा ।
पातु मां कामचाण्डाली कृष्णवर्णा चतुर्भुजा ॥२॥

फलकांचकलशकरा शाल्मलिदण्डोद्धमुरगोपेता ।
जयतात् त्रिभुवनवन्द्या जगति श्रीकामचाण्डाली ॥३॥

विरचयति मन्त्रवादं संक्षेपात्सकलजनहितार्थमिदम् ।
कलिकालोभयभाषा-कविशेखर-मल्लिषेणगणी ॥४॥

साधकदेव्याराधनमशेषजनवश्ययन्त्रतन्त्राणि ।
ज्वालागर्दभभेदः शास्त्रेऽस्मिन् कथ्यते स्पष्टम् ॥५॥

अन्तभाग :—

निःशेषागममन्त्रवादकुशलं वाग्देवताऽलंकृतं ।
तन्नत्वा कविशेखरं मुनिवरं श्रीमल्लिषेणाह्वयं ॥
दद्यात्स्वर्णसमन्वितोन्नतघटाद् धाराजलं तत्करे ।
साक्षीकृत्य हुताशनानिलव(प)यश्चन्द्रार्कतारागणान् ॥ आज्ञाप्रक्रमः १

उद्यन्निर्मलकीर्तिपूरितदिशो विज्ञातजैनागमो ।
नाम्ना श्रीजिनसेनसूरिरभवद्भव्याम्बुजानां रविः ॥
तच्छिष्यः कविशेखरोऽजनि मुनिः श्रीमल्लिषेणो गणी ।
तेनैष स्वपरोपकारजनकः श्रीमन्त्रवादः कृतः ॥

इत्युभयभाषाकविशेखरश्रीमल्लिषेणसूरि-विरचिते कामचाण्डालीकल्पे ज्वालागर्दभलक्षणाधिकारः पंचमः ।

भाषाद्वय-कवितायां कवयो दर्पं वहन्ति तावदिह
नालोकयन्ति यावत्कविशेखर-मल्लिषेणमुनिम् ॥१॥

छन्दोलंकारशास्त्रं किमपि न च परं प्राकृतं संस्कृतं वा
काव्यं तच्च प्रबन्धं सुकविजनमनोरंजनं यत्करोति ।
कुर्वन्नुर्वी-शिलादौ न लिखति किल तत्या(द्या)ति यावत्समाप्तिं
स श्रीमान् मल्लिषेणो जयतु कविपतिर्वाग्वधूमण्डितास्यः ॥२॥

इति कामचाण्डालीकल्पः समाप्तः ।

९९. ज्वालिनीकल्प (मल्लिषेणसूरि)

आदिभाग :—

चन्द्रप्रभं जिनं नत्वा शरच्चन्द्रसमप्रभम् ।
वक्ष्येहं ज्वालिनीकल्पं संकल्पितसमप्रभम ॥१॥

अन्तभाग :—

श्रीमतोऽजितसेनस्य सूरेः कर्मार्तिधूरिणः ।
शिष्यः कनकसेनोभूद्वणि(णि ?)कमुनिजनस्तुतः ॥२॥
तदीयशिष्यो जिनसेनसूरिः तस्याग्रशिष्योऽजनि मल्लिषेणः ।
वाग्देवतालञ्छितचारुवक्त्रस्तेनारचि [श्री] शिखिदेविकल्पः ॥३॥
कुमतिमतविभेदी जैनतत्त्वार्थवेदी हृतदुरितसमूहः क्षीणसंसारमोहः ।
भवजलधितरण्डो वाग्व[रो]वाकरण्डो विबुधकुमुदचन्द्रो मल्लिषेणो गणीन्द्रः४

इति ज्वालिनीकल्पं समाप्तम् ।

१००. भैरवपद्मावतीकल्प सटीक (मल्लिषेणसूरि)

आदिभाग :—

टी० मं०—श्रीमच्चातुर्णिकायामरखचरवधूनृत्यसंगीतकीर्ति-
व्यामाशामंडलं मंडितसुरपटहाद्यष्टसत्प्रातिहार्यं ।
नत्वा श्रीपार्श्वनाथं जितकमठकृतोद्दंडघोरोपसर्गं
पद्मावत्या हि कल्पप्रवरविवरणं वक्ष्यते मल्लिषेणैः* ॥१॥

---

* साराभाई नवाब द्वारा मुद्रित प्रतिमें 'बन्धुषेणैः' पाठ दिया है और उसके द्वारा टीकाको बन्धुषेणकृत सूचित किया है, परन्तु ऐ० प० सरस्वती भवन बम्बईकी प्रतिमें और ला० मनोहरलालजी जौहरी देहलीकी दो प्रतियों में भी 'मल्लिषेणैः' पाठ पाया जाता है और उससे टीकाका स्वोपज्ञ होना जाना जाता है, ग्रन्थकी सन्धियोंमें भी मल्लिषेणका ही नाम है। बन्धुषेणके टीकाकार होनेका उनसे कोई समर्थन नहीं होता। और न अन्तमें ही बन्धुषेणका टीकाकार-रूपसे कोई नामोल्लेख तथा परिचय उपलब्ध होता है।

मूल मं०—कमठोपसर्गदलनं त्रिभुवननाथं प्रणम्य पार्श्वजिनम् ।
वक्ष्येऽभीष्टफलप्रद-भैरवपद्मावतीकल्पम् ॥१॥
पाशफलवरदगजवशकरणकरा पद्मविष्टरा पद्मा ।
सा मां रक्षतु देवी त्रिलोचना रक्तपुष्पाभा ॥२॥
त्रोतला त्वरिता नित्या त्रिपुरा कामसाधनी ।
देव्या नामानि पद्मायास्तथा त्रिपुरभैरवी ॥३॥
पाशवज्रफलांभोजभृत्करा त्रोतलाह्वया ।
शंखपद्माभया वरदा त्वरिताख्याऽरुणप्रभा ॥४॥
पाशांकुशपयोजातसाक्षमूल(माल)करा वरा ।
हंसवाहाऽरुणा नित्या जटा बालेन्दुमण्डिता ॥५॥
शूल-चक्र-कशांभोज-चाप-वाण-फलांकुशैः ।
राजिताऽष्टभुजा देवी त्रिपुरा कुंकुमप्रभा ॥६॥
शंख-पद्म-फलांभोजभृत्करा कामसाधनी ।
बन्धूकपुष्पसंकाशा कुक्कुटोरगवाहना ॥७॥
पाशचक्रधनुर्वाणखेटखड्गफलाम्बुजैः ।
लसद्भुजेन्द्रगोपाभा त्र्यक्षा त्रिपुरभैरवी ॥८॥
आदौ साधकलक्षणं सुसकलां देव्यर्चनायाः क्रमं
पश्चाद्द्वादशयंत्रभेदकथनं स्तंभोऽङ्गनाकर्षणं ।
यंत्रं वश्यकरं निमित्तमपरं वश्यौषधं गारुडं
वक्ष्येऽहं क्रमशो यथा निगदिताः कल्पेऽधिकारास्तथा ॥६॥
इति दशविद्याधिकारैर्ललितार्याश्लोकगीतिसद्वृत्तैः ।
विरचयति मल्लिषेणः कल्पं पद्मावतीदेव्याः ॥१०॥
निर्जितमदनाटोपः प्रशमितकोपो विमुक्तविकथालापः ।
देव्यर्चनानुरक्तो जिनपदभक्तो भवेन्मंत्री ॥११॥
मंत्राराधनशूरः पापविदूरो गुणेन गम्भीरः ।
मौनी महाभिमानी मंत्री स्यादीदृशः पुरुषः ॥१२॥

गुरुजनकृतोपदेशो गततंद्रो निद्रया परित्यक्तः ।
परिमितभोजनशीलः स भवेदाराधको देव्याः ॥१३॥

निर्जितविषयकषायो धर्मामृतजनितहर्षगतकायः ।
गुरुतरगुणसंपूर्णः स भवेदाराधको देव्याः ॥१४॥

शुचिः प्रसन्नो गुरुदेवभक्तो दृढव्रतः सत्यदयासमेतः ।
दक्षः पटुर्बीजपदावधारी मंत्री भवेदीदृश एव लोके ॥१५॥

एते गुणा यस्य न संति पुंसः क्वचित्कदाचिन्न भवेत्स मंत्री ।
करोति चेद्दर्पवशात्स जाप्यं प्राप्नोत्यनर्थं फणिशेखरायाः ॥१६॥

इत्युभयभाषाकविशेखर-श्रीमल्लिषेणसूरिविरचिते भैरवपद्मावतीकल्पे मंत्रिलक्षणनिरूपकः प्रथमोऽधिकारः ॥

अन्तभाग :—

सकलनृपमुकुटघट्टितचरणयुगः श्रीमदजितसेनगणी ।
जयतु दुरितापहारी भव्यौघभवार्णवोत्तारी ॥५७॥

जिनसमयागमवेदी गुरुतरसंसारकाननच्छेदी ।
कर्मेन्धन-दहनपटुस्तच्छिष्यः कनकसेनगणी ॥५८॥

चारित्रभूषितांगो निःसंगो मथितदुर्जयाऽनंगः ।
तच्छिष्यो जिनसेनो बभूव भव्याब्जघर्मांशुः ॥५९॥

तदीयशिष्योऽजनि मल्लिषेणः सरस्वती-लब्धवरप्रसादः ।
तेनोदितो भैरवदेवतायाः कल्पः समासेन चतुःशतेन(४००) ॥६०॥

यावद्वार्धि-महीधर-तारागण-गगन-चन्द्र-दिनपतयः ।
तिष्ठति तावदास्तां भैरवपद्मावतीकल्पः ॥६१॥

इत्युभयभाषा-कविशेखरश्रीमल्लिषेणसूरिविरचिते भैरवपद्मावतीकल्पे गरुडाधिकारो दशमः ॥

१०१. महापुराण (मल्लिषेणसूरि)

आदिभाग :—

.... ॥१॥

अन्तभाग :—

तीर्थे श्रीमुलगुन्दनाम्नि नगरे श्रीजैनधर्मालये
स्थित्वा श्रीकविचक्रवर्तियतिपः श्रीमल्लिषेणाह्वयः ।
संक्षेपात्प्रथमानुयोगकथनव्याख्यान्वितं शृण्वतां
भव्यानां दुरितापहं रचितवान्निःशेषविद्याम्बुधिः ॥१॥
वर्षैकत्रिंशताहीने सहस्रे(९६९) शकभूभुजः ।
सर्वजिद्वत्सरे ज्येष्ठे सशुक्ले पंचमीदिने ॥२॥
अनादि तत्समाप्तं तु पुराणं दुरितापहम् ।
जीयादाचन्द्रतारार्कं विदग्धजनचेतसि ॥३॥
श्रीजिनसेनसूरितनुजेन कुदृष्टिमतप्रभेदिना
गारुडमंत्रवादसकलागमलक्षणतर्कवेदिना ।
तेन महापुराणमुदितं भुवनत्रयवर्तिकीर्तिना
प्राकृतसंस्कृतोभयकवित्वधृता कविचक्रवर्तिना ॥

[विद्वद्रत्नमाला, कोल्हापुर ल० भ० मठ प्रति

१०२. कर्मकाण्ड-टीका (भ० ज्ञानभूषण व सुमतिकीर्ति)

आदिभाग :—

महावीरं प्रणम्यादौ विश्वतत्त्व-प्रकाशकं ।
भाष्यं हि कर्मकाण्डस्य वक्ष्ये भव्यहितंकरं ॥१॥
विद्यानंदि-सुमल्ल्यादिभूष-लक्ष्मीन्दु-सद्गुरून् ।
वीरेन्दं-ज्ञानभूषं हि वंदे सुमतिकीर्तियुक् ॥२॥

सिद्धांतपरिज्ञानी चक्रवर्तिश्रीनेमिचन्द्रकविः ग्रंथप्रारम्भपूर्वं ग्रन्थनिर्विघ्न-परिसमाप्त्यादिफलमभिलषन् श्रीइष्टदेवनेमिनाथं नमस्कुर्वन्नाह—

अन्तभाग :—

मूलसंघे महासाधुर्लक्ष्मीचन्द्रो यतीश्वरः ।
तस्य पट्टे च वीरेन्दुर्विबुधो विश्ववंदितः ॥१॥
तदन्वये दयाम्भोधिर्ज्ञानभूषो गुणाकरः ।
टीकां हि कर्मकाण्डस्य चक्रे सुमतिकीर्तियुक् ॥२॥
टीकां गोम्मटसारस्य विलोक्य विहितध्रुवं ।
पठंतु सज्जनाः सर्वे भाष्यमेतन्मनोहरं ॥३॥
प्रमादाद्भ्रमतो वापि यदशुद्धं कदाचन ।
टीकायामत्र संशोध्यं विबुधैर्दर्पवर्जितैः ॥४॥

इति श्रीभट्टारकश्रीज्ञानभूषण-विरचिता * कर्मकाण्डग्रंथटीका समाप्ता ॥

[बारसेनामन्दिर-प्रति

१०३. पुण्यास्रव-कथाकोष (रामचन्द्र मुमुक्षु)

आदिभाग :—

श्रीवीरं जिनमानम्य वस्तुतत्त्व-प्रकाशकं ।
वक्ष्ये कथामयं ग्रन्थं पुण्यास्रवाभिधानकं ॥१॥

अन्तभाग :—

इति पुण्यास्रवाभिधाने ग्रन्थे केशवनन्दिदिव्यमुनिशिष्य-रामचन्द्रमुमुक्षु विरचिते दानफलव्यावर्णनो नाम षोडशवृत्ताः (अधिकाराः) समाप्ताः ॥१६॥

---

* जयपुर और देहलीकी कितनी ही प्रतियोंमें 'ज्ञानभूषणनामांकिता सूरिसुमतिकीर्ति-विरचिता' ऐसा पाठ पाया जाता है, जो ग्रन्थकी दोनों भट्टारकों द्वारा संयुक्त रचना होनेका परिणाम जान पड़ता है। और जिस ग्रन्थको 'कर्मकाण्ड' नाम दिया गया है वह १६० गाथात्मक 'कम्मपयडि' (कर्मप्रकृति) नामका गोम्मटसारी प्रकरण है।

यो भव्याब्ज-दिवाकरो यमकरो मारेभपञ्चाननो
नानादुःखविधायि कर्म्मकुभृतो वज्रायते दिव्यधीः।
यो योगीन्द्र-नरेन्द्र-वन्दितपदो विद्यार्णवोर्त्तीर्णवान्
ख्यातः केशवनन्दिदेव-यतिपः श्रीकुन्दकुन्दान्वयः ॥१॥

शिष्योऽभूत्तस्य भव्यः सकलजनहितो रामचन्द्रो मुमुक्षु-
र्ज्ञात्वा शब्दापशब्दान् सुविशदयशसः पद्मनन्द्याभिधानात्(ह्वयाद्वे)।
वन्द्याद्वादीभसिंहात्परमयतिपतेः सो व्यधाद्भव्यहेतो-
र्ग्रन्थं पुण्यास्रवाख्यं गिरिसमितिमितैर्दिव्यपद्यैः कथार्थैः ॥२॥

सार्द्धैश्चतुःसहस्रैर्यो(४५००)मितः पुण्यास्रवाह्वयः।
ग्रन्थः स्थेयात् सतां चित्ते चन्द्रादिवत्सदाम्बरे ॥३॥ *
कुन्दकुन्दान्वये ख्याते ख्यातो देशिगणाग्रणीः।
अभूत संघाधिपः श्रीमान्पद्मनन्दी त्रिरात्रिकः ॥४॥

वृषाधिरूढो गणपो गुणोन्नतो विनायकानन्दितचित्तवृत्तिकः।
उमासमालिङ्गितईश्वरोपमस्ततोप्यभून्माधवनन्दिपण्डितः ॥५॥
सिद्धांतशास्त्रार्णवपारदृश्वा मासोपवासी गुणरत्नभूषितः।
शब्दादिवार्थो(?) विबुधप्रधानो जातस्ततः श्रीवसुनन्दिसूरिः ॥६॥

